ह्नानिमंदवेगेविपर्ययः॥ मध्यमंमध्यभावेतुतज्जायोस्तुलक्षयेत॥ प्रमाणकालभावाःस्युस्त्रिस्त्रेवंसमाविंशतिः
॥ गतानितत्रसाम्येस्यात त्रिभिःसुरतमुत्तमं॥ सर्वेवैषम्यजंतुस्यादधमंपशुचेष्टितं॥ शेषंतुमध्यमंस्या

३९ देवेष्वपि जुगुप्सितमित्यादि॥ इंद्रियस्यायतनं लक्षणं तत्स्वरूपाकृ॥ ७४॥ अथ शशस्य स्वरूपं निरूप्यते स्पष्टोर्थः॥ प्रा
यः कोमलकुंतलाः पृथुदृशः शांताश्च तुच्छाशनाः सत्संभोगाः सुवयः सुवर्तुलमुखाः स्थूलाल्पदंताः सदा॥ वि
शालाः करजानुपादजघनग्रीवोरुपुष्टा मतां धन्यास्ते स्वरताः सुगंधिमदनस्यंदाविनीताः शशाः॥ ७५॥ प्रा
यः इति प्रसिद्धाः शशाः पुरुषविशेषा एवंविधाः स्युरित्यन्वयः॥ कीदृशाः प्रायो बहुधा कोमलाः स्वल्पकुंत
लाः केशा येषामेवंभूताः पृथुदृशो विस्तीर्णाक्षाः शांताः क्षमावंतः तुच्छमल्पमशनं भक्षणं येषां ते तथाभूताः॥ स
त्संभोगा येषां ते तथाभूताः सुष्ठु वयो यौवनावस्थाविशेषो येषां सुवर्तुलानि मुखानि येषां ते च ते तथाभूताः ३९
ख गजात्यादित्वोर्थे पदसन्निधानात्॥ स्थूलाश्च ते अल्पाश्च दंता येषामेवंभूताः करजानुपादजघनग्रीवोरु

८८

बुद्धामतां स्मार्तां रागमतेभिस्पधिपाठ ॥ विभ्रमाधारयंतोधन्याः स्वे पुरुस्वजनेषु रतास्तसुरा एवंभूताः सुग
धिशरीरः नस्यंदः कामसलिलद्रवो येषामेवंभूता विनीताः सुशिक्षिताः ॥ एतद्द्विरोषण विशिष्टं सशशानां लक्षणं
ज्ञेयमिति शशाकलविकीर्तितं नृतां ॥ ५ ॥ वृषभलक्षणानि निरूप्यंत इति शेषः ॥ क्रूराः प्रोन्नममौलयो हृद्भुजाः
सुप्रौढवक्षःस्थला रक्षाः कूर्मनिभोदराः सुकठिनाः स्वाङ्गाचिताः पीवराः ॥ श्रोणीतः स्थिरदीर्घलोचन
भृतः स्वाश्रहस्तोदरा मालालोलाक्ष भानवींगत्वा मितं कामी कुर्यां विभ्रति ॥ ५ ॥ क्रूरा इति ॥ वृषभानवांगु
लमितं कामांकुरां विभ्रतीत्यन्वयः क्रीडनाः क्रूराः क्रूरस्वभावाः प्रोन्नतमामौलयः केशाये षामेवंभूताः सु
प्रौढानि विस्तीर्णानि वक्षःस्थलानि येषामेवंभूताः कूर्मेण तुल्यमुदरं येषामेवंभूताः ॥ त्यागेनदानेनान्वि

61

३२ ताउदाराइत्यर्थः॥ कटिनादृढाः पीवराः पुष्टाश्रोणितः स्वरूपं येषां तानि सिआणि दीर्घाणि चललोचनानि बिभ्र
तीत्येवंभूताः॥ अंतोस्य वसितेरस्येस्वरूपे निश्चयेंतिकइतिविश्वः॥ स्वास्फ़ेह स्तोदरं हस्ततलं येषां मेवंभू
ताः॥ अन्यस्फुगमं॥ उक्तं त्रिशोषण विशिष्टसंनवांगुल मदनध्वजं वसंबद्धषसंज्ञकं पुरुषाणां लक्षणं बोध्यं
॥शशकूलविश्रीडितंवर्तं॥ १५॥ अथाश्वलक्षणानि कथ्यंतइतिशेषः॥ दीर्घस्थूलशिरोरुहाश्चलद्दृतिस्फा
रेक्षणाः क्रोधनाअसंतंकूरादीर्घकंधरस्त्रश्रोणा ननालोभिताः॥ पीनोरःस्थलदीर्घबाहुयुगला निद्रा
लवःसालसाःप्रोद्दावक्रनखांघ्रिजानुयुगला गंभीरसंभाविणः॥ दीर्घेति क्रोधनाः कोपस्वभावाः तुरगाश्व
श्वाआदिसांगुलैर्द्वादशांगुलैः संमितं लिंगंसदाविभ्रतिधरंतीत्यस्य स्लोकेनान्वयः कीदृशाः दीर्घाः स्थूलाः ३२

62

शिरोरुहाः केशा येषामेवं भूताः चलंति स्फाराण्यति विस्तृतानीक्षणानि येषां तथाभूताः अंसंतं कृशानि दी
र्घाणि कंधरस्त्रोत्राननानि ग्रीवादंतकर्णमुखानि येषां तथाभूताः अत्र कंधरशब्दस्योक्ताभूरि प्रयोग
त्वादेकस्मिन्यत्र योगिकाः ॥ ताद्रूप्यो दन्ततोष्टताघूह्या लिंगांतरेपि तद् इत्यमरपरिभाषया पुंस्त्वं ज्ञेयं ॥ लो
भः संजातो येषामिस्सेवं भूताः ॥ दीर्घबाहुसुगुल्फपर्वा पीनपुष्टस्फुरः स्फुलं येषां ते च ते तथाभूताः वक्रा
णि नखांघ्रिजानुसुगुल्फानि येषां तथाभूताः सुग्मे तु पुत्रुलं युगमित्यमरः ॥ गंभीरं संभाषणं इति तथाभू
ताः शेषं स्पष्टं ॥ ९६ ॥ दृष्टा खंडरते रताश्च नितरां दीर्घांगुलिश्रेणयः स्थूलस्त्री रतिलालसा बहुभुजो गला
नुबध्यान्विताः ॥ भूरिस्तार विगंधि मन्मथजलप्रामास्तथा व्याकुला आरिस्पांगुल संमितं चतुरंगालिंगं स

३३ शा विश्रुति ॥७॥ इहेति । दृष्टं च तद्दृष्टं च तत् च तदृतं च तस्मिन्नितरां रताः स्वावल्लोकितरतान्तसरा इत्यर्थः ॥ दुष्टाः
खंडरते रता इति पाठे दुष्टा ईर्ष्यादिदोषयुक्ताः खंडं मध्ये मध्ये व्यवहितं तेरतं तस्मिन्रताः प्रीतिमंतः दीर्घा अंगु
लीश्रेणयो अंगुलिपंक्तयो येषामेवंभूताः स्मरलस्तिप्यारतो लाटस्याः प्रीताः पटुर्भुंजते तेन तथाभूताः अनुवृद्धि
र्यस्यास्तथाभूतयागसा आन्विता युक्ताः सूरिश्रसारः विगंधो स्यास्तीयेवंभूतं येयन्मन्मथजलं येरतस्तसाध्या
स्तद्वर्हुलाः ॥ एवंविधास्तिरश्चितरेतः सेक्या इत्यर्थः ॥ तथाप्याकुलाः सर्वेशाम्यप्रांतःकरणा इत्यर्थः ॥ शार्दूल
विक्रीडितं वृत्तं ॥८॥ अथ मृगीलक्षणानि निरूप्यंते तत्र मृगीमेषः ॥ सांद्राकुंचितकुंतलासमशिरास्तन्वी सुतुंगस्त
नी फुल्लेंदीवरलोचनाल्पविवरघ्राणा सुतुंगोदरी ॥ आरक्ताधरपाणिपादयुगला पीनोरुकासालया प्रायः ३३

कोमलत्वंचलज्जंसुभुजाविस्तीर्णांगंइसच्छली॥१०॥सांद्रेति॥निम्नानिचतानिषडंगुल्लानितैःपरिमितंगुह्यंच
हेतीतन्वीमृगीज्ञेयावोध्येतिश्लोकद्वयान्वयः॥किंभूतासांद्राःस्निग्धाआकुंचिताःकुटिलाःकुंतलाःकेशा
यस्यास्तथाभूतासमाःशिराधमन्योयस्याएवंभूतासुवृत्तुंगाकुचौस्तनौयस्यास्तथाभूताफुल्लेंदीवरेइवविं
कसितनीलकमलेइवलोचनेयस्यास्तथाभूता॥प्रफुल्लोत्फुल्लसंफुल्लव्याकोचविकचस्फुटाः॥फुल्लश्चैतेवि
कसितइत्यमरः॥इंदीवरंचनीलेस्मिन्नित्यमरः॥अल्पविवरंअल्परंध्रंघ्राणंनासायस्याःसातुच्छमल्प
मुदरंयस्यास्तथाभूताआरक्ताधरपाणिपादयुगुलालोहिताधरोष्ठहस्तचरणद्वंद्वाकरूचकामालत्वंगु
ह्यंचेरुकामालयंपीनमरुकामालयंयस्यास्तथाभूताप्रायइतिसर्वत्रयोज्यं॥कोमलौचंचलौऊरूजसुभु

औपम्यास्तथाभूता विस्तीर्णौ गंडस्थली यस्यास्तथाभूते तिरगइ इल्व विक्रीडितं वत्से॥१०॥ इर्ष्यालुः सुकुमा
रिका पिकरवा त्वदंतरतो त्वंपठा जिस्त्रस्तं संबुजमंजुगंधि मदनस्यंदं रथात्पाराना॥ सुश्रोणी सरलां गुलि गजेज
गति श्चैंव स्मनो रागिणी ज्ञेयानि म्नच्छंद गुलैः परिमितं गुह्यं वहं तीमृगी॥१९॥ इर्ष्यालु रीर्ष्यावती सुकुमारे
व सुकुमारिका पिकस्य कोकिलस्य रवं इव रवो यस्यास्तथाभूता वनप्रियः परभृतः पिकः कोकिल इत्यपी
त्यमरः॥ अस्वं तरते तं पठा आसक्तिमती अंबुजस्य गंधरवं गंधो यस्य संबुजगंधिः स चासौ मदनस्यंदश्चेति बि
भ्रती धत्री तस्या अल्पं भ्रशानं यस्यास्तथाभूता सुष्ठु श्रोणी यस्यास्तथाभूता। कटो नाश्रोणि पृष्ठकं कटिः श्रोणिः
क कुद्मतीत्यमरः॥ सरला अंगुलयो यस्यास्तथाभूता॥ गजस्य गतिरिव गतिर्यस्यास्तथाभूता मंथरगमनेत्य

यैः ॥ चंचत् चलत् मनो यस्मात्सा च्याभता रागिणी प्रेमवती ॥ इति ॥ उक्तविशेषणविशिष्टा चेल्लक्षणं बोध्यमिति
रागं कुलविकीर्तिं बते ॥ १९ ॥ अथ पखडयालक्षणानि निरूप्यंत इति शेषः ॥ मौलिं निम्नसमुन्नतं विदधती स्थूल
जंघे सांद्रैः कचैर्नीलांभोजदलेक्षणा नतगलश्रोत्राननाकोमला ॥ पीनश्रोणिपयोधरा श्रुभगतिर्गंभीरना
भीरुद्दा किंचित्सुधवधरा चर्मासत्वभुजा क्षामोदरी को पिनी ॥ २० ॥ मौलिमिति संभोगकाले या पलवलस्य मां
सस्य प्रगंधइव प्रगंधो यस्यैवं भूतं पिशितं तरलं मांसं पललं क्रव्यमामिषमित्यमरः ॥ कामांभो रेतः सुचिरा
त् चिरकालेन द्रवेत् स्रुधेः सा कोमलांगी रमणी पाखडश्वाश्विनी विज्ञेया तत्र स्त्रीकेन यो जना ॥ कीदृगीस्थूला
श्चते ऋजवः सरलाश्चते चते सांद्राः स्निग्धाश्चैवं भूतैः कचैः केशैर्निम्नसमुन्नतं निम्नोन्नतं मौलिं केशपाशं वि

३५

दधती कुर्वती नीलांभोजदलेईक्षणे यस्यास्तथाभूता गलः कंठश्च श्रोणिश्चाननं च तं गलश्रोण्याननं यस्या
स्तथाभूता पीनं पुष्टं श्रोणि पयोधरं यस्यास्तथाभूता शुभा सुंदरा गतिर्यस्यास्तथाभूता गंभीरो नाभीह्रदो य
स्यास्तथाभूता किंच दृष्टपुर्विस्तलौ धरौ धरोष्ठौ यस्या एवंभूता मांसलौ पुष्टौ भुजौ यस्यास्तथाभूता श्लिष्टा मंद्रु
रामुदरं यस्यास्तथाभूता कोपिनी कोपिवतीति ॥२०॥ शोणांभोरुहचारुपाणिचरणा निद्रासु भोज्याप्रिया
निस्तीर्णं दधती कटिं चलमनाः कांतेनुरागान्विता ॥ कामांभः पल्लवप्रगंधिसुचिरात्संभोगकाले द्रवेत्स्विन्ने
या वेडवान्त्वां गुल्मभितं गुह्यं वहंती बुधैः ॥२१॥ शोणेति ॥ शोणांभोरुहवत् रक्तकमलवत् चारु सुंदरं पाणिच
रणं यस्यास्तथाभूता निद्रासु भोज्ये प्रिये यस्यास्तथाभूता विस्तीर्णं कटिं दधती बिभ्रती चलं मनो यस्यास्त

३५

थाभूता कांते प्रियविषये अनुरागेणान्विता एवंभूतान यांगुरवैर्भितं प्रमितगुह्यं वहंतीति शार्दूलविक्रीडितं वृत्तं ॥
॥२१॥ करिणीलक्षणानि कथ्यंते ॥ इतिशेषः ॥ पीनघ्राणकपोलकर्णगलकप्रस्फारलंबोष्ठिका पिंगाक्षी दर[illegible]
खर्वपर्वनिवहा ह्रस्वाल्पनीलालका ॥ ह्रस्वा स्थूलकरांघ्रिका कुसुगुल्फा गंभीरसूक्ष्मस्वरा कामार्तो सततं सुती
क्ष्णहस्तिना दुष्टाचर्यात्र पा ॥२२॥ पीनेति ॥ बुधैः ह्रस्वा सा हस्तिनी ज्ञेया इति शेषः कर्तृपाल्वयः ॥ किंभूता प्रस्फा
रः स्थूलो लंबओष्ठो यस्याः पीनं घ्राणकपोलकर्णगलकं यस्याः सा चासौ प्रस्फारलंबोष्ठिका चेत्येवंभूता
पिंगे पिशंगे अक्षिणी यस्यास्तथाभूता दरमीषत् खर्वो ह्रस्वः पर्वनिवहा अंगुल्यादिग्रंथिसमुहा यस्या
स्तथाभूता ग्रंथिनां पर्वपरुषी ॥ समूह निवह व्यूह संदोह विसर व्रजा इत्यमरः ॥ अल्पा नीला अलकाः

३६

केशाः यस्यास्तथाभूता। स्थूलकरांघ्रिबाहुमुखा॥ स्थूलहस्तपादभुजा दंष्ट्रा सुतीक्ष्णा रदना दंता यस्या
स्तथाभूता वीता गता त्रपा लज्जा यस्यास्तथाभूता निर्लज्जेत्यर्थः॥ शेषं सुगममिति॥२२॥ दुःशीला सबलो
गिकाष्ठयुक्तवा कष्टैकसाध्या रतौ कर्मतेव हुभोजना च नितरां पापेषु बद्धस्पृहा॥ विभ्रयेभमदोग्रगंधम
पि सा कंदर्पनीरं सदा ज्ञेया भानुमितां शुक्ले कपटनी वासा कुचैर्हस्तिनी॥२३॥ कुस्पनंग रंगे जातिविशेषप्र
वे सुरतभेद निरूपणे नामतती यस्थूला॥ दुःशीलेति॥ दुष्टं शीलं स्वभावो यस्या एवंभूता शीलस्वभावे सद्वृत्त
इति सज्जनः॥ सबलोम्नि गात्ये अवयवा यस्यास्तथाभूता॥ अंगं प्रतीकोवयवइत्यमरः॥ सा वस्यं तत्कष्टेनैवंकेव
लं साध्या॥ बहुभोजनं यस्यास्तथाभूता नितरामतीव पापेषु पापकर्मसु बद्धा स्पृहा इच्छा यया येत्थंभूता मस्याय

३६

त॰ यस्यास्तथाभूता। एकेमुख्यान्यकेवला इत्यमरः॥ + २

मै भः सचासौ मरश्चेति तद्दुग्रं गंधमेतादृशां कंदर्पनीरं रतोदकं बिभ्रतीभानु भिर्हीदृशा निर्मितानि। यरिभिता

॰र्यं गुल्मानि यस्यैस्सेवंभूतः एकः मदनावासो यस्यास्तथाभूतेति मुख्यमदनगृहगृहांरंभूतौ इत्यर्थः लघवकौ

डितं वृत्तं॥२३॥ अत्र ग्रंथांतरोक्तान्यन्यान्यपि लक्षणान्यन्वेषणीयानि॥ एवं राजगादिषु पुरुषेषु मन्यादिकासु

स्त्रीषु च प्रोक्तस्वीयनिखिललक्षणवत्वउत्तमत्वं किंचिन्न्यूनलक्षणमत्वेचाधमत्वं ज्ञेयं॥ तथाचोक्तं र

तिरहस्ये॥ उक्ता एकेमुख्यान्यकेवला इत्यमरः॥ उक्तावस्थप्रमाणस्य व्यभिचारेपि लक्ष्ये तत्र राजगादि मन्या

दिजातित्वमुत्तमाधमभेदतः॥ उक्तोत्थमानवक्तव्यलक्षणानि चयात्यतः॥ तत्संकरेपि बाहुल्यात्लक्ष्यं नि

र्धारये द्बुधइति॥ रागाईलघविक्रीडितं वृत्तं॥ इत्यनंगरंगतती पस्थ तत्व्याख्या॥ ॥७॥ अथांगनानां सामा

71

न्यभेदा निरूप्यंते ॥ सुगमं ॥ यावत्षोडशसंख्यकाब्दमुदिता बाल्यं ततस्त्रिंशतं यावत्स्यात्तरुणी तु बाणवि
शिखप्रख्यातु यावद्भवेत् ॥ साप्रौढेत्यभिधीयते कविवरैर्वृद्धा ततदूर्ध्वं स्मृता निं घाक्षा मकरुणाकलापविधिषु
या ज्यासदा कामिभिः ॥१॥ अथ स्त्रीणां वयःसंख्यया बालादिसंज्ञाः प्राह ॥ यावदिति ॥ यावत्षोडशसंख्य
मब्दं षोडशवर्षपर्यंतं बाले मुदिता स्त्री ॥ निशेषः ॥ ततः षोडशवर्षोद्यावत्त्रिंशतं त्रिंशद्वर्षपर्यंतं तरुणी स्या
त् ॥ तत इति सर्वत्र योज्यं ॥ ततस्त्रिंशद्वर्षोत्तरं बाणविशिखबाणांकानां पंचमतो गतिरिति रीत्या पंचपंचाशत्संख्या
न पंचसंख्याकानि वर्षाणि लक्ष्यं तैतैः प्रख्याता ख्यातिर्यस्याः पंचपंचाशद्वर्षवयस्कैत्यर्थः ॥ यावद्भवेत् ॥
तावत्सा प्रौढेति कविवरैरभिधीयते कथ्यते ॥ तदूर्ध्वं पंचपंचाशद्वर्षोर्ध्वं सा वृद्धा स्मृता ॥ कामिभिः सा

कामकलानां वक्ष्यमाणानां कलायाः समूहास्तेषां विधयस्तेषु सदा साध्या ॥ स्वजैरं स्वकुलोत्पन्नां वोढ्रां स्त्री
कन्यकांतश्चेति स्मरणात् ॥ अत्र प्रथमोद्दिष्टानां तिसृणां मुग्धा मध्या प्रगल्भेति संज्ञांतराणि ज्ञेयानि ॥ ए
वं स्वीया परकीया सामान्येति स्त्रीणां भेदा अप्युक्ता याः अत्र प्रसंगात्तत्तल्लक्षणान्युच्यंते ॥ तथा हि ॥ तत्र स्वा
मिमात्रविषयकानुरागवत्त्वं स्वीयात्वं ॥ प्रच्छन्नपरपुरुषविषयकानुरागवत्त्वं परकीयात्वं ॥ द्रव्येच्छामात्रप्र
युक्तनिखिलपुरुषविषयकानुरागवत्त्वं सामान्यत्वं ॥ तारुण्योद्गमवत्त्वं मुग्धात्वं लज्जामन्मथसाम्यवत्त्वं म
ध्यात्वं ॥ भर्तृमात्रविषयकाखिलकेलिकलापचातुर्यवत्त्वं प्रगल्भात्वं ॥ अत्र परस्परयोजनानि विचार्योन्ने
यानि ॥ एतदवांतरभेदा विस्तरभयान्न प्रदर्शिता इति ॥ शार्दूलविक्रीडितं वृत्तं ॥ शार्दूलविक्रीडितं म्सौ ज्सौ

तौगादिसु रूपमपरं इति लक्षणात्॥१॥ बालानवीनसुरते मुदिता तमिस्रे संजायते यत तरुणी महति प्रकाशे॥ प्रौढा प्रकाशतमसोः समुपैति सौख्यं वृद्धा तु न क्वचन जीवितहारिणी सा॥२॥ बालेति प्रकाशतमसोः प्रकाशे तमसि चेत्यर्थः॥ जीवितहारिणी दुःखदेत्यर्थः॥ शोभं सुगमं॥२॥ बाला तांबूलमालाधैस्तरुणी भूषणैस्तथा॥ सुप्रेम्णा रज्यते प्रौढा वृद्धा स्वालापगौरवैः॥३॥ बालेति॥ स्पष्टोऽर्थः॥३॥ कृशा तनुरतिदीर्घा निम्नकक्षा च कृष्णा सुचिरपातिविपुला कामिनी स्यात्कृशांगी॥ पृथुलतरशरीरा गौरवर्णा च खर्वा सतत सुरतयोगा गूढकक्षा दृढा स्यात्॥४॥ कृशेति॥ कृशा तनुः कामिनी श्लथमंगं यस्याः सा तथाभूता स्यात्॥ शिथिलयोनिरंध्रा शीघ्रं कामसलिलस्राविणी च भवेदित्यर्थः॥ अतिदीर्घा कामिनी श्लथांगी स्यादित्येवं सर्वत्र पृथक् पृ

(75)

थकयोजना॥ निम्नोगंभीरेकक्षेयस्याः॥ कृष्णाकृष्णवर्णा॥ सुचिरंचिरकालंयस्याविपुलाचतथाभूतास्यात्॥
घपुलतरशरीराकामिनी॥ दृढा दृढभगा चिराद्द्रुतः स्त्रावि णीचेत्यर्थः॥ स्यात्भवेत्॥ एवंगौरवर्णातथास्यादे
वमग्रेपिपूर्ववदेवयोजना॥ खर्वाह्रस्वा॥ सततंनिरंतरंसुरतयोगोयस्यास्तथाभूता॥ अगदस्कसेति छेदः॥
यस्योक्तंरतिरहस्ये॥ रीघोलक्षणाचतन्वी चिरविरहवती निम्नकक्षाश्लथाःस्युः स्वल्पागौरीचखर्वासततर
तिरपिन्यूरुकक्षाघनाःस्युरिति॥ मालिनीवृत्तं॥ मालिनीनौम्यौयवेतिलक्षणात्॥५॥ अथप्रकृतिलक्ष
णानि॥ कथ्यंतरतिशोभः॥ श्लेष्मकफालम्प्रकृतिपित्तलामध्यमासमना॥ अथवातलानारीतल्लक्ष्माण्य
भिदध्महे॥५॥ श्लेष्मेति॥ पित्तलापित्तप्रकृतिका॥ तल्लक्ष्माणितच्चिह्नानिशेषंसुगमं॥५॥ सुस्निग्धरं

३९

तनखलोचनपद्मयुग्मामानोन्नता प्रियतमे सुहृद्दानुरागा ॥ रूपाभाष्यशीतमृदुर्मांसलगुह्यरंध्रा प्रोक्तास्क
कन्थकृतिरेखवरा पुरंध्री ॥ ६ ॥ सुस्निग्धेति स्पष्टोर्थः ॥ ६ ॥ स्यात्सितत्वातु गौरांगी शोणलोचनपाणिजा ॥ श्ल
क्ष्णं कृष्णाप्रसन्ना च पीनश्रोणिपयोधरा ॥ ७ ॥ स्यादिति ॥ शोणलोचनपाणिजा आरक्तनेत्रनखी ॥ पुनर्भु
वःकरस्त्रीनखोक्ता नखरोमस्त्रियामिस्तमरः ॥ अल्पस्त्रगमं ॥ ७ ॥ बिभर्ति धर्मसलिलं विस्रगंधि सुबुद्धि
का ॥ श्लथकोमलवसांगी च कुन्तला सुरतेमृदुः ॥ ८ ॥ बिभर्तीति ॥ सापिप्तलाख्या विस्रगंध्यामगंधि घर्म
सलिलं बिभर्तीत्यन्वयः ॥ वरांगं गुह्यं [illegible] सुगमं ॥ [illegible]तत्वातु कृष्णरांगी [illegible] केशी कलापिनी ॥ चंचला ब
द्धभोज्या च रूक्षपाणिजलोचना ॥ ९ ॥ तातल्वेति बद्धभोज्यं भोजनं यस्याः रूक्ष पाणिजलोचना ॥ रू

३९

स्तनस्वनस्वना॥ शेषंसुगमं॥९॥ श्यामाधूसरवर्णाचसुरतेकठिनाभृशं॥ गोजिह्वानखरस्पर्शं बिभ्र
तीमदनालयं॥१०॥ श्यामेतिश्यामा॥ चेतिपक्षांतरेधूसरवर्णा॥ खरः कठोरः स्पर्शोयस्य गोजिह्वाभ
स्यासौ खरस्पर्शश्चेति कर्मधारयः॥ एवंविधं मदनालयं गुह्यं बिभ्रती वातलास्या इति पूर्वेणान्वयः
॥१०॥ अथ देवसत्वाद्यमुच्यंते॥ अथानंतरं देवस्यसत्व मिवसत्वंस्वभावोयस्याः सा आदिर्यासांताः॥ स्त्रि
य इति शेषः॥ सत्वोस्त्रीजंतुषु क्लीबेव्यवसाये पराक्रमे॥ आत्मभावे पिशाचादौ द्रव्येसत्तास्वभावयोरि
ति विश्वः॥ कथ्यंते कथ्यंते॥ प्रसन्नवक्त्रांबुजसौरभांगी संतोषयुक्ताशुचिकर्मदक्षा॥ प्रियंवदाभूरिधना
जनाढ्यानारीप्रमुक्ताकिल देवसत्वा॥११॥ प्रसन्नेति॥ अंबुजस्यसौरभमिवसौरभं यस्य देहे एवंभूतमंग

४०

मस्या रूपाभूताइयं नारी देवसत्तोक्तेत्यन्वयः॥ किलेतिनिश्चयार्थकमव्ययं सुगमं॥११॥ संगीतलीलारसि
कातिशांता सुगंधिमाल्यादिरुचिः शुभांगी॥ विलासिनी निर्मलचारुवेषा गंधर्वसत्वा वनिता प्रदिष्टा॥१२॥
संगीतेति॥ एवंविधा वनिता गंधर्वसत्ता प्रदिष्टेत्यन्वयः॥ शेषं सुगममिति॥१२॥ अपेतलज्जा मधुमांस
सक्ता पीनस्तनी चंपकचारुदेहा॥ रोषान्विता संततभोगवांछा प्रोक्ता कवींद्रैः खलु यक्षसत्ता॥१३॥ अपे
तेति॥ चंपकचारुदेहा गौरांगीत्यर्थः॥ एवंविधा यक्षसत्ता कवींद्रैः प्रोक्ता खल्वित्यन्वयः॥ शेषं सुगमं॥१४॥
आतिथ्यसख्यादिषु बद्धभावानुरागिणी निर्मलचारुवस्त्रैः॥ नानाव्रतै रेतिनच प्रयासं मनुष्यसत्वा प
रिकीर्तिता सा॥१४॥ आतिथ्येति॥ एवंविधा या नानाव्रतैरुपवासादिभिः प्रयासं श्रमं नैति न प्राप्नोति

४०

सा मनुष्यसत्वा परिकीर्तिता इत्यन्वयः ॥ शेषं सुगमं ॥ १४ ॥ दुश्चारिणी कुत्सितभर्तारि भोज्य हृष्टाति दुष्टा परि
तप्तगात्रा ॥ खर्वा तिलकहीना सविकारवक्त्रा मालिन्ययुक्ता ति पिशाचसत्वा ॥ १५ ॥ दुश्चारिणीति ॥ दुश्चा
रिणी दुराचारसंपन्ना इत्यर्थः ॥ अतिदुष्टा असंत दुष्टस्वभावेत्यर्थः ॥ कुत्सितेन भर्तारिणा भोज्येन हृष्टेवं भ
ता अति अ दंतं मालिन्ययुक्ता पिशाचसत्वा स्यादित्यन्वयः ॥ शेषं सुगमं ॥ १५ ॥ व्याकुला भ्रांत शीला च
सोच्छ्वासं बहु जृंभते ॥ निद्रालस्यकायवसततं नागसत्वेति सा स्मृता ॥ १६ ॥ व्याकुलेति ॥ या सोच्छ्वासं ब
हु जृंभते मुख — ॥ जृंभणं कुरुते सा नागसत्वेति स्मृतेत्यन्वयः ॥ शेषं स्पष्टं ॥ १६ ॥ उद्वेगं निष्फलं कुर्यान्नेत्रे संभ्रामये
मुहुः ॥ अतिक्षुधार्ता सततं काकसत्वेति सोच्यते ॥ १७ ॥ उद्वेगमिति ॥ निष्फलमुद्वेगं चित्तविकारविशेषं कुर्यात् ॥

साकाकसत्वेस्कन्य नइत्यन्वयः॥ शेषंसुगमं॥८७॥ अल्पंतत्वयत्नमायातुसततोद्भ्रांतलोचना॥ इंगितसंगरसस्वात्व
कंदिसत्वेतितांविदुः॥८८॥ अल्पंतेति॥ यास्त्रीतुइंगितसंगरसज्ञावक्ष्यमाणस्थानकेष्वासक्तेत्यर्थः॥ स्यात॥ तांक
पिसत्वाभावानरस्वभावेति विदुर्जानंतिस्मेत्यन्वयः॥ शेषंस्पष्टं॥८९॥ स्वभावदुष्टवाक्यानि विप्रियाण्येवभाषते॥
अपेतरागास्त्वानारीखरसत्वातुसास्मृता॥९०॥ स्वभावेति॥ यादिप्रियाण्यप्रियाण्येवस्वभावेनदुष्टानिच
तानिवाक्यानिभाषते॥ स्त्रानारीअपेतोरागःप्रीतिर्यस्याएवंभूतेतिपूर्वोन्वयि॥ सातुखरसत्वागर्दभस्वभावा
स्मृतेति॥९१॥ जातिसत्वादयेप्येतुनारीणामत्रभाषिताः॥ प्रधाना प्रकृतिर्ज्ञेयातेषुसर्वेषुपंडितैः॥९२॥ जाती
ति॥ अत्रास्मिन्ग्रंथेप्रकरणेवायेतुनारीणांजातिसत्वादयोजातिस्वभावादयोभाषिताःकथिताः॥ पंडितैःस

तेषु प्रधाना मुख्या प्रकृतिर्ज्ञेया॥ सर्वत्र प्रकृतेरुपयोगादिति भावः॥ २०॥ अथ स्त्रीणां नाशहेतुरुच्यते॥ अत्र नाशः
सन्मार्गात्तत्प्रच्युतिः तस्य हेतुः कारणं। उच्यते कथ्यते॥ पितृसदननिवासः संगतिः पुंश्चलीभिः प्रवसनमथ प
त्युर्वार्धकं सेव्यते तास्य॥ वसतिरपि च पुंभिर्दुष्टशीलैस्स्ववयस्यसंस्थितिरपि निजवृत्तेर्योषितां नाशहेतुः॥१॥ पितृसद
नेति॥ पितृसदननिवासः॥ स्वजनकवेश्मसंस्थितिः अवरूपमेव जितां स्त्रीणां नाशहेतुर्नाशकारणं भवति॥ ए
वं सर्वत्र पृथक्पृथक्योजना॥ पत्युर्भर्तुः प्रवसनं देशान्तरगमनं॥ सेव्यते तात्स्त्रीभिर्वैशिष्ट्यमिस्पर्धः॥ नि
जवृत्तेः स्त्रीपतिहृतस्य शीलनाशादिति॥१॥ अथ वैराग्यहेतुः स्पष्टः॥ कार्पण्यारतिमानरोगविरहो योगादिपा
रुष्यनीमालिन्यासमयज्ञतादिभयतः रोषाद्दरिद्रादपि॥ भर्तॄणां तनुतादिभिश्च वपुषः कालिन्यतः शंकना

४२ दोषाणां वृष्ट्या प्रयाति वनिता वैराग्यमुच्चैस्तरां ॥२॥ कार्पण्यादिति ॥ वनिताः स्त्रियः भर्तॄणां कार्पण्यात् कृपण
त्वात् अतिमानो ऽलंताभिमानः स चरोगश्च विरहश्च उद्योगो निरंतरं कार्यांतरविषयकः प्रयत्नः स आदिर्यस्य
स च ॥ आदिशब्देन भवानिषेधः ॥ तदुक्तं पारुष्यं कठोरत्वं ॥ निर्दयत्वमिति यावत् ॥ तस्मात्संचयस्मात् सिल ॥ मा
लिन्यं मलिनत्वं असमयदर्शनादि ॥ रतिकाले शरीरादि ॥ आदिशब्देन विवेकस्याल्पत्वं तदुक्तं भयं तस्मादिति तासिल ॥
दरिद्रादिति भावप्रधाननिर्देशः ॥ वपुषस्तनुतादिभिः कृशत्वादिभिः ॥ आदिशब्देन काणत्वादिकं ग्राह्यं ॥ तस्यैव का
ठिन्यतः कठिनस्पर्शत्वात् ॥ वध्यादोषाणां व्यभिचारिणीत्वादीनां शंकनात् शंकया ॥ सर्वे प्रभर्तृणामिदस्यपो
जना ॥ उच्चैर्महत्वैराग्यं रतिविषयकाभिलाषराहित्यं प्रयांति ॥ प्राप्नुवंति ॥१॥ अथ विरक्तालक्षणानि ॥ अथा ४ः

नेतरं विरक्तानां लक्षणानि चिह्नानि तानि कथ्यंते इति शेषः॥ नाभिनन्दति भर्तारं नोत्तरं संप्रयच्छति॥ वियोगे
सुखभाक्षोतिसंयोगे चातिसीदति॥१॥ अथ श्लोकद्वयेन विरक्तचिह्नान्याह॥ नाभिनन्दतीति स्पष्टोर्थः॥ श
य्यामुपगतायां तेन दत्तं माष्टिं चुंबितं॥ तन्मित्रैर्दृष्टिमानं च विरक्ता नाभिवांछति॥२॥ शय्यामिति॥ विरक्ता श
य्यामुपगता प्राप्ता सती शेते तस्मीमेव निद्राति॥ किंचिद्व्याजणाद्रिकं न विदधातीत्यर्थः॥ भर्त्रा चुंबितं च दत्तं स्वमु
खं मार्ष्टि चैलांचलेन परिमार्जति॥ तन्मित्रैः स्वामिसुहृद्भिः सह दृष्टिं॥ मानं तेन क्रियमाणं दिनादरं सत्कारं
च न वांछतीति नेच्छति॥२॥ अप्रीतिरुच्यते॥ स्पष्टं॥ नैसर्गिकी विषयजा सममाचाभ्यासिकी तथा॥ चतुर्विधेति
विद्वद्भिर्दंपत्योः प्रीतिरुच्यते॥१॥ नैसर्गिकीति॥ विद्वद्भिर्नैसर्गिकी विषयजा सममा आभ्यासिकी चेति चतुर्विधा दं

४३

पत्योः प्रीतिरुत्पत्तेकथ्यते ॥१॥ अभ्यासजातदुःसाध्या दंपत्योः सहजा तु या ॥ सांद्रा निगडभूता च प्रीतिर्नैसर्गि
की मता ॥२॥ अभ्यासेति ॥ या तु दंपत्योः प्रीतिः अभ्यासजातेनाभ्याससमुदायेन दुःसाध्या दुःखेन साधयितुं श
क्या सहजा सांद्रा ॥ निगडभूता अंदुकभूता तत्तुल्ये स्पर्धेः ॥ अन्योन्यविरहासहनमन्ते असामर्थ्यदेति यावत् ॥ स्या
त् सा प्रीतिर्नैसर्गिकी मतेति ॥२॥ मालाचंदनभोज्याद्यैर्विषयैर्वर्धिता तु या ॥ प्रीतिर्विषयजा प्रोक्ता समयोगे स
मास्मृता ॥३॥ मालेति ॥ या तु प्रीतिर्मालाचंदनभोज्याद्यैर्विषयैर्वर्धिता ॥ सा प्रीतिर्विषयजा प्रोक्ता कथिता ॥
सा समयोः पूर्वोक्तजात्यादिभिस्तुल्ययोः योगे सा तेसमास्या दृति ॥३॥ आरवेटदेवपूजादि केलिसंगीतकर्म
सु ॥ अभ्यासयोगाद्या वृद्धिं याति साभ्यासिकी मता ॥४॥ आखेटेति ॥ आखेटो मृगया । शेषं सुगमं ॥ एतत्संम

४३

तिस्त्राणि प्रागेव लिखितानि ॥४॥ अथ भोजनादिव्यवस्था ॥ सुगमं ॥ भोजनं द्विगुणं स्त्रीणां बुद्धिः कृत्स्नेव चतुर्वि
धा ॥ निश्चयः षड्गुणः पुंभ्यः कामवेगस्तथाष्टधा ॥५॥ भोजनमिमिति ॥ स्पष्टोर्थः ॥५॥ अथ योनिस्वरूपं ॥ स्पष्टो
र्थः ॥ योनिरभ्यंतरे कापि पद्मविं जल्पकोमला ॥ कापिस्था त्रुटिकाकीर्णा काचिद्वलिनपाकुला ॥६॥ योनिरि
ति ॥ अभ्यंतर इति सर्वत्र योज्यं ॥ शेषं सुगमं ॥६॥ गोजिह्वाखरसंस्पर्शा काचिदभ्यंतरे भवेत् ॥ पर्वपर्वाद्यत
स्तासु श्रेष्ठा ज्ञेया पाक्षिकस्थले ॥७॥ गोजिह्वेति ॥ तासु त्रिविधयोनिषु रोवं स्पर्शं ॥७॥ ना ॥१०॥ योनिमध्येस्ति
नाडी एका कामांकुरा समाहिता ॥ लिंगेन क्षोभिता चैव मदवारि निरंतरं ॥१०॥ योनीति ॥ योनिमध्ये एका कामां
कुरा समा मदनस्यणि तुल्या नाडी अस्ति सैव लिंगेन क्षोभिता सती निरंतरं मदवारि कामसलिलं कामातपत्राद

वयवश्रिोपात् स्त्वजतीस्फुत्तरेणान्वयः॥१०॥ कामातपत्रात्सलमित्रिसर्वं दइति कीर्त्यते॥ वरांगरंध्रादूर्ध्वंतु नासि
काभपरस्थितम्॥११॥ कामेति॥ सकामसलिलसर्गः स्यंदइति कीर्त्यते अभिधीयते॥ वरांगरंध्रात् योनिरंध्रा
त् ऊर्ध्वं नासिकाभं नासातुल्यं परस्थितं तत् मदनशिरात्वपैरात् दर्पं मन्मथच्छत्रमित्याहुरित्युत्तरेणान्वयः॥११॥
मन्मथच्छत्रमित्याहुः दर्पं मदनशिरात्वपैः॥ योनिरंध्रेनातिदूरात् पूर्णचंद्रादिनाडिका॥१२॥ मन्मथेति॥ स्त्रीणां
योनिरंध्रेनातिदूरात् समीपेनातिदूरेति पाठसमीपवर्तिनी॥ पूर्णचंद्रा पूर्णचंद्रासंज्ञको नाडिका॥ तिष्ठतीत्यु
त्तरेणान्वयः॥ एते श्लोकाः पुस्तकांतरे स्यात् इत्येवं पठिता स्तल्लापनाप्रकारस्तु गमनान्त्वप्रदर्शीनइति॥१२॥
मनोजवारिसंपूर्णा स्त्रीणां तिष्ठति सर्वदा॥ तद्विस्पष्टा द्रुता नारी प्रोच्यते पवेसरिभिः॥१३॥ नारी स्त्री द्रुते स्फुच्यते॥

पि

(८६)

॥१३॥ अथाल्पसाध्योच्यते॥ रंगादिश्रीं तदेहा चिरविरहवती मासमात्रप्रसूता गर्भालस्या च नव्यज्वरयुततनु
कान्यऋतुमानप्रसंगा॥ स्नाता पुष्पावसाने नवरतिसमये मेघकाले वसंते प्राप्तः संपर्कशास्त्रम् गशिशुनयनास्व
ल्पसाध्या स्यात्॥१४॥ रंगादीति॥ रंगोत्सवभूमिस्तत्रादौ श्रीं तां देहो यस्यास्तथाभूता॥ आदिशब्देन जल
क्रीडास्थानादि ग्राह्यं॥ मृगशिशुनयना योषिता एते स्वल्पसाध्या स्यात्॥ शीघ्रं द्रवं प्राप्नोति इत्यर्थः॥ एवं सर्वत्र
पृथक्पृथक् योजना॥ चिरविरहवती॥ बहुकालं विरहिणी इत्यर्थः॥ मासमात्रप्रसूता॥ प्रसवान्मासपर्यंतं पुरु
षसंगात्त्वरितं द्रवती इत्यर्थः॥ गर्भालस्या॥ षाण्मासिकगर्भजन्यालस्यवती इत्यर्थः॥ नव्यज्वरेण नूतनज्वरेण युता
तनुर्यस्यास्तथाभूता॥ ऋतौ मानप्रसंगो यस्याः॥ तत्काले प्रोज्झितमाने इत्यर्थः॥ पुष्पावसाने स्नाता॥ ऋतुस्ना

नेत्यर्थः॥ नवरतिसमये। नवीनरतिकाले। मेघकाले। प्रावृषि। वसंते। प्राप्नोतीव। संपर्कसंसर्गरागोपस्या
स्त्वयाभ्यतां चेति॥१४॥ कंदर्पयुद्धे प्रथमेल्पभावाश्चिरेण तृप्तिं वनिता लभंते॥ शीघ्रं द्वितीये धृतभूरिभावाः
पुंसः क्रमोयं विपरीतउक्तः॥१५॥ कंदर्पेति॥ वनिताः प्रथमे कंदर्पयुद्धे सुरते चिरेण चिरकालेन तृप्तिं लभंते।
किंभूताः। अल्पो भावो रसो यासामिति हेतुगर्भं विशेषणं॥ ताः द्वितीये तस्मिन् शीघ्रं तृप्तिं लभंते॥ धृतभूरिभा
वा इति पूर्ववद्विशेषणं॥ पुंसोयं क्रमो विपरीतउक्तः॥ पुमान्प्रथमे सुरते कामातिशयेन शीघ्रं रेतःस्त्रावात्क्षि
प्रं तृप्तिं॥ स एव द्वितीये तस्मिन् तन्मतत्त्वेन चिरेण तत्स्त्रावात् बहुकालेन तृप्तिमित्यर्थः॥१५॥ अथ सुर
ताभिलाषचिन्हानि॥ योषिल्लिङ्गानि धुवनेच्छाचिन्हानि॥ प्रोक्तं सुगमं॥ संगच्छास्वलकान्मुहुः स्तनयुगं नखेन

नाभ्यारये इंते नाप्यधरं दशोच्छ्र विरमे स्तेस्तज्यलज्जाक्षणं ।। प्राप्य श्रुंबति नाल्कं निजवपुः संभज्यते जंभते र
ध्यांत्याधिपूलं दुःपश्यति च हो मूर्द्ध्नेहस स्वा हरात् ।। ६ ।। संगृह्णाल्कानिति ।। बुधजनैर्नारीणामिप्सेवं प्र
कारैर्भावैस्तासां सुरतस्पृहा लेपेति श्लोकद्वयान्वयः ।। इतीति किं ।। स्त्री मुहुः अलकान्केशान्संगृह्णाति ।।
निजवपुः संभज्यते। गात्रविजृंभणं करोती स्त्रियः ।। जंभते मुखविजृंभणं विदधती स्त्रियः ।। शेषं सुगमं ।। ६ ।। अ
लिंगे स्वसखीं प्रियं प्रलपति प्रस्फुत्तरंभा घेते प्रश्नकेतन च भाषते स्मितमुखी व्रीडां व्याधारयेत् ।। व्याजेनै
व विलंबते प्रकुरते मौलौष्ठकं हूमनं नारीणां सुरतस्प्रहा बुधजनैर्ज्ञेये ति भावैः सदा ।। ८ ।। आलिंगेदिति।
स्वसखीमालिंगेत्। प्रियं भर्तारं प्रलपति ।। निर्ध्येवं भाषणं करोती स्त्रियः ।। तस्मात्सहस्रातुरं प्राप्नुते। सार्थे पते।

४६

प्रपतंत्स्य हंनमावते॥ स्मितमुखी सती व्रीडं वृथा धमयेत॥ धरति॥ व्याजेन मिषविषयेनैव विलंबते विलं
बनं नैव करोती स्पर्श॥ केन चिद्व्याजेन विलंबते आलिंगती स्पर्श इति वा॥ चमैत्स्तोकं इपते कं दूयनं कुरु
त इति॥ ७॥ इत्यनंगरंगव्याख्यायां चतुर्थस्थल व्याख्या॥ अथ वनितानां देशधर्मोऽभ्यते॥ स्पष्टार्थः॥ वि
चित्रवेषाशुचि कर्मदक्षा सुशिल्पिनी दंतनखातिरक्ता॥ मनोजसंग्रामविनोदरागा स्यान्मध्यदेशप्रभ
वा पुरंध्री॥ १॥ विचित्रेति॥ मध्यदेशप्रभवा पुरंध्री एवंविधा स्यादित्यन्वयः॥ दंतनखेष्वतिरक्ता आतिनो हि
तदंतनखदेशस्पर्शः॥ मनोजसंग्रामविनोदरागा मैथुनाति सक्ते सर्पः॥ शेषं सुगमं॥ १॥ उपभोगकलासु रागि
णी स्थिरसंभोगरसप्रतोषिणी॥ करघातनतुष्टमानसा वनिता मालवदेशसंभवा॥ २॥ उपभोगेति॥ मालव

४६

देशसंभावावनिता एवंविधास्यादित्यन्वयः ॥ करघातने नखस्यमाज्ञ ताडनेन तुष्टं मानसमस्यास्तथा भूतारो
चंस्पष्टं ॥ २ ॥ अभिघातस्त्विविरुज्यते नखदंतैः परिरंभलालसा ॥ बहुचुंबन हृष्टमानसा वनिताभीरससुद्
वाम्मता ॥ ३ ॥ अभिघातेति ॥ अभीरसमुद्रूधा वनिता एवंविधास्मृतेत्यन्वयः ॥ नखदंतैर्विरुज्यते । नखदंताभि
घातैर्विरागं प्राप्नोती सर्पेः ॥ किं भूता ॥ अभिघातेस्त्वि प्रीतिर्पेस्यास्तथा भूता ॥ शेषं स्पष्टं ॥ ३ ॥ परिरंभणलाल
सा रद्दक्षत घातैर्द्रवमेति सत्वरं ॥ सुकुमारतनू र्मनोरमा सुरतेनत्पगिलाटकामिनी ॥ ४ ॥ परिरंभणेति ॥ लाट
कामिनी रदक्षतानि दंतक्षतानि तथुक्ताघातास्ताडनानितैः ॥ ० ॥ सत्वरं शीघ्रं द्रवमेति प्राप्नोति सुरतेन त्पगिरो
चंस्पष्टं ॥ ४ ॥ मृ हीदुराचाररतानहंतीरता निमुच्चैरदिनर्मदृष्टा ॥ त्रपाविहीनातिमनोरमांगीस्याद्रांध्रकर्णाट

८०

भवापुरंध्री॥ ५॥ नितांतकंडूतिपुतस्मरालयाद्रवंतिचंडध्वजघातनाश्चिरं॥ रतिप्रयोगेचतुराश्चयोषितः प्रकी
र्तिताः कोशलराष्ट्रसंभवाः॥ ६॥ नितांतेति॥ कोशलराष्ट्रसंभवायोषित एवंविधाः प्रकीर्तिताइत्यन्वयः॥ नितांतं
कंडूत्यापुतःस्मरालयोगुह्यंयासांतथाभूतास्ताश्चंडध्वजेनदृढतरलिंगेनघातनात्चिरंचिरकालेनद्रवंति॥ शो
र्भस्पृष्टं॥ ६॥ इयद्वासमनोरमाश्चनितरांसाक्षेपवाग्विभ्रमानिर्लज्जाश्चपल्वाःफलासुकुशला गाढानुरागान्विताः
॥ नार्यः पाटलिपुत्रजा अपिमहाराष्ट्रोद्भवाः संततंनानावेषविनोदभावरसिकाः संकीर्तिताः पंडितैः॥ ७॥ इयदिति।
पाटलिपुत्रजाः पाटलिपुत्रंपट्टनेतिप्रसिद्धनगरंतत्रजातानार्यः॥ महाराष्ट्रजाः महाराष्ट्रदेशोत्पन्नाअपिनार्यएवंवि
धाः संकीर्तिताः कथिताइत्यन्वयः॥ नानावेषापस्मिंल्लेवंभूतोविनोदः क्रीडायस्मिंस्तथाभूतोभावः शृंगारस्त

८०

स्मिन्नसकाः॥ शेषं सुगमं॥ ७॥ कुसुममकुरुमीराद्युं बनालिंगनाहो बकुलरधृतभावा क्रूरचेष्टा विरक्ता॥ विषम
विशिखपुद्धैस्तो कवेगापुरंध्री भवति तरलैदृगा वंगजा गौडजास्च॥ ७॥ कुसुमेति॥ वंगजा वंगदेशोत्पन्ना गौडजा
गौडदेशोत्पन्ना च पुरंध्री स्त्री एवंविधा भवती सुलभः॥ चुंबनारो बकुंतरं धृतभावो भिन्नापोपयेसेवं भूता॥ क्रूरा
चेष्टा यस्यास्तथाभूता॥ विरक्ता॥ विषमविशिखः कामस्तद्युद्धे सुरतेस्तो कवेगाल्पवेगा॥ शेषं सुगमं॥ ७॥ वि
परीतरता भिलाषिणी गतलज्जानखदाननतोषिणी॥ नितरामनुरागशालिनी मदनार्त्ता कथिते यमुत्कली॥ ९॥
विपरीतेति॥ इयं बुद्धिस्था॥ स्वदेशोत्पन्ना हारयामिति निर्देशः॥ उत्कल्युत्कलदेशोत्पन्ना स्त्री एवंविधाक
थिते स्पन्वयः स्पष्टोर्थः॥ १०॥ प्रियंवदा कोमलदेहवल्ली भर्त्रां द्रवंती स्मरकेलिरंगे॥ विलासदक्षा प्रचुरानुरागा

स्यात्कामरूपप्रभवा पुरंध्री ॥१०॥ प्रियंवदेति ॥ कामरूपप्रभवा । कामरूपाख्यदेशोत्पन्ना पुरंध्री एवंविधा स्यादित्यन्वयः ॥ शेषं सुगमं ॥१०॥ निजदोषनिगोपनेरताः परदोषग्रहणेषु तत्पराः ॥ वनिता वनवाससंभवा दृढदेहाः परिकीर्तिता बुधैः ॥११॥ निजेति ॥ बुधैः । वनवास अरण्यवसतौ संभवंतीत्येवंभूता वनिताः किरातादिस्त्रिय एवंविधाः परिकीर्तिता इत्यन्वयः ॥ निजदोषगोपने स्वीयदोषाच्छादने रतास्तत्पराः शेषं सुगमं ॥११॥ प्रचंडवेगा अतिकष्टसाध्याः सुकोपाः स्खलने प्रपाताः ॥ भवंति दुष्टाः किल सिंधुजाता अवंतिवाल्हीकभवाश्च नार्यः ॥१२॥ प्रचंडेति ॥ सिंधुजाताः सिंधुदेशोत्पन्ना अवंतिजा वाल्हीकभवाः अवंतिदेशोद्भवा वाल्हीकदेशोद्भवाश्चेत्सर्वाः ॥ नार्य एवंभूता भवंतीत्यन्वयः प्रचंडो वेग उत्कटलक्षणो यासां ताश्चाभूताः शेषं सुगमं ॥१२॥ उपभोगरतासु

लोचना लघुसंभोगविधिप्रतोषिणी ॥ शुभवेषधराविचक्षणा कथिता सा खलु गुर्जरी जनैः ॥१३॥ उपभोगेति ॥
जनैः सा प्रसिद्धा गुर्जरी एवंविधा कथिता सौरव[illegible]ल्वित्यन्वयः ॥ शेषं सुगमं ॥१३॥ नानोपभोगरसिका रतिरंगद
क्षा प्रोत्फुल्लपद्मनयना प्रियबद्धरागा ॥ कंदर्पदीपपरिदीपनभावशीला ज्ञेया बुधैर्मधुरगीः खलु तीरभुक्तिः ॥१४॥
नानेति ॥ बुधैस्तीरभुक्तिस्तीरे भुक्तिर्भोगो यस्याः समुद्रतीरवासिनी स्त्र्यर्थः ॥ एवंविधा ज्ञेयेत्यन्वयः ॥ शेषं सुग
मं ॥१४॥ संभोगशिक्षाकुशलाः सलज्जाः प्रियोपभोगा अतिचंडवेगाः ॥ मनोरमाः पुष्पपुरे प्रसूताः स्युरंग
ना मद्रकलिंगजाख्याः ॥१५॥ संभोगेति ॥ पुष्पपुरे पुष्पाख्यनगरे प्रसूताः मद्रकलिंगजाख्या मद्रजाः कलिं
गजाश्चेत्यर्थः ॥ अंगनाः स्त्रिय एवंविधाः स्युरित्यन्वयः ॥ शेषं स्पष्टं ॥१५॥ मध्याः सुवाच्यो लघुभोगसाध्याः

ससाहसावीतभयत्रपाश्च॥ समानरूपाद्रविडे प्रजाताः सौवीरभेदे मलयेच नार्यः॥ ७६॥ मृद्व्य इति॥ द्रविडे
च सौवीरभेदे च मलये प्रजाता नार्यः समानरूपाः स्युरित्यन्वयः॥ शेषं स्पष्टं॥ ७६॥ नखादिविन्यासकलावि
हीनाः संभोगसंमर्दनजाततोषाः॥ स्वभावतो दुष्टतमाः प्रचंडाः कांबोजपौंड्रप्रभवाः पुरंध्र्यः॥ ७७॥ नखादीति।
कांबोजपौंड्रप्रभवाः कांबोजदेशोत्पन्नाः पौंड्रदेशोत्पन्नाश्च स्त्रियः॥ पुरंध्र्यः स्त्रियः एवंविधाः भवंतीत्यन्वयः॥ नखा
दिविन्यासानां याः कलास्ताभिर्विहीनाः॥ प्रचंडा अतिक्रूराः शेषं स्पष्टं॥ ७७॥ दुर्गंधिगात्रा लघुभोगतुष्टाः सं
चुंबनाश्लेषणभावहीनाः॥ म्लेच्छांगनाः पर्वतजाश्च नार्यो गांधार्यश्च काश्मीरभवास्तथैव॥ ७८॥ दुर्गंधीति॥
म्लेच्छांगनाः पर्वतजाः च गांधार्यस्तद्देशोत्पन्नाः काश्मीरजाः काश्मीरदेशोत्पन्नाश्च नार्य एवंविधाः संतीत्यन्व

पः ॥ चुंबनाश्लेषणभावहीनाः चुंबनाश्लेषविषयकाभिलाषरहिता इत्यर्थः ॥ शेषं स्पष्टं ॥ १८ ॥ आस्यादि सा
म्यमिति तत एव यस्तु ज्ञाता नरः स कलाकामकलाप्रवीणः ॥ संतोषयेत्सततं सुरतप्रयोगैः मानैः समत्वमुप
याति सकामिनीनां ॥ १८ ॥ अथेदानीं आस्यादि निरूपणस्य फलमाह ॥ आस्यादीति ॥ यस्तु नर इत्थं एवंप्रकारेण आस्या
दीनां जातिस्वभावदेशधर्मादीनामुभयनिष्ठानां साम्यं समर्थं ज्ञातवत एव याप्याप्यर्थे नैवज्ञाता सुरतप्रयोगैः स
ततमनिशं संतोषयेत् ॥ स्त्रियमिति शेषः ॥ स पुरुषः कामिनीनां योषितां प्राणैः समत्वमुपयाति ॥ तासां प्रीत्याश्च
यो भवतीत्यर्थः शेषं स्पष्टं ॥ १९ ॥ इत्यनंगरंगव्याख्यायां पंचमस्थलव्याख्या ॥ अथ द्राविडादिविधिः प्रोच्यते ॥
अथ देशधर्मनिरूपणानंतरं शेषं स्पष्टं ॥ प्रागेव पुंसः सुरतेन पायन्नारीं द्रवेद्योगफलं न तावत् ॥ अतो बुधैः

५०

कामकलाविदग्धैः कार्यः प्रयत्नो वनिताद्रवत्वे ॥१॥ अथ वक्ष्यमाण द्रावणविधेः प्रयोजनमाह ॥ प्रागेवेति ॥
यावत्तन्नारी कर्त्री सुरते पुंसः प्रागेव न द्रवते तावत् भोगफलं नेति योजना ॥ अतः कामकलाविदग्धैर्बुधैर्व
निताद्रवसंयोग विते द्रवत्वे विषये प्रयत्नः कार्यः कर्तव्य इति ॥१॥ आस्यादिसाम्यं दुर्ज्ञेयं साकल्यादिविशे
षतः ॥ अतएवाति सौक्ष्म्यात्स्यं कलापीठे गोचरः ॥२॥ आस्यादीति ॥ अथ आस्यादिसाम्यज्ञानपूर्वकं सुरता
चरणे सति स्त्रीणां पुरुषः प्रियो भवतीति प्रागुक्तं तत्र आस्यादिसाम्यं साकल्यादि विशेषतः ॥ अन्योन्यधर्मा
णामन्योन्यस्मिन्समावेश इत्यादीनां विशेषत्वस्मादिति तत्सिद्धं ॥ दुर्ज्ञेयं दुःखेन ज्ञातुं शक्यं ॥ अतएव तस्य
दुर्ज्ञेयत्वात् अतिसौक्ष्म्यात्छेदोः कलाप्यगोचरा अप्रत्यक्षास्तीति ॥२॥ तस्माल्लोकहितार्थाय दंपत्योः सु ५०

स्वस्ति हृये ॥ नानौ षधविधानेन द्रवयुक्तिरुदीर्यते ॥ ३ ॥ तस्मादिति ॥ द्रवयुक्तिरूपयोगः शाब्दस्पष्टं ॥ ३ ॥ मधुना
सहितं व्योषाचूर्णं यस्या वरांगके ॥ निक्षिप्यते न तां गीसा पुंसः प्राक् द्रवतीं व्रजेत् ॥ ४ ॥ अथ द्रावणप्रकारं
श्लोकसप्तकेनाह ॥ मधुनेति ॥ व्योषाचूर्णं ॥ शुंठी मरिचं पिप्पली ति त्रिकटु चूर्णं वरांगके गुह्ये शेषं स्पष्टं ॥
॥ ४ ॥ शुद्धं शंकरबीजं च जातीरसविमर्दितं ॥ वरांगमध्ये निक्षिप्तं नारी संद्रावयेद्द्रुतौ ॥ ५ ॥ शुद्धमिति ॥ शंकर
बीजं पारदः ॥ जातीशब्देन मालती ग्राह्या ॥ सुमनामालतीजाती इत्यमरः ॥ स्पष्टोऽर्थः ॥ ५ ॥ चिंचीफलं च सिं
दूरं माक्षिकेन समन्वितं ॥ क्षिप्तं गुह्यांतरे योषां मागे वद्द्रवतां नयेत् ॥ ६ ॥ चिंचेति ॥ चिंचा फलमक्षिका
दूरं माक्षिकेन समन्वितं ॥ क्षिप्तं गुह्यांतरे योषां मागे व द्रवतां नयेत् ॥ ६ ॥ चिंचेति ॥ चिंचा फल मक्षिका

फलं ॥ सिंदूरं प्रसिद्धं तत्सहितं ॥ माक्षिकेन मधुना योषां स्त्रियं स्पष्टोऽर्थः ॥ ६ ॥ कर्पूरं टंकणं शिशुबीजं च

५९

ति त्रिभिः समः ॥ सक्षौद्रैर्लिहेल्लिंगस्तु नरः संद्राक्ये स्त्रियं ॥७॥ कर्दरमिति ॥ टं॰ कूर्णं सुहागा । महाराष्ट्रभाष
या सागीति प्रसिद्धं ॥ समैः समभागैः सक्षौद्रैर्मधुसहितैः शेषं स्पष्टं ॥७॥ मध्याज्यागस्ति पत्रोत्थ रससंम
र्दितेन च ॥ टं॰ कृष्णेन ध्वजं लिहाद् द्राक्ये पदं बलाॅनरः ॥८॥ मधिति ॥ अत्र अगस्तिशब्देन भाषया हेटी हदगे ति
च प्रसिद्धो वृक्षो ग्राह्यः ॥ टं॰ कृष्णेन सर्वोज्ञेन ध्वजं लिंगं ॥ शेषं स्पष्टं ॥८॥ जीर्णो गुडः श्रंखिणिका फलं च प्यो
पारजः क्षौद्रयुतं समांशकं ॥ एभिर्ध्वजं यः परिलिप्य रोते कुर्यात् स्त्ररेतः स्तुति मंगनानां ॥९॥ जीर्णो गुडइ
ति ॥ चिंचिणिका फलं आम्लिका फलं पीपारजा स्त्रिकटु चूर्णं ॥ क्षौद्रशब्देन मधु लोध्र युतमिति पाठे ॥ लोध्र
शब्देन लोध्र इति प्रसिद्धस्य ग्रहणं ॥ समांशं समभागं शेषं स्पष्टं ॥९॥ मरिचकनककबीजैः पिप्पलीक्षौद्रयुक्तै

५९

श्चपलमधुविमिश्रैर्मीनवो लिहलिंग॥ स्मरसदनविलासे कल्पसाध्यां च नारीमपगतमदरागां संविदध्या
द्वसंतं॥७०॥ मरिचेति॥ अत्र मरिचशब्देन मिरे इति प्रसिद्धं ग्राह्यं॥ मरिचं कटु तिक्तोष्णं लघु श्लेष्मविनाशा
नं॥ समीरकृमिहृद्रोगहरं च रुचिकारकमिति वैद्यनिघंटौ तद्गुणोक्तेः॥ कनकबीजशब्देन धत्तूरबीजग्रह
णं॥ धत्तूरः कनकाह्वय इत्यमरकोशाभिधानात्॥ पिप्पली प्रसिद्धा॥ पिप्पली स्वरहा तस्मात् स्निग्धोष्णा
कटुतिक्तिका॥ दीपनी मारुतश्वासकासश्लेष्मज्वरापहेति वैद्यनिघंटूक्तेः॥ क्षौद्रशब्देन रिंगिणी॥ म्ल
लादिकं क्षुद्रा व्याघ्री निदिग्धा च धावनी कंटकारिकेति निघंटुः॥ चपलशब्देन पारदः॥ मधुशब्देन माक्षि
कं ग्राह्यं॥ स्मरसरससुविलास इत्यपि पाठः॥ मैथुनसमय इत्यर्थः॥ सर्वत्रान्वयप्रयोजनास्पष्टत्वेति न प्र

५२

दर्प्यत इति॥ १०॥ अथ स्तंभनविधिः॥ वीर्यस्तंभनप्रकारः॥ पतनात्मदनांभसस्त्वरापरितोषो न भवेद्वि लासिनीनां॥ सुरतोत्सवसिद्धिहेतवे तस्य स्तंभविधिर्निरूप्यते॥ ११॥ पतनादिति॥ त्वरात्वरस्मान्मदनांभसः पुरुषरेतसः पतनात् विलासिनीनां परितोषो न भवेत्॥ तत्तस्मात्सुरतोत्सवसिद्धिहेतवे अर्थस्तंभविधिः वीर्यस्तंभनप्रकारो निरूप्यते वर्ण्यते॥ ११॥ लज्जालुमूलं गोक्षीरे वेश्रीक्षीरेण वा पुनः॥ पिष्ट्वास्वपादौ संलिप्य चिराद्वीर्यं न मुंचति॥ १२॥ लज्जालुवितिलज्जालुमूलं लाजालूइति प्रसिद्धायाः मूलं गोक्षीरे गोदुग्धे वा पयावल्लीक्षीरेण उत्तरस्थभाषया — हीति प्रसिद्धस्य महाराष्ट्रभाषया निवडुंग इति ख्यातस्य स्नुहिवृक्षस्य दुग्धेन॥ स्नुहिस्सोहंडली ह फड्डुवा तत्प्रमेहनुत्॥ क्षीरं वातविबाधमान गु ५

ल्मोद्दरहरं प्रियमिति निघंटूक्तेः पिष्ट्वा तिलोऽम्दशो बंस्पर्शं ॥२॥ अथ कौसुंभतैलेन वर्षाभू रजसापि वा
॥ लिप्त पादाः पुमांस्त्रैतोन जहाति रते वरां ॥३॥ अथेति ॥ कौसुंभतैलेन कुसुंभजस्नेहेन ॥ ज्ञेयोऽरण्य कु
सुंभस्यात् कौसुंभश्चाग्निसंभवः ॥ कौसुंभः कटुकः पाके श्लेष्महृद्दीपनश्च सर इति निघंटुः ॥ वर्षाभूरज
सा ॥ वर्षाभूः पुनर्नवा भाषया पांढरीवसु इति प्रसिद्धा तच्चूर्णेन । वर्षाभूस्तु कोदर्णकफमांद्यानिलाप
हो ॥ शोथेरूक्षतरो गुल्मप्लीहश्लेष्मापहारका वितिवैद्य निघंटुः ॥ वराः स्त्रः रमेति शेषं स्पष्टं ॥३॥ सितायाः
काकजंघाया मूलं मूलं भवेत — केसरं ॥ क्षौद्रेण नाभिसंलेपाद्वीर्यस्तंभति कामिनः ॥४॥ सितायाइति
॥ सितायाः श्वेतायाः काकजंघायाः कांगइति प्रसिद्धायाः मूलं ॥ काकजंघा तु तिक्तोष्णा कृमिव्रणक

५३

फापहा॥ नाधिर्याजीर्णज्वरजीर्णविषमज्वरहारिणीति निघंटुः॥ श्वेताजकेसरंशुभ्रकमलकिंजल्कः॥ किंजल्कः केसरोऽस्त्रियामित्यमरः॥ शेषं सुगमं॥४॥ शंपाकः शंभुवीजं तु कर्दसंयसमो शाकं॥ मधुनालेपयेन्नाभौ यः सवीर्यं न मुंचति॥५॥ शंपाक इति॥ शंपाको भाषया वाव्हा इति प्रसिद्धः॥ शंपाकचतुरंगुलाः॥ आरेवतव्याधिघातकृतमालसुवर्णका इत्यमरः॥ शंभुवीजं पारदः॥ शेषं स्पष्टं॥५॥ सितकोकिलनाम्नश्च वीजं पुष्यो द्धृतं करे॥ वद्धं लोहितसूत्रेण वीर्यस्तंभं करोत्यलं॥६॥ सितेति॥ सितकोकिलनाम्नस्तालिमखानारति प्रसिद्धस्य॥ पुष्योद्धृतं पुष्यनक्षत्रे उद्धृते॥ शेषं स्पष्टं॥६॥ सप्तपर्णस्य वीजं तु रविवारे समुद्धृतं॥ वक्त्रे धृत्वा नरो वीर्यं स्तंभयेत्सुरते स्थिरं॥७॥ सप्तेति॥ सप्तपर्णस्य सतनर इति प्रसिद्धस्य॥ सप्तपर्णो विशालत्वक् शारदो विषमच्छद इत्यमरः॥

५३

शेषं स्पष्टं ॥ ७ ॥ श्वेतेषुपुंखामलं तु पुष्पेर्कै नाप्पयं कटे ॥ कन्याकर्त्तितसूत्रेण बध्नाति सभजे चिरं ॥ ८ ॥ श्वेतेषुवि
ति ॥ श्वेतेषुपुंखामलं ॥ शुक्लशरपुंखा उन्हाळीति प्रसिद्धा ॥ तन्मूलं ॥ शरपुंखाकरू हरणा चरुभिवातरुजापहा ॥
श्वेता द्वितीया गुणाढ्या स्यात् प्रशस्ता च रसायन इति निघंटुः ॥ कन्याकर्त्तितसूत्रेण ॥ कन्यया कुमार्या कर्त्तितं कार्पा
निर्मितं पंचविंशो येणोत्पादितं यत्सूत्रं तेन ॥ शेषं स्पष्टं ॥ ९ ॥ बीजं सितपिकारव्दस्य नरक्षीरेण पेषितं ॥ करंजबी
जमध्यस्थं स्तंभनं वदने धृतं ॥ १० ॥ बीजमिति ॥ सितपिकारव्दस्य तालिमखाना को क्साइति च प्रसिद्धस्य ॥ वट
क्षीरेण वटदुग्धेन ॥ करंजबीजस्थं करंजीति प्रसिद्धबीजस्य मध्येति स्थितं तिष्ठत्याभृतं ॥ विरविल्वोन कमालः
करंजश्च करंजकइस्सुमरः ॥ शेषं स्पष्टमिति ॥ ११ ॥ अप्पधाजीकरणं ॥ स्पष्टोर्थः ॥ शंकेरभावात्तं भादि सर्वमेवा

५४

प्रयोजनकं ॥ अत शरीरपुष्ट्यर्थं वाजीकरणमुच्यते ॥ मुक्तेति ॥ अतस्तंभादेरप्रयोजकत्वात् ॥ वाजीकरणेश्वद्धि
द्वारा शरीरपुष्टिसाधनमुच्यते कथ्यते शोषस्य हितं ॥१॥ पर्णो विदार्यस्वरसे भावितं नानुशोषितं ॥ मध्वाज्यमिश्रि
तं लिह्याद् जनेत्रतिनारनरा ॥१॥ चूर्णमिति ॥ विदार्याः भूमिकुष्मांडस्य ॥ उत्तरस्वभावस्या विदारीकंद इति महारा
ष्ट्रभाषया भूपकोहलीति च प्रसिद्धायाः ॥ विदारीशीरशुक्लेक्षुगंधाक्रोष्ट्रीनुयासितेत्यमरः ॥ स्वरसैस्तदीयैरेव
रसेः शोषस्य हितं ॥२॥ स्वरसे भावितं धात्रीचूर्णमाज्यासितान्वितं ॥ क्षौद्रेणापि लिहन् त्रास्त्रोवृद्धोपि तरुणायते ॥
॥३॥ स्वरसेरिति ॥ धात्रीचूर्णमामलकीचूर्णं स्वरसे तदीयरसे भावितं पिंडीकृतं ॥ आज्यसितान्वितं घृतश
र्करायुतं ॥ इक्षुविकारे शर्करा सितेत्यमरः ॥ शोषस्य हितं ॥३॥ कपिकच्छुरगोरक्षतबला नागबला भवं ॥ चूर्णंच

५८

शतपुष्पापाः पीतंक्षीरेणपोष्टिकं ॥४॥ कपीति कपिः स्वक्तासकुहरीतिप्रसिद्धः ॥ कपिः कच्छुश्चमर्कटी समर
रः॥ कपिकच्छुः स्वादुरसा वृष्या वातक्षयापहा॥ शीतपित्तास्त्रहंत्री च विषव्रणनाशिनीति निघंटुश्च॥ गो
क्षुरो गोखरु इति प्रसिद्धः॥ गोकंटको गोक्षुरको वनशृंगाट इत्यपि समरः॥ गोरस्तो नागार्जुनीति प्रसिद्धः गो
रक्षदुग्धी मधुरा वृष्या संग्राहिणी हिमा॥ सर्वेषु रसकरी चैव रससिद्धिगुणप्रदेति निघंटुः॥ बलात्तनरस्य
भाषायां करीयारीति प्रसिद्धः॥ महाराष्ट्रभाषया चिकणा इति प्रसिद्धः॥ नागबला॥ उत्तरस्थभाषयासु
घटीति प्रसिद्धा॥ मधुराम्ला नागबला कफपित्तापहा गुरुः स्मृता॥ कंडूतिकुष्ठवातघ्नी व्रणपित्तविनाशिनी
ति निघंटुः॥ एतद्द्वयं चूर्णं॥ शतपुष्पापाः शोप इति प्रसिद्धा याश्च चूर्णं॥ शतपुष्पा शतछत्रा तिछत्रा मधु

+ माध्वीकेति ॥ माध्वीकचूर्णं माषमाउजे इमर इति प्रसिद्धस्य चूर्णं ॥ शोषं स्यद्धं ॥ ६॥ +३

५५ रामिसिरित्यमरः शोषं स्यद्धं ॥४॥ सिताससाधितगोक्षीरे माषान् संभाव्य शोधयेत् ॥ भानुपादैः पुनस्तेषां चूर्णेन
वटकं शुभं ॥ कृत्वाद्य तेन संसाध्य प्रशोषमक्षयेत्सदा ॥ वृद्धोपि प्रमलोभस्तावन्निता नां शतं व्रजेत् ॥ ५॥ स्फुटा
र्थौ श्लोकौ ॥ माध्वीकचूर्णं कर्बवाली द्वा म ध्याज्य मिश्रितं ॥ पिबेत् दनु गोक्षीरं पः सन्नारी रातं व्रजेत् ॥ ६॥ कृ
ष्णा पाप्त्रिफलायष्ट्योश्चूर्णं मधु घृतान्वितं ॥ भक्षेद्दिनान्ते यो नित्यं स रतौ चटकवद्भवेत् ॥ ७॥ कृष्णा पा इ
ति ॥ कृष्णा: पापाः पिप्पल्यां: कृष्णोपकुल्या वैदेही मागधी चपला कणेत्यमरः ॥ त्रिफला यष्ट्योश्चेति त्रिफला
हरीतकी बिभीतक आमलकी चेति त्रयी ॥ यष्टी ज्येष्ठमध इति प्रसिद्धं तयोश्च चूर्णं ॥ मधुकं क्लीतकं यष्टी
मधुकं मधुयष्टिकेत्यमरः ॥ मधुकं मधुयष्टी च त्रिषु क्षुद्रं तिलं ॥ मस्तुर्ध्वं पित्तहृत् दुःखं शोषतस्मा ५५

ग्रणापहमितिनिघंटुः॥ हिनां ते त्रौ॥ चटकवत्॥ चटकः फलविंकस्थिमण्णीति प्रसिद्धस्तद्वत्॥ चटकाः क
लविंकः स्यादिति अमरः॥ शोबंस्यर्हं ॥७॥ बीजं सितपिकाख्यस्य तंडुलः षष्टिकोद्भवाः॥ द्वयोः कर्षं लिहन् रा
त्रौ मधुना हृद्गतं व्रजेत्॥ ७॥ बीजमिति॥ सितपिकाख्यस्य तालिमखानाइति प्रसिद्धस्य बीजं॥ षष्टिको
द्भवाः षष्टिदिनैर्निष्पन्नाः शालयः साठेधानइति प्रसिद्धा मा हुइलास्तंडुलाश्च॥ शालयः कलमाद्याश्चष
ष्टिकाद्याश्चपुंस्यमी॥ अमरः॥ एतद्द्वयोः कर्षद्वयमाषप्रमाणं चूर्णं॥ कर्षः स्याद्दशमाषक इत्यभिधानात्॥
इदं च प्रचलद्द्वस्यार्थाष्टगुंजात्मकमाषाभिप्रायेण बोध्यं॥ अमरकोशे तु पंचगुंजात्मकमाषाभिप्रायेण
षोडशमाषात्मकः कर्षः प्रोक्तोपश्या॥ गुंजाः पंचाद्यमाषकः॥ ते षोडशाक्षः॥ कर्षोस्त्रीति॥ उभयथाप्य

५६

शीतिगुंजासमः कर्षो भवतीति सिद्धं ॥ मधुनासहेतिपो अनारोबंस्पदृं ॥८॥ शतपत्रारसं सर्पिस्तुल्यं तद्
शधापयः ॥ रसांसंसाधितं क्षौद्रसिताभ्यां यो ष्टिकं परं ॥९॥ शतेति ॥ शतपुष्पापाः सहस्त्रमुळी इति प्रसिद्धा
याः ॥ शतमूळी जडसुते स्वभिधानात ॥ शतपुष्पायाः इति पाठे सेपद्दति प्रसिद्धायाः ॥ शतप्रसूतानकुल पुष्पा
न्हा शतपत्रिकेति निघंटोः ॥ रसं सर्पिस्तुल्यं घृतसमभागं ॥ तदर्धं धात्र्यं तद्दशगुणितं पयः तत्र रसांसंयो
ज्य क्षौद्रसिताभ्यां मधुशर्कराभ्यां साधितं कुर्वन्पो ॥ ष्टिकमाहुरिति शेषः ॥९॥ अमृतात्रिफलापष्टीचूर्णं म
धुघृतान्वितं ॥ दिनांते लेढि यो नित्यं स नारीसु रतौ जयेत् ॥१०॥ अमृतेति ॥ अमृता गुडूची गुळवेल इति
प्रसिद्धा ॥ वत्सादनी छिन्नरुहा गुडूची तंत्रिकामतेत्यमरः ॥ ज्ञेया गुडूच्यमृतवल्ल्यमृता ज्वरारिः सोमा ५६

वरा सुरकृता मधुपर्णिका चेति निघंटुः ॥ त्रिफला हरीतकी बिभीतक आमलकीति ॥ त्रयीषष्टी मधुकं मेत
चूर्णं ॥ लेढि आस्वादयति शेषं सुगमं ॥ १० ॥ अथ लिंगस्थूलीकरणं ॥ स्पष्टोऽर्थः ॥ लघुसूक्ष्मे न लिंगे तन्नै
न तुष्यंति योषितः ॥ अनस्तस्मात्तये वक्ष्ये स्थूलीकरणमुत्तमं ॥ १ ॥ लघ्विति ॥ स्पष्टोऽर्थः ॥ १ ॥ बला नागबला
कुष्ठं वचा द्विरदपिप्पली ॥ वाजिगंधाहयमारि पुरीतिसर्वसमांशकः ॥ २ ॥ अथ लिंगस्थूलीकरणोपायं सुम्मे
नाहबलेति ॥ बला चिकणा इति प्रसिद्धा ॥ नागबला उत्तरसृड भाजया सुघटी ति प्रसिद्धा ॥ कुष्ठं कोष्ठ इति प्र
सिद्धं ॥ व्याधिः कुष्ठं पारिभव्यमित्यमरः ॥ वचा वेखंड इति प्रसिद्धा ॥ वचोग्रगंधा षड्ग्रंथेत्यमरः ॥ द्विर
दपिप्पली गजपिप्पली ॥ गजोषणा कटूष्णा च रक्षामल विशोधिनीति निघंटुः ॥ वाजिगंधा अश्वगंधा म्हा

५७

बपा अस्कं बइति प्रसिद्ध॥ अश्वगंधा कंदूश्मा च तिक्तास्यान्म धुगंधिका॥ वतपावातहरा हंतिकासश्वा
सक्षयव्रणानिति निघंटुः॥ हयारिपुः कनेरइति प्रसिद्धः॥ प्रतिहासशतप्रासश्चंडातहयमारकाः॥ कर
वीरइत्यमरः समांशार्कं समभागं॥२॥ संचूर्ण्य नवनीतेन लिंगलेपो विधीयते॥ मुहूर्तोद्दपि सन्देहे च वाजि
लिंगसमं भवेत्॥३॥ संचूर्ण्येति॥ स्पष्टोर्थः॥ जातीरस शिला कुष्ठ घोषा टंकण चूर्णके॥ तिलतैलयुते लेपा
पाल्लिंगवृद्धिः प्रजायते॥४॥ जातीति॥ जातीरसो मालतीरसः॥ शिला मनः शिला मनशीळ इति प्रसिद्धा
॥ कुष्ठं कोष्ठ इति प्रसिद्धं॥ घोषा काकडाशिंगी ति प्रसिद्धा॥ शृंगी कुलीरशृंगी स्यात् घोषा च वनमर्धजा
॥ चंद्राकर्कर शृंगी च महाघोषा च शृंगिका॥ इति राजनिघंटुः॥ टंकणं सागा इति प्रसिद्धं॥ एतच्चूर्णकैः॥ शो

५७

जंस्पष्टं ॥ ४ ॥ सैंधवंमरिचंकुष्टं बृहतीखरमंजरी ॥ हयगंधायवामाषाः पिप्पलीगौरसर्षपाः ॥ ५ ॥ सैंधव
मिति ॥ सैंधवंसैंधवलवणं ॥ सैंधवंलवणंशुभ्रं चक्षुष्यंरुचिदीपनं ॥ त्रिदोषशमनंप्रतंव्रणशोधविबंधजि
त्ह्यतिराजनिघंटुः ॥ मरिचंप्रसिद्धं ॥ कुष्ठंकोष्ठइतिप्रसिद्धं ॥ बृहतीडोरलीतिप्रसिद्धा ॥ बृहतीकंटकारिके
त्यमरः ॥ खरमंजरीअपामार्गः ॥ अघाडाइतिप्रसिद्धा ॥ अपामार्गःशैखरिकोधामार्गवमयूरको ॥ प्रत्य
क्पर्णीकेशपर्णीकिणिहीखरमंजरी ॥ इत्यमरः ॥ हयगंधाअश्वगंधा ॥ यवाःप्रसिद्धाः ॥ गौरसर्षपाःशु
क्लसर्षपाःशेषंस्पष्टं ॥ ५ ॥ तिलाश्चैतानिसंपिष्यमधुनोद्वर्तनंबुधः ॥ प्रयोजयेत्कर्णपालिस्तनलिंगविव
र्द्धनं ॥ ६ ॥ तिलाइति ॥ तिलाश्चैतानिश्लोकद्वयोक्तानिबुधःसंपिष्यचूर्णयित्वामधुनोद्वर्तनंप्रयोजयेत् ॥

५८

किंभूतं कर्णस्य पालिः सा च स्तनौ च लिंगं चैतद्विवर्धनं वृद्धिकारकं॥ ६॥ भल्लातं कृस्नलवणं नलिनीदलमे
वच॥ २॥ धात्तद्रस्न बृहती। फलजेनांभसा सह॥ ७॥ अथ श्लोकद्वयेन तस्य कारमाह॥ भल्लातमिति॥ भल्ला
तो भाषया भिलावा॥ बीबा इति च प्रसिद्धं स्तं। भल्लातकः कषायोष्णः शुक्रो मधुरो लघुः॥ हंति गुल्मज्वर
श्वित्रवह्निमांद्यमलभित्रणानहिति निघंटुः॥ कृस्नलवणं प्रसिद्धं॥ नलिनीदलं कमलिनीदलं॥ बृहतीफ
लजेनांभसा डोरली इति प्रसिद्धं फलोत्थेन तेन रसेन रोपांस्यहं॥ ७॥ माहिषीगोमयेः पूर्णं घृष्ट्वा लिंगे विलेप
येत्॥ तत्क्षणान्मुसलाकारं दृढं चैव भवेद्दृढं॥ ८॥ माहिषीति॥ माहिषीगोमयेः स्तस्रं घृष्ट्वा॥ अत्र गोमय
शब्देन शकृन्मात्रं ग्राह्यं॥ ८॥ लोध्रकासीससमातंगबलाकल्केस्ति लोद्रवं॥ तैलं संसाधितं लिंगकर्णयोनि ५८

११५

विवर्धनं ॥ ९ ॥ लोध्रेति ॥ लोध्रः प्रसिद्धः ॥ कासीसं ॥ सीसकं ॥ मातंगघ्नांडाली कंदः ॥ चांडालकंदो मधुरः
कफपित्तास्रदोषनुत् ॥ विषभूतादिदोषघ्नो विज्ञेयः पथ्यरसायन इति निघंटुः ॥ बलाप्रसिद्धा ॥ काचैन कल्कैः रोलं
स्पष्टं ॥ ९ ॥ अथ संकोचनविधानं ॥ स्पष्टोर्थः ॥ प्रोद्दानवप्रसूतानां श्लथं गुह्यं नरो च वते ॥ यस्तामनतस्ता तं
कोचविधिं संक्षेपतो ब्रुवे ॥ १ ॥ स्पष्टोर्थः ॥ सनालकमलं पिष्ट्वा पयसा कारयेद्वटीं ॥ तां निधाय स्मरर्णये नो
वद्धा पिस्याकुमारिका ॥ २ ॥ सनालेति ॥ नालसहितं कमलं पिष्ट्वा वर्णे पिकारोर्भ स्पष्टं ॥ २ ॥ देवदारु नि
रगयुग्मं सरसीरुहकेसरैः ॥ संलिप्तं मदनछत्रं संकोचं परमं व्रजेत् ॥ ३ ॥ देवदार्विति ॥ देवदारु समसि
दं ॥ राक्षपादपः पारिभद्रकः ॥ भद्रदारु द्रुकिलिमं पीतदारु च दारु च ॥ कलिकार्हं च समस्तसुरै देवदारुणी स्म

५९

मरः॥ निशायुग्मं॥ हरिद्रादारुहरिद्रेति हरिद्राद्वयं॥ निशाह्वा कांचनी पीता हरिद्रा वरवर्णिनीत्यमरः॥
हरिद्रा कटुस्तिक्तोष्णा कटुर्वातास्रकुष्ठजित्॥ मेहकंडूव्रणान्हंति देहवर्णविधायिनी॥ तिक्ता दारुहरि
द्रा तु कटूष्णा व्रणमेहनुत्॥ कंडूविसर्पत्वग्दोषविषतर्षाक्षिदोषहेति राजनिर्घंटुः॥ सुरसीरुहकेस
रैः कमलकिंजल्कैः॥ मदनच्छदमुक्तस्य रूपं वैरोप्यं स्पष्टं॥२॥ लिखापिकारव्यबीजैश्च वारिपिष्टैः स्मराल
यं॥ नियमेन परं गाढं परांगं लभते गना॥४॥ लिखेति॥ वारिणा पिष्टैः संचूर्ण्य जलेन पिंडीकृतैरित्यर्थः॥ पि
कारव्यबीजैः॥ तालिमखाना॥ कोकिलाक्ष इति च प्रसिद्धस्य बीजैः॥ शेषं स्पष्टं॥४॥ त्रिफलाधातकीपुष्पजं
बूलफलगावरैः समैः॥ ससौद्रैर्लिप्तगुह्यायैकन्येव जरती भवेत्॥५॥ त्रिफलेति॥ त्रिफला हरीतकी बिभीत

सीं

ही =

५९

फूअम त्वैकीति त्रयी धातकी धामफूल इति प्रसिद्धा ॥ धातकी धातुपुष्पिके इत्यमरः ॥ जंबूसक । जांबवी
ति प्रसिद्धा ॥ पास्तका । अंशुः सुरभिपत्रा चेत्यमरः ॥ शाबरो लोध्रगालवः शाबरो लोध्र इत्यमरः ॥ समैरेतैः
क्षौद्रसहितैर्लिप्तगुह्या जरतीष्टद्धा कन्येव कुमारिकेव भवेत् ॥ ५ ॥ कटुतुंबीभवैर्बीजैः सलोध्रैः स्मरमं
दिरं ॥ लिप्त्वा नवप्रसूतापि ध्रुवं कन्येव जायते ॥ ६ ॥ कटुत्विति ॥ कटुतुंबीभवैः कटुतुंबीजन्यैः ॥ इक्ष्वाकुः कटुतुं
बीत्यादि इत्यमरः ॥ सलोध्रैः लोध्रः प्रसिद्धस्तेन सहितैः समाक्षिकैः समधुभिर्बीजैः स्मरमंदिरं गुह्यं ॥
शोधं स्पष्टं ॥ ६ ॥ वाजिगंधा बला व्योषनिशेंदीवरकुष्ठकैः ॥ तोयपिष्टैः स्मरागारं लिप्तं गाढतरं भवेत् ॥
॥ ७ ॥ वाजिगंधेति ॥ वाजिगंधा आस्कंद इति प्रसिद्धा ॥ बला चिकणा इति प्रसिद्धा ॥ व्योषं सुंठी मरिचं पिप्प

६०

लीति प्रसिद्धं ॥ त्रिकटु ॥ त्रिकटु त्र्यूषणं व्योषमित्यमरः ॥ निशा हरिद्रा ॥ इंदीवरं कमलं कुष्टं कोष्ठं इति प्रसिद्धं
चैते सोमपिष्टैः ॥ स्मरागारं गुह्यं ॥ रोमं स्पष्टं ॥ ७ ॥ अथ योनिसंस्कारः ॥ स्पष्टोर्थः ॥ लघ्वश्वत्थो सार्षपं तैलं जाती
पुष्पैः प्रसाधयेत् ॥ नारीगुह्यं तदभ्यंगात्सुगंधि सुरते भवेत् ॥ १ ॥ सर्षपं सर्षपसंबंधि तैलं जातीपुष्पैर्मा
लतीप्रसूनैः ॥ शेषं स्पष्टं ॥ १ ॥ सुरदारु तिलारिष्ट दाडिमांजन कांचनैः ॥ तैलं सुसिद्धमभ्यंगाद्योनिं सुरभि
तां नयेत् ॥ २ ॥ सुरदार्विति ॥ सुरदारु देवदारु ॥ तिलाः प्रसिद्धाः अरिष्टो निंबः ॥ अरिष्टः सर्वतोभद्र हिंगुनि
र्यासमालकाः ॥ पिचुमर्दश्च निंब इत्यमरः ॥ दाडिमं दाडिंब इति प्रसिद्धं स्पष्टं फलं ॥ समौ करक दाडिमाविति
त्यमरः ॥ अंजनं सुरमा इति प्रसिद्धं कांचनं नागकेसरः चांपेयः केसरो नागकेसरः कांचनाह्वय इत्यमरः ॥

६०

कचनार इति प्रसिद्धस्य त्वगिति केचित् तज्जैः संसिद्धं तैलं कर्तृ शेषं स्पष्टं ॥२॥ अथ लोमशातनं ॥ लोम
नाशनं ॥ कटुतैलेन नागवर्णं शिग्रुस्सप्ताहमातपे ॥ निधेयं मर्दनात्तत्तु यो निर्लोमापहारकं ॥१॥ कटुरिति ॥
कटुतैले सर्षपतैले नागवर्णं सीसकवर्णं ॥ नागसीसकमाप्योष्ठवप्राणित्रपु पिच्चटं इत्यमरः ॥ शिग्रुतात
तत्तैलं सप्ताहं आतपउष्णे निधेयं स्थाप्यं ॥ एवं सति तत्तैलं कर्तृ शेषं स्पष्टं ॥२॥ सप्ताहं भावितं शंखभस्म
रंभांभसा ततः ॥ तैलेन युक्तं हरति यो निर्लोमानि योजितं ॥३॥ सप्तेति ॥ शंखभस्म कंबुभसितं कंबुः शंखः
स्यात्कंबुरस्त्रियाविसमरः ॥ सप्ताहं सप्तदिनपर्यंतं रंभांभसा कदलीस्तंभोदकेन कदली वारणबुसा रंभा
मोचांशुमत्फलेत्यमरः ॥ भावितं संस्कृतं ॥ ततो भावनानंतरं तैलेन युक्तं सत् शेषं स्पष्टं ॥३॥ हरितालपला

शस्य भस्मरंभाजलान्वितं ॥ एतस्य लेपात्लोमानि नरो हंतिकरोचन ॥४॥ हरितालमिति ॥ हरितालं कर्बुरं गं
हरितालं तु कर्बुरमित्यमरः ॥ पलशस्य किंशुकस्य भस्म च ॥ पलाशो किंशुकः पर्णः इत्यमरः ॥ रंभाजलान्वितं
कदलपुरस्फुरत्कार्यमिति शेषः ॥ एतस्य प्रलेपात् हूयस्य ॥ रोमं स्यहं ॥४॥ अथ नष्टपुष्पसमुद्भव विधिः ॥ न-
ष्टार्तवसत्त्विप्रकारः ॥ कथ्यत इति शेषः ॥ भृष्टं ज्योतिष्मती पत्रं जपापुष्पं च वारिणा ॥ पिष्ट्वा पिबति सा भयो
नष्टपुष्पं प्रविंदति ॥१॥ भृष्टेति भृष्टं भर्जितं तद्वत ज्योतिष्मती पत्रं मालकांगुनीति प्रसिद्धायाः पलाशं
ज्योतिष्मती स्वर्णलता नलप्रभा ज्योतिष्मता साकरसुमंगले ति राजनिघंटुः ॥ जपापुष्पं जासवंद इति प्रसि-
द्धस्य पुष्पं च ॥ ओड्रपुष्पं जपापुष्पमित्यमरः ॥ प्राविंदति प्राप्नोति सम्यक् लगतं ॥१॥ तंडुलादेवकाछंवेट

र्वापत्रं समं त्र्यं ॥ वारि पिष्टं पिबेद्या च नष्टं पुष्पं लभेत सा ॥ २ ॥ तंडुलेति ॥ तंडुलाः धान्यस्य भागाः पाचौराई इति
प्रसिद्धा ॥ महाराष्ट्र भाषया चवळी इति प्रसिद्धा ॥ रेचकाष्टं । रेवदार ॥ दूर्वापत्रं प्रसिद्धं ॥ दूर्वा तु शतपर्विके
त्यमरः ॥ समं समभागं ॥ शेषं स्पष्टं ॥ २ ॥ अथ पुष्पाधिक्यनिवारणं ॥ स्पष्टोर्थः ॥ पथ्यारसांजनं धात्री त्र्यं
पिष्ट्वा भसा समं ॥ पिबेद्याद्याधिकं पुष्पं सप्ताहात्सरिनाशयेत ॥ १ ॥ पथ्येति ॥ पथ्या हरीतकी ॥ अभया त्वव्यथा प
थ्या कायस्था पूतनामृता ॥ हरीतकी हैमवती चेतकी श्रेयसी शिवेत्यमरः ॥ रसांजनं रसोत इति प्रसिद्धं ॥ दारुह
रिद्रा हरि निर्मितः क्वाथ विशेषः ॥ धात्र्यामलकी इति त्र्यं पिष्ट्वा भसा समं पिबेत् शेषं स्पष्टं ॥ १ ॥ अथ गर्भधारण
विधिः ॥ स्पष्टोर्थः ॥ रुक्मकांचन ताम्राणां भस्म षोडशत्वितं माहात् ॥ लीढं पुष्पान्तिके स्त्रीभिः शोत्रस्थ हिं परानमे

(१२)

६२

ता॥२॥ स्वर्णेति॥ क्षौद्रेण मधुनान्वितमेवं भूतं स्वर्णं लोहं॥ स्वर्णं तु कांचने लोहे इति विश्वः॥ कांचनं सुवर्णं ता
म्रं चेति द्वंद्वस्तेषां भस्म कर्त्तुं द्वंद्वां ते शूपमाणं पस्य प्रलेह मनुसंवध्यमानत्वा लोह भस्म सुवर्ण भस्म ताम्र
भस्मा वेद्यर्थः॥ स्त्रीभिर्ऋतुस्नपेऋतुसंनिहितकाले अहात्र्यहं मर्यादीकृत्वा निष्याद्येति वात्स्य प्रयोगे पंच
मी॥ लीढ्वा स्यादिति सततं ताः स्वेभशुद्धिं नयेत् प्रापयेत्॥ स्वेत्र शुद्धिं कुर्यादित्यर्थः॥२॥ नागकेसरचूर्णं वा स्नाना
ज्येन पिबेत् त्र्यहं॥ क्षीरभुक् भर्तृसंयोगाद्गर्भं धत्ते अंगना ध्रुवं॥३॥ नागकेसरेति॥ वेति पक्षांतरे अंगनास्त्री त्र्यहं
ऋतुदिनात् त्रिदिनपर्यंतं नागकेसर चूर्णमाज्येन सह॥ तत्र आज्येने त्यपि पाठः॥ पिबेत्॥ क्षीरभुक् दुग्धाहा
रा सती ततः स्नाता सती प्रोक्तदिवसे भर्तृसंयोगात् गर्भं ध्रुवं निश्चितं धत्ते इति॥३॥ वाजिगंधा मृता सर्जिका

६२

यस्त्वानीहने पिबेत्॥ पुंयोगेन तु सा नारी गर्भं धत्ते न संशयः॥४॥ वाजिगंधेति या। वाजिगंधा। आसगंधइति प्र
सिद्धा॥ अमृता गुळवेल इति प्रसिद्धा॥ सर्जिः साजीखार इति प्रसिद्धः॥ सर्जिक्षारः सर्जिकश्च क्षारः सर्जिः सु
खार्जिकः॥ सार्जिकः कटुरुष्णश्च तीक्ष्णो वातकफापहः॥ गुल्माध्मानकृमीन्हंति व्रणजाठरदोषनुदिति रा
जनिघंटुः॥ एतेषां क्वाथं कषायं स्नानदिने ऋतुदर्शनादिना चतुर्थे दिवसे पिबेत्॥ शेषं स्पष्टं॥४॥ शृं
गबेरोषणा शुद्धा कणा केसरजं रजः॥ गोघृतेन पिबेद्धातुर्ध्यापि लभते सुतं॥४॥ शृंगबेरोषणेति॥ मा
तुः शृंगबेरं शुंठी॥ सौपर्णं शृंगबेरं च कफारिश्चार्द्रजं स्मृतमिति राजनिघंटौ शुंठीनामसु पाठात्॥ शुद्धा शिंग
णीति प्रसिद्धा॥ उषणा पिप्पली॥ कणा जाजीजीरक इति प्रसिद्धा॥ कृष्णाजीरकं पारकणेति विश्वः॥ गोरा

६३

दिजीरकस्तस्योजरनी स्यात्स्वेतजीरकः॥ कणाह्वा कणजीर्णोव कणाह्वीप्यः सिता स्मिव॥ ज्ञेयाद्दीर्घकृष्णाच्चैव
सिताजाजीनवाह्लयेतिराजनिघंटुः॥ मरिस्विमिति कथ्वितं॥ केसरजं नागकेसरजं रजश्चूर्णं गोघृतेन सह पिवे
त्रोपंस्पष्टं॥४॥ पुष्योद्धृतं लक्ष्मणाजं मूलं भर्त्रा निषेचितं॥ पिवेद्धृतेन सा गर्भं धत्ते क्षीराशनात्तद्भवं॥५॥
पुष्योद्धृतमिति॥ मार्भर्त्रो पुष्योद्धृतं पुष्यनक्षत्रे उद्धृतं निष्कासितमेवं भर्त्रा निपेषितं चूर्णितं॥ लक्ष्मणाजं ल
क्ष्मणा लक्ष्मणाकंदइति प्रसिद्धा॥ तज्जं तदुत्पन्नं॥ तत्संबंधी॥ प्रयोः॥ मलं लक्ष्मणा मधुरा शीता स्त्रीवंध्या
त्वविनाशिनी॥ रसायनकरी वल्या त्रिदोषशमनी परेति राजनिघंटुः॥ लक्ष्मणं लांछने नाम्नि रामभ्रातरि
लक्ष्मणः॥ लक्ष्मणो ऽधिसारः स्यात्सश्रीके त्वभिधेयवदिति विश्वश्च॥ घृतेन सह पिवेत॥ सा क्षीराश

६३

ना दुग्धा सा नासती गर्भं धत्ता इति ॥५॥ बीजपूरस्य मूलं वा क्षीरसिद्धं घृतान्वितं ॥ ऋतौ त्र्यहं पिबेद्या सा गर्भं
धत्ते न संशयः ॥६॥ बीजपूरस्येति ॥ बीजपूरस्य । एतन्निंबू महालुंग इति च प्रसिद्धस्य मातुलिंगस्य मूलं ॥
फलपूरो बीजपूरो रुचको मातुलिंगक इत्यमरः ॥ मूलं बुध्नोंघ्रिनामक इत्यमरः ॥ क्षीरसिद्धं गोदुग्धपाचि
तं ॥ ६ ॥ विस्पष्टं ॥ ६ ॥ पुष्योद्धृतं श्वेतबलामूलं कर्षं च तत्समं ॥ यष्टीचूर्णं सितायास्तु पलमेकं विमिश्रयेत् ॥
॥७॥ अथान्यं गर्भधारणप्रकारं श्लोकत्रयेणाह ॥ पुष्योद्धृतमित्यादिना ॥ पुष्योद्धृतं ॥ कर्षं कर्षप्रमाणं श्वे
तबलामूलं श्वेतबला तु चवणीचिकणा इति प्रसिद्धा तस्या मूलं ॥ च पुनस्तत्समं तत्प्रमाणकं ॥ यष्टीचूर्णं ॥
यष्टी ज्येष्ठमद इति प्रसिद्धा तच्चूर्णं सितायाः शर्करायाः एकं पलं कर्षचतुष्टयं ॥ पलं कर्षचतुष्टयमित्यमरः ॥

६४

कर्षं च तुल्य पयसि मितं शर्करा मिश्र पयः॥ विमिश्रयेत्॥ तत्सर्वमेकत्र कुर्यात्॥७॥ गृहे गोरेकवर्णायाः स्ववत्साया
स्तथा पयः॥ आहाय पाशि स्वातन्मध्ये पिबेत्स्नाता वरांगना॥८॥ गृहे इति॥ तस्या गृहे॥ सरूपस्वत्सायाः॥ सरूप
स्वत्सा गौर्गृहस्थिता स्वसमा॥ एकवर्णाया गोः पयः आहाय गृहीत्वा तन्मध्ये पयोमध्ये पूर्वोक्तचूर्णं क्षिप्त्वा वरांगना
स्नाता सती पिबेत् पिष्ट्वा गोरिति पाठः॥८॥ नरवारे तद्दिने किंचिदपरात्रे पतिं भजेत्॥ प्रातः क्षीरोदनं
भक्षेत् गर्भिणी स्याद् संशयः॥९॥ नरवार इति॥ तद्दिने भेषजग्रहणदिने किंचित् नरवारे तत्॥ अपरात्रे पतिं
भर्तारं भजेत्॥ तत्संगं कुर्यादित्यर्थः॥ प्रातः द्वितीयदिने प्रातःकाले क्षीरोदनं भक्षेत् एवं कृते असंशयं निश्चि
तं गर्भिणी स्यादिति॥९॥ अथ गर्भस्तंभनविधिः॥ सुगमं॥ कुलालपाणि संलग्नः पंकः क्षौद्रसमन्वितः॥ ६४

126

ऽजाक्षीरेणसंपीतोगर्भस्तंभंकरोत्यलं॥१॥ अथ घृतगर्भस्तंभनस्य प्रकारमाह॥ कुलालेति॥ कुलालपाणौ संलग्नो घटनिर्माणसमये लिप्तएवंभूतःपंकः कर्दमः स्तौद्रेणमधुनासमन्वितएवंभूतोजाक्षीरेणमेषीदुग्धेनसहसंपीतःसन्नऽलमत्यर्थंगर्भस्तंभंकरोति॥१॥ यष्टीशर्करधात्रीणांचूर्णपीतंपयोन्वितं॥सम्राहात्स्खलितंगर्भंनारीणांस्तंभयेत्ध्रुवं॥२॥ यष्टीतियष्टीज्येष्ठमद्दइतिप्रसिद्धाशर्करोलोधःलोध्रइतिप्रसिद्धः॥ धात्र्यामलकीचैतेषांचूर्णंपयोन्वितंगोदुग्धान्वितंपीतंसत्सप्ताहात्सप्तदिननिषेवणेनेप्यर्थः॥ नारीणांस्खलितंगर्भंध्रुवंस्तंभयेत्॥२॥ कर्दलोहितपद्मस्यक्षीराज्यमधुसंमि (117) तं॥ सुपघृतंशीतलंकृत्वासाप्ताहंयांगनापिबेत्॥३॥ अथान्यंप्रकारंयुग्मेनाह॥ कर्दमितिलोहितपद्मस्यरक्तकम

६५

लस्य कंदं क्षीरश्लक्ष्णं मधुसंमितं सुपर्वं धवंशाग्निपक्वं शीतलं च तत्कषायं गतास्त्राहं दिवेद्रितिपोजना ॥३॥ गर्भ
स्रावं तथा घातं शूलं शोषं त्रिदोषजं ॥ अन्यांश्च बहुरोगान्नाशयेन्नात्र संशयः ॥४॥ गर्भे इति ॥ नस्यानंस
कंदो वा गर्भस्रावं तथा घातं गर्भसंबंधिवायुं ॥ शूलशोषं त्रिदोषजं ॥ कफवातपित्तप्रकोपजं रोगं ॥ अन्यान् ब
हुरोगाननेकरोगान् नाशयेत्त्र संशयो नास्तीति ॥४॥ अथ सुखप्रसवविधिः ॥ सुगमं ॥ मातुलिंगं मधुकोत्थं
चूर्णं मधुघृतान्वितं ॥ पिबेत्स्तेसुखं नारी शीघ्रमेव न संशयः ॥१॥ मातुलिंगमिति ॥ मातुलिंगं महा
राष्ट्रभाषया महाळुंग इत्युक्तं ॥ रस्तु भाषया बीजौरा इति प्रसिद्धस्य फलं ॥ मधुकोत्थं ज्येष्ठमद इति
प्रसिद्धादुत्पन्नं चूर्णं ॥ शेषं स्पष्टं ॥१॥ गृहधूमं समादाय पिबेत्पर्युषितांभसा ॥ या सा सूते सुखं यो

६५

बाऽहरी धूम्रं नात्र विचारणा ॥२॥ गृहधूममिति याम्योषास्त्री गृहधूमं ॥ गृहोपरिस्थितान्धकारं नकाष्ठकटका
दिसंलग्नं धूमं वीसा इति प्रसिद्धं ॥ पर्युषितं भक्ष्या पिबेत्तु गोवंस्य ष्टं ॥२॥ रविवारे गृहीतस्य गुंजामूलस्य
बंधनात् ॥ नीलीसूत्रैः कटौ मूर्ध्नि जायते प्रसवत्वरा ॥३॥ रविवार इति ॥ रविवारे गृहीतस्य गुंजामूलस्य
गुंजाप्रसिद्धा तन्मूलस्य ॥ गुंजातु कृष्णलेसमरः ॥ नीलीसूत्रैर्नीलीरंजितकार्पाससूत्रभिः कटौ मूर्ध्नि च
बंधनात् प्रसवत्वरा जायत इति ॥३॥ ॐ मन्मथ मन्मथ मन्मथ वाहिलि बालस्योदरं मुंच मुंच लघु स्वाहा ॥ इ
ति मंत्रेण संजप्तं पातुं देयं जलं बुधैः ॥ सूतेंगना सुखेनैव सा मंत्रराजप्रसादतः ॥४॥ स्पष्टोर्थः ॥ अथ वं
ध्या स्त्रीपादहनविधिः ॥ वंध्यास्त्रीपादहनविधिः ॥ गुडूच्यैहायनं याति पलमात्रं तु नित्यशः ॥ मासार्द्धं सा भ

वेदं वंध्यापापवशादुर्नसंशयः ॥१॥ अथ पुंश्चलिसंविशिष्टविधवोदयोगिनं वंध्यालोपायं श्लोकत्वनुष्टुभेनाह ॥
गुडमिति पात्रे हायनं वार्षिकं ॥ संवत्सरोऽब्दो हायनोऽस्त्री शरत्समा इत्यमरः ॥ पलमात्रं कर्षचतुष्टयपरिमि
तं गुडं नित्यशः मासार्धं पक्षपर्यंतं मतिमक्ष्याति ॥ सा पापवशात्पूर्वं वंध्या भवेदत्र संशयो नास्तीति ॥ तुषतोये
न संकाश्य मूलमग्नितरूद्भवं ॥ पुष्पावसाने त्रिदिनं पीत्वा वंध्याभिजायते ॥२॥ तुषेति ॥ स्त्री अग्नितरूद्
भवं रसभावयामवितालवरः इति यस्मिन्द्रविचित्रकद्रवकस्तदुद्भवं मूलं ॥ चित्रको वह्निसंज्ञक इत्यमरः ॥ तुषतो
येन कांजिकजलेन संकाश्य वन्हौ ॥ परिपाच्य पुष्पावसाने ऋतुस्नवसाने ॥ स्यादृजः पुष्पमार्तवमित्यम
रः ॥ त्रिदिनं पीत्वा वंध्या अपि जायते ॥२॥ कदंबस्य फलं पाशैर्मासिकापादिनत्रयं ॥ पीतमुष्णोदकेनैतद्

६६

(131)

ध्यासं प्रतिपादयेत्॥३॥ कर्दंबस्येति॥ कर्दंबस्य फलं मक्षिया पादस्तात् दूर्पशोबंस्यद्धं॥३॥ रक्षो भरद्दुबीजा
नां पलार्धं तंडुलं भसा॥ ऋतौ पीतं तु सप्ताहं वंध्यां कुर्यान्मृगीदृशं॥४॥ रक्षोभूरुहेति॥ रक्षोभूरुहो ब्रह्म
राक्षस इति प्रसिद्ध वृक्षः॥ रक्षो निवास पिप्पलवृक्षोद्भातत्बीजानां पलार्द्धं कर्षद्वयं कन्ते तंडुलं भसा
तंडुलोदकेन सह शोषं स्यद्धं॥४॥ अथ केशोद्भवरंजनं॥ केशोत्साहकं रंजनमित्यर्थः॥ गव्येन पयसा पिष्टं ति
लपुष्पं सगोक्षुरं॥ सप्ताहं लेपनात्कुर्यात्केशान्दीर्घतरान्बहून्॥१॥ गव्येनेति॥ गोक्षुरं गोक्षुरो गोखरु इ
ति प्रसिद्धस्तत्सहितं तिलपुष्पं गव्येन पयसा सह पिष्टं सत् शोषं स्यद्धं॥१॥ रंती शाबरकल्केन सिद्धं तैलं
तिलोद्भवं॥ पीतं कारं र्यच सद्दमतं केशानां हंति लेपनात्॥२॥ रंती तिरंतीहातीन इति प्रसिद्ध॥ निकुंभोदं

131

६७

तिका प्रसकः श्रेष्ठमुदुंबरपर्ण्यपी स्यमरः ॥ शाबरो लोध्रस्त कल्के न सिद्धं तिलोद्भवं तैलं पीतं सत् कार्त्स्न्येन क्रू
राख्यं लेपनात् ॥ केशानां सहैमलं च हंति नाशयति ॥२॥ गुंजाफल रजः क्षौद्रयुक्तं लेपान्निहंत्यलं ॥ इंद्रलु
प्तं क्षयं याताः केशरोहंति भूरिशः ॥३॥ गुंजेति ॥ क्षौद्रयुक्तं मधुसहितं गुंजा फलरजो गुंजाफलचूर्णं
लेपात् इंद्रलुप्तं केशनाशकमुद्रीति प्रसिद्धं व्याधिविशेषं केशघ्नं इंद्रलुप्तकं मित्यमरः ॥ अलमत्यर्थं
हंति नाशयति ॥ क्षयं याताः केशभ्रष्टाः रोहंति प्रादुर्भवंति ॥३॥ आम्र प्रसूनं त्रिफला लक्षपांडव
तरोरपि ॥ पिंडारकं चेति कल्कैः सिद्धतैलं प्रसाधयेत् ॥४॥ आम्रेति ॥ आम्रप्रसूनमाम्रपुष्पमिति त्रयमपि
प्रायेणैककल्कवर्णं ॥ त्रिफला हरीतकी विभीतक आमलकीति ॥ पांडवतरोस्तरस्त्वभाषया कोहा इति

६८

महाराष्ट्रभाषया निर्मळीति च प्रसिद्धस्य वृक्षस्य फलगपि॥ पिंडारवृक्षं च पेंडीर इति प्रसिद्धं च पिंडालुः स्या
दुस्थिलः पिंडकरः पिंडग्रंथी रोमशो रोमकंदश्च इति निघंटुः॥ इत्येवं प्रकारैः कल्कैः सतिलतैलं प्रसाधये
त्॥४॥ नीलतैलमिति ख्यातं केशसंरंजनं परं॥ क्षिप्तोत्र हंसपक्षोपि कृष्णमेव कृतां नयेत्॥५॥ नीलेति॥ इ
त्येवं प्रकारं नीलतैलं ख्यातं प्रसिद्धं॥ कीदृशं केशानां संरंजनं परमुत्कृष्टं॥ अत्र प्रोक्ततैले क्षिप्तो हंसपक्षोपि
कृष्णतां निश्चितं मेचकतां लुष्ठतां नयेत् प्रापयेत्॥ केशरंजनमिति शेषः॥ कृष्णे नीलासितश्याम कालश्यामलमेच
का इत्यमरः॥५॥ माजफलं कृष्णा नीली सैंधवैः सारनालकैः॥ पिष्टैः क्षीरेसहालिप्ताः श्यामवर्णा भवंत्य
लं॥६॥ माजफलेति॥ पिष्टैश्चूर्णितैः सारनालकैः आरनालकं कांजिकमिति प्रसिद्धं॥ नस्तहितैः माजू

(133)

फलं मायफलइति प्रसिद्धं ॥ तेन युक्तैः कणापिप्पली नीली प्रसिद्धा सैंधवं चेति द्वंद्वः तैर्लिप्ताः शिरोरुहाः के
शा अत्यंतसूर्यरश्मातपवर्णा भवंतीति ॥ ६ ॥ निंबतैलफलेनि संमासैकं यः पिबेन्नरः ॥ शुक्लाः केशाः क्रमेणैव न
स्यपांस्युलितुल्यतां ॥ ७ ॥ निंबेति ॥ यो नरो मासैकमेकमासपर्यंतमभिसुर्भैः ॥ निंबपल्लवकर्षचतुष्टयपरिमितं ॥
निंबतैलं निंबरसयुक्तं तैलं पिबेत् ॥ तस्य शुक्लाः केशाः क्रमेण धातुतुल्यतां भ्रमरसाम्यं स्यादेव कृष्णवर्णता भैरव
र्षः ॥ प्रर्माणि प्रादुर्भवंति ॥ ७ ॥ गोरोचना कृष्णतिला काकमाची शतावरी ॥ अमी भिः स्निग्धकुंतलिप्ताः श्यामतां
यांति सत्वरं ॥ ८ ॥ गोरोचनेति ॥ गोरोचना प्रसिद्धा ॥ कृष्णतिलाः प्रसिद्धाः ॥ काकमाची काकुनीति प्रसिद्धा
॥ काकमाची तु वायसीसमरः ॥ शतावरी सहस्रमूलीति प्रसिद्धा ॥ शतमूली बहुसुता भीरुरिंदीवरी वरी ॥ ऋ

स्पर्शोक्ताभीरुपत्नीनारायण्यः शतावरी समरः॥ अमीभिर्लिप्ताश्चिकुराः केशाः सवर्णरंगी भृंगरूपाम तां कृष्णता
यांति प्राप्नुवंति॥१॥ अथ केशश्वेतकरणं॥ स्पष्टोर्थः॥ तिलानां स्नुहिदुग्धेन भावितानां तु यद्भवेत्॥ तैलं तेन लि
प्ता ह्ले केशाः स्फटिकाभा भवंति हि॥१॥ तिलानामिति स्नुहिदुग्धेन निवडुंग इति प्रसिद्धस्य दुग्धेन भावितानां सं
स्कृतानां तिलानां तिलसंबंधि यत्तु तैलं भवेत्॥ तल्लेपनात् ताहृक् तैललेपात् केशाः स्फटिकाभाः शुभ्रव
र्णा इत्यर्थः॥ भवंति हीति निश्चयार्थकं॥१॥ वज्रीक्षीरेण सप्ताहं शुष्कं तं भावयेत्तिलं॥ तत्तैललिप्ताः केशाः स्युः
शुक्लानेत्राग्रसंशयः॥२॥ वज्रीति शुष्कं तं तिलं सप्ताहमभिप्रायेणैकवचनं शुष्कैस्तान् तिलानभिप्रायेः॥ वज्री निवडुं
ग इति प्रसिद्धस्तत्क्षीरेण सप्ताहं सप्तदिनपर्यंतं भावयेत्तिलं स्नुकुर्यात्॥ तत्तैलेन ताहृशात् तिलोत्थतैलेन लिप्ताः

केशाः शुक्लाः स्युरस्यैतद्धि वपेत् संशयो नास्ति॥२॥ अथ मुखकण्टकहरणविधिः॥ मुखस्य विस्फोटादि दूरीक-
रणप्रकारः॥ निरूप्यत इति शेषः॥ वचासावरधान्यानां लेपनाद्यौवनोद्भवाः॥ मुखस्थाः पिटकायांति हि
नाशं संशयं क्षमा त॥१॥ वचेति॥ वचा भेखंड इति प्रसिद्धा सावरो लोध्रः धान्यं धने इति प्रसिद्धं॥ तत्रेति द्र-
व्यैस्तेषां लेपनात्तैर्हि नां स्त्रीपुरुषाणां यौवनोद्भवास्तारुण्योत्पन्नाः मुखस्थाः पिटका भावपा मुरुम इति प्र-
सिद्धा विस्फोटाः॥ विस्फोटः पिटकोस्त्रियामित्यमरः॥ अस्मात् संशयं नाशं यांति प्राप्नुवंति॥१॥ लोध्रसैंध-
वसिद्धार्थवचाम्भोपरिलेपनात्॥ गंडस्थापिटकायांति नरनार्योः स्वयं प्रहात्॥२॥ लोध्रेति लोध्रः प्रसि-
द्धः सैंधवं लवणं सिद्धार्थः सरसो शिरसी इति च प्रसिद्धः शुक्लसर्षपः॥ सिद्धार्थस्त्वेष धवल इत्यमरः॥

६९

वचाभेरंडइइति प्रसिद्धा साचेति हंद्व स्तासां अहात द्दिन अर्पमर्या री हृस्पेस्यर्थे ॥ त्यपृत्नोपेर्पचमी ॥ लेपना
तत्र स्नायो गेऽउस्त्राः पिटका । विस्फोटाः शस्यंयांति ॥२॥ कंटकैः शाल्मल्येयैश्च क्षीरपिष्टैर्विलेपयेत् ॥ मुखं
तस्यापि पिटकानाशं गच्छत्यसंशयं ॥३॥ कंटकैरिति क्षीरपिष्टैर्जलेचूर्णितैः शाल्मल्येयैः सेमरसावरी इ
ति च प्रसिद्ध वृक्षसंबंधिभिः ॥ पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोरित्यमरः ॥ कंटकैर्मुखं लेपयेत
॥ एवं सति तस्य मुखस्यापि पिटका असंशयमिति निश्चयाविशेषणं नाशं गच्छति प्राप्नुवंतीति ॥३॥ अथ नीलीहर
णविधिः ॥ स्पष्टोर्थः ॥ तिलद्विजीरासिद्धार्थो न पिष्ट्वा क्षीरेण लेपयेत् ॥ यः सप्ताहं जयेन्नीलीं चंद्रस्येवरुचं भ
वेत् ॥४॥ तिलेति तिलाः प्रसिद्धास्तेच द्विजीरंम धुरा तेजभेदेन द्विविधं जीरकं तच्च प्रसिद्धार्थो गौरसर्षपास्ते

137

७०

चेति द्वंद्वस्तान् क्षीरेणोदकेन ॥ अंभोजिन्यस्तोयपानीयनीरक्षीराम्बुशंबरमित्यमरः ॥ दिष्ट्वा संचूर्णयेत् द्वौ यच्चूर्ण तस्यालेपो लेपस्यार्थः ॥ यस्य सम्यक् हस्तेऽपलेपयेत् ॥ सनीलं नीमुखवा धवपव स्तम्भौ पाथिकीरूपामतां जयेत् ॥ तिरस्कुर्यादित्यर्थः ॥ तस्य वदनं चन्द्रवत् चन्द्रतुल्यं निर्मलमित्यर्थः ॥ भवेदिति ॥ गैरिकं ऽरुणपद्मं त्वमेघनादं निशाद्वयं ॥ दिष्ट्वा रंभांभसा लेपात् सप्ताहान्नीलिकां जयेत् ॥ २ ॥ गैरिकमिति ॥ गैरिकं गेरु इति प्रसिद्धं शोणपद्मं रक्तपद्ममिति प्रसिद्धं ॥ मेघनादं उत्तरस्य भाषया चौराई महाराष्ट्रभाषया चवळी इति च प्रसिद्धं ॥ तंदुलीयस्तु मेघनादस्तंडुली तंडुलीयकः ॥ गंडीरो लोहवीर्यश्च मेघनादो घनस्वनः इति राजनिघंटुः ॥ निशाद्वयं हरिद्राद्वयं ॥ हरिद्रा दारुहरिद्रा भेदेन द्विविधा हरिद्रामित्यर्थः ॥ निशा दार्वी काञ्चनी पीता हरिद्रा वरवर्णिनी ॥ ७०

संसिद्धं कटुतैलविमर्दनात् ॥ स्तनौ च्युतौ रोपीनौ निःसंकुर्यान्मृगीदृशां ॥४॥ दाडिमीति दाडिमी दाडिमं ब
इति प्रसिद्धा तत्कल्केन संसिद्धं कटुतैलं सार्षपतैलं विमर्दनात् निःसंमृगीदृशां स्त्रीणां स्तनौ च्युतौ रोर
मणीपतौ कुर्यादिति ॥४॥ तैलं तिलोद्भवं गव्यं घृतं चार्कपयः समं ॥ बलश्यामलता चोग्रं लज्जालुश्च नि
शाद्वयं ॥५॥ अथ स्तनविशालतासाधनप्रकारं सुमेनाह तैलमिति तिलोद्भवं तैलं गव्यं गोभवं घृतं चपु
नरर्कपयः अर्कस्य अकवन इ इति च प्रसिद्धस्य पयो दुग्धं ॥ अर्कोवसुक आस्फोत गणरूपविकीरणा
॥ मंदारश्चेत्यमरः ॥ बला बरियारी चिकणा इति च प्रसिद्धा श्यामलता नृपामाश्यामासंज्ञका सारिवासोलता
चेति ॥ गोधन इति प्रसिद्धा ॥ श्यामा तु महिलाह्वया ॥ लतागोवंदनी गुंद्रा प्रियंगुः फलिनी फली इत्यमरः ॥

७२

योजं त्रिकटु लज्जालु लेजनी छर्दि तिवनसि द्वा निशाद्वयं चेति ॥ सर्वं समं समभागमिति ॥ ५ ॥ एतेषां क
ल्कसहितं पक्वेन्म द्विगुणेनासु धीः ॥ तत्कल्केन कुचाः स्त्रीणां शीघ्रं यान्ति विशालतां ॥ ६ ॥ एतेषामिति ॥ एतेषां पूर्वो
क्तबलादीनां कल्केन सहितं ततः पूर्वोक्तं तैलादिकं सुधीर्मद्विगुणेन पक्वेत् तत्कल्केन स्त्रीणां कुचाः शीघ्रं विशाल
तां यान्ति प्राप्नुवन्ति ॥ ६ ॥ बाला तंडुलतोयेन तैलमेतत् सिवेद्यदि ॥ पीनोत्तुङ्गौ कुचौ तस्या न पतेतां कदाचन ॥ ७ ॥ बा
लेति ॥ बाला षोडशवार्षिका स्त्री तंडुलतोयेन तंडुलोदकेन सहैतत् पूर्वोक्तं तैलं यदि पिबेत् तर्हि तस्याः पीनोत्तुङ्गौ कु
चौ कदाचन न पतेतामिति ॥ ७ ॥ इत्यनंतरंगसारव्याख्यायां द्रावणादियोगनिरूपणनामकं षष्ठस्थलं व्याख्या ॥ ७ ॥
अथ वशीकरणादि निरूप्यते ॥ मयेस व्याहार्ये तथा च पूर्वस्थलविहितद्रावणादि निरूपणे । तत्र क्रमस्य

150

मधे तवर्गे मान इति साध्यलिस्त्वणाविषयभूतं वशीकरणादीलन्वयबोधः ॥ सारस्तु द्व सुसंक्षेपाद्वशीकरण
मोहनं ॥ कामनां प्रीतिजनकं किंचिदत्र निगद्यते ॥१॥ स्पष्टोऽर्थः ॥ तत्रादौ तिलकविधिः ॥ सुगमं ॥ लज्जालुमेधु
देहव्यं नलिनीमलमेव च ॥ एतान्पिष्ट्वा स्ववीर्येण यः कुर्यात्तिलकं पुमान् ॥२॥ अथ वशीकरणसाधनभूततिल
कप्रकारं पुष्पेनाह लज्जालुरिति यः पुमान् लज्जालुर्लाजालू इति प्रसिद्धा मधुकं ज्येष्ठमद इति प्रसि देहव्यं
गोघृतं नलिनीमलं कमलिनीमलं च एवमेतान् स्ववीर्येण निजरेतसा पिष्ट्वा संचूर्ण्य तिलकं कुर्यात् स्व
लाटे धारयेदित्यर्थः ॥२॥ तत्क्षणादेव नयति करतां भुवनत्रयं ॥ वात्स्यायनेन मुनिना प्रोक्तो योगोयमुत्त
मः ॥ तत्क्षणादिति ॥ स पुमान् तत्क्षणादेव भुवनत्रयं वशतामधीनतां नयति प्रापयति ॥ वात्स्यायनेन मु
३

७३

निनादमुत्तमोप्येषो योगो वशीकरणोपायः प्रोक्तः कथितं इति ॥३॥ सिताऽर्कमूलं मंजिष्ठा वचा मुस्ता सकुष्ठका ॥
स्त्रीयोनिरोगजिते तैले कीलूत्पललाटके ॥४॥ अथ द्वात्यं तिलकप्रकारं सुगमेनाह । सितेति सिताऽर्कमूलं श्वेत
अर्कवन इति रुस्नरूपी इति च प्रसिद्धस्य मूलं ॥ मंजिष्ठा उत्तरखंड भाषया मंजीठ इति प्रसिद्धा ॥ मंजिष्ठा विक
सा जिंगीत्यमरः ॥ वचा वेखंड इति प्रसिद्धा सकुष्ठका कुष्ठं कोष्ठ इति प्रसिद्धं तत्सहिता मुस्ता नागरमोथा
इति प्रसिद्धा ॥ कुरुविंदो मेघनामा मुस्ता मुस्तकमस्त्रियामित्यमरः ॥ यदेतत् स्त्रीयोनिरोगजिते तैले कीलू
त्पप्रशुभं तिलकं ललाट आधत्ते इत्युत्तरश्लोकेनान्वयः ॥४॥ शुभं तिलकमादधीतेयः स लोकत्रयं क्रमात् ॥ ह
रतः स्ववशं कुर्यान्मोदते च चिरं भुवि ॥५॥ शुभमिति ॥ हरतः स लोकत्रयं क्रमात् स्ववशं कुर्यात भुवि चिरं

७३

मोदते वेति ॥ ५ ॥ तगरं पिप्पलीमूलं मेषशृंगी कणा जटा ॥ एतत्समं स्वपंचांगमलैर्नालिप्तं सुधीः ॥ ६ ॥
अथान्यं प्रकारं सुमेनाह ॥ तगरमिति तगरं प्रसिद्धं ॥ पिप्पलीमूलं पिंपळीमूळ इति प्रसिद्धं ॥ ग्रंथिकं पिप्प
लीमूलमित्यमरः ॥ मेषशृंगी मेढशृंगी इति प्रसिद्धा ॥ अजशृंगी विषाणी स्यादित्यमरः ॥ कणा पिप्पली ॥ ज
टा जटामांसी इति प्रसिद्धा ॥ सुधीः पुमान् समसमभागमेतत्स्वस्य पंचांगानां मुखहस्तद्वयपादद्वयरूपाणां
पंचावयवानां मलैरेकृतां निसा मिश्रीकृत्य स्त्रीणां सुखवासरे भौममवारे मधुना सह तिलकं कुर्यादित्यग्रिमश्लो
केनान्वयः ॥ ६ ॥ मधुनेति तिलकं कुर्याच्च स्त्रीणां सुखवासरे ॥ जगत्सर्वं वशीकुर्यात्स पुमान्नात्र संशयः ॥
॥ ७ ॥ मधुनेति स पुमान् सर्वं जगत् वशीकुर्यात् अत्र संशयो नास्तीति ॥ ७ ॥ गोरोचनां समभागं स्वपुष्परुधि
गोरोचना च समभाग्य स्वपुष्परुधिरेण चोललाटे तिलकं कुर्यात् सा पती भर्ता

७५

रेणस्त्री । पत्तीवरकेनसंभाव्यसंमिश्र्य मर्दयित्वे सुर्ये ॥ नालेतिलकं कुर्यात्सा पतिं भ्रामयंतं मोहयेदि
ति ॥ ७ ॥ अथांजनविधिः ॥ सुगमं ॥ महाष्टमीदिने पत्तुस्मशानेन नरमस्तके ॥ पातितं कज्जलं विश्वं मोहयेन्न
यनांजनात् ॥ १ ॥ अथांजनप्रकारांतरं महाष्टमीत्यादि श्लोकैराह ॥ महाष्टमीति पत्तु महाष्टमीदिने नवरात्रांतर्ग
ताष्टमीदिवसे स्मशानेन नरमस्तकेन करोटयां पातितं तत्कज्जलं कर्त्तनयनांजनात् विश्वं मोहयेदिति ॥ १ ॥ रो
चनं केसरं कन्याशीलाचैभिर्विलोचने ॥ योंजयेत् दृष्टिपथगं सर्वमेव विमोहयेत् ॥ १ ॥ रोचनमिति रोचनं गोरो
चनं केसरं नागकेसरपुष्पं ॥ कन्याकुमारी उत्तरस्थभाषायां ग्वारमहाराष्ट्रभाषायां कोरफड इति प्रसिद्धा ॥
नरीयोरसो ग्राह्यः ॥ शीलामनः शिलाच एभिर्विलोचने नेत्रे अंजयेत् ॥ स दृष्टिपथगं हास्विपयं सर्वमेव वि

७

मोहयेत्॥१०॥ तालीसकुष्ठतगरैर्लिप्त्वा सौमे सुवर्तिकां॥ सिद्धार्थतैलं निक्षिप्य कज्जलं नरमस्तके॥११॥
अथान्यमंजनप्रकारं मुक्तमेनाह॥ तालीसेति तालीसं तालीसपत्रं कुष्ठं प्रसिद्धं तगरं प्रसिद्धं तत्त्वेति द्रव्यैः
क्षौमीं दुकूलां रंभकतंतुनिर्मितां सुवर्तिकां लिप्त्वा नरमस्तके सिद्धार्थतैलं शुक्लसर्षपतैलं निक्षिप्य कज्ज
लं पातयेदित्यर्थः तस्मिन्नंजनेनान्वयः॥११॥ पातयेदंजनात्तस्य सर्वदा भुवनत्रये॥ दृष्टिगोचरमायातः सर्वो भवति
दासवत्॥१२॥ पातयेदिति॥ तस्मांजनात्सर्वदा भुवनत्रये दृष्टिगोचरं दृग्विषयमायातः सर्वोपि दासवत् भ
वेदिति॥१२॥ शिलाकिंजल्कफलिनीरोचनानां तथांजनं॥ पुष्यार्कयोगे विहितं रंभस्याप्नेर्मोहनं परं॥१३॥ शिले
ति शिला मनःशिला किंजल्कः कमलकेसरं फलिनी प्रियंगुर्गौधनइति प्रसिद्धा रोचना गोरोचनान्येतिदं द्र

७५

स्तासां तथा तेन प्रकारेण पुष्पार्कयोगे विहितमंजनं दंपत्योः परस्परं दृढं मोहनं स्यादिति ॥१३॥ अथ चूर्णवि
धिः ॥ सुगमं ॥ काकजंघासितापक्षौ भ्रामरौ कुष्ठमुत्पले ॥ मलं नागरजं चैषां चूर्णं क्षिप्तं विमोहयेत् ॥१४॥ अथ
वशीकरणचूर्णप्रकारमाह ॥ काकजंघेति सितश्वेता काकजंघा कागइ इति प्रसिद्धा ॥ भ्रामरौ भ्रमरसंबंधिनौ प
क्षौ नागरतौ कुष्ठं कोष्ठ इति प्रसिद्धं ॥ उत्पलं कमलं तगरजं मलं चैषां चूर्णं कर्णे क्षिप्तं मस्तकादौ तत्कृतं सत् विमोह
येदिति ॥१४॥ नार्यां लिंकदलं पुंसो मलं मालारावस्य च ॥ पक्षावक्रे रिंदं चूर्णं क्षिप्तं शिरसि मोहनं ॥१५॥ वासा
लिंकेति ॥ वासावाहाडूळ इति प्रसिद्धा वा तन्नामितस्य दं ति क दले तत्समीपवर्तिदलं पुंसः मलं रावस्य मृतस्य
माला पुष्पादिस्त्रक् अलेर्भ्रमरस्य पक्षाविदं चूर्णं शिरसि क्षिप्तं सत् मोहनं स्यादिति ॥१५॥ समच्छदं शिखा

७५

146

खंचसस्यौणेदं समांशकं ॥ अमीषां शिरसि क्षिप्तं चूर्णं शिरसि मोहनं ॥ १६ ॥ समसूत्र्यमिति ॥ समसूत्रं रस
लेनइतिप्रसिद्धस्य पत्रं शिखा खंमयूरशिखासंज्ञकं ॥ वर्हिचूडा रसे स्वादुर्मेहकृच्छ्रविनाशिनी ॥ बाल
ग्रहादिदोषघ्नी वश्यकर्मणि शस्यते ॥ इति राजनिघंटुः ॥ कीदृशी सस्यौ नेमंडनाख्यभावप्रापुणेरा इति प्र
सिद्धेन सहितं समांशकं समभागममीषां सप्तद्रव्याणां चूर्णं शिरसि मस्तके क्षिप्तं सत् मोहनं स्यादिति ॥
॥ १६ ॥ अत्र सर्वत्र निर्धूमपरिभाषया विशेषतो नुक्तस्यैं द्रव्यप्रमाणाद्देश्य ग्रहणं कार्यं ॥ सा यथा ॥ अविशि
ष्टप्रयोगेषु मलं ग्राह्यं सगादिषु ॥ सामान्योक्तौ प्रमाणं च प्राहुस्तोयं च नाभसं ॥ चूर्णकल्ककषायाणां प्रमा
णं पञ्चनोदितं ॥ तत्र द्रव्यप्रमाणेन स्वपंबुध्या प्रयोजयेत् ॥ माध्वीकं सर्वमद्यानां मध्वानां माक्षिकं तथा ॥ ते

७६

लं नुतिलसंभतं धातवो वस्तिसंभवाः॥ वस्तिसंभवाः पारदगंधकादयः। शालीनां कृष्णशालिः स्यात् सूप्यानां मुद्गएव च॥ मूलानां पिप्पलीमूलं फलानां मरिचं फले॥ लघात् गंधद्रव्याणां पत्राणां गंधपत्रकं॥ जीवंतिरो डीशाकानां लवणानां च सैंधवं॥ सामान्यपुष्पनिर्देशान्मालती कुसुमं क्षिपेत्॥ इत्यमन्येप्रयोक्तव्याः प्र योगायोगकल्पिताः इति॥ २२॥ अभ्रभक्षणविधिः॥ सुगमं॥ अंत्रादि सर्वं निष्कास्य खंजरीठोदरं कुजे॥ प्र यिसास्य वीर्येण शरावसंपुटले क्षिपेत्॥ ७॥ अथ वशीकरणसाधनभूत वटिका प्रकारमाह॥ अंत्रादीत्यादि श्लोकत्रयेण॥ अंत्रादीति॥ सर्वमंत्रादि निष्कास्य खंजरीठोदरं खंजरीठस्य खंजनपक्षिणउदरं॥ खंज रीठस्तु खंजन इत्यमरः॥ स्ववीर्येण निजरेतसा परिपूर्य तच्चूर्णं कृत्वा शरावसंपुटले मन्मयपात्रे वेरा वद्धये

७६

क्षिपेत् तस्य पये हि सर्पः ॥१७॥ मुद्रां कृत्वा तदेकांते सप्ताहं धारयेत् सुधीः ॥ पश्चान्निष्कास्य संपिष्ट्वा वटीं कृ
त्वा विषे क्षिपेत् ॥१८॥ मुद्रामिति ॥ मुद्रां कृत्वा एकस्मिन् शरावे संस्थाप्यापरेण च्छादयित्वेत्यर्थः ॥ सुधी
स्तत् पक्वौषधं सप्ताहं सप्तदिनपर्यंतमेकांते धारयेत् । पश्चादनंतरं निष्कास्य वटीं कृत्वा विषे क्षिपेत् ॥१८॥
सा भक्षणविधानेन दीयमाना परस्परं ॥ दंपत्योर्मोहजननी कीर्तिता वटिकोत्तमा ॥१९॥ सेति ॥ सा वटिको
त्तमा भक्षणविधानेन परस्परमन्योन्यं दीयमाना सती दंपत्योः स्त्रीपुरुषयोर्मोहजननी कीर्तिता बुधैरि
ति शेषः ॥१९॥ अथ लेपनविधिः स्पष्टं ॥ यः स्वरेतः समादाय रतांते स्वपाणिना ॥ वामपादे स्त्रिया लिंपे
त् सा तस्य वशगा भवेत् ॥२०॥ य इति ॥ यो रतांते स्वरेतः स्वपाणिना निजवामहस्तेन समादाय गृहीत्वा

७७

ह्रिया वामपादे लिंपेत् सा स्त्री तस्य पुंसो वशगा अधीना भवेदिति ॥२०॥ यामोगशेषेकां तस्य लिंगं वामांघ्रि
णा स्पृशेत् ॥ यावदायुर्भवेद्दासः स तस्या नात्र संशयः ॥२१॥ अथ स्त्री कर्तृकं वशीकरणमाह यमेति यामोग
शेषे सुरतावसानसमये कांता तस्य लिंगं वामांघ्रिणा स्ववामचरणेन स्पृशेत् ॥ सकांतो यावदायुरामरणमि
त्यर्थः ॥ तस्याः स्त्रियाः दास अधीनः इत्यर्थः ॥ भवेदत्र विषये संशयो नास्तीति ॥२१॥ कपोतजिह्वा सिंधुस्यम
धुकैः समभागकैः ॥ लिप्ता लिंगं भजेद्यं सा वश्या स्याद्द्विवरांगना ॥२२॥ कपोतेति पुमान् समभागकैः सिंधु
त्थसैंधवलवणं मधुकानि मोहरइति प्रसिद्धस्य पुष्पाणि तानि चेति द्वंद्वः ॥ मधुकं तु गुडपुष्पमधुद्रुमाविस
मरः ॥ द्विहीनं प्रसवे सर्वमित्यमरः ॥ कपोतजिह्वा पारावतरसना ॥ पारावतः कलरवः कपोतोप्य शशादन

७७

स्मरः॥ तयापुक्तां निसिंधस्यमथकानितैर्लिंगं लिप्त्वा यां भजेत॥ पयासह मैथुनं कुर्यो दिसुधेः॥ साव
रांगना तस्य वश्या स्यात॥ हीति निश्चयार्थकमिति॥२२॥ घनसारं सभल्लूकमेढ्रं च मधुना सह॥ पिष्ट्वा लि
प्तध्वजो यां स्व भजेत्सा वशगा भवेत॥२३॥ घनसार मिति पुमान सभल्लूकमेढ्रं कृष्णलिंगसहितं॥ कृष्णा
भ्रमभल्लूकाः मेढ्रो मेहनशेफसी स्मरभपश्चापमरः॥ घनसारं कर्पूरं मधुना माक्षिकेण सह पिष्ट्वा
लिप्तध्वजो लिप्तलिंगः सन्यां भजेत सा वशगा स्वाधीना तां प्राप्ता भवेद्धीति॥२३॥ रोचना कनकं रां भुबीं।
जं कस्रूपे स्वेदने॥ एभि विलिप्तलिंगो यां भजते सा वशा भवेत॥२४॥ रोचनेति रोचना गोरोचनं कनकं
धत्तूरबीजं रां भुबीजं पारदः॥ कर्पूरं स्वेदने प्रसिद्धे॥ एभिर्लिप्तलिंगः पुमान्यां भजते सा वशगाधीना

७८

भवेदिति ॥२४॥ अथ धूपविधानं ॥ चंदनं कुंकुमं व्याधिं कलिंगं कुसुमं जलं ॥ देवदारुं वचां पिष्ट्वा मधुना सह
मिश्रयेत् ॥२५॥ अथ चिंतामण्याख्यधूपमाह ॥ पुष्पेन ॥ चंद्रनामिति चंदनं ॥ कुंकुमं केसरं ॥ कुंकुमं घुसृणं
वर्णं प्रोक्तं ललो हेमचंदनं ॥ काश्मीरजं च विद्वद्भिः कालेयं जागलं स्मृतमिति हलायुधः ॥ व्याधिं कोष्ठ इति
प्रसिद्धं ॥ व्याधिः कुष्ठं पारिभाव्यमित्यमरः ॥ कालिंगं कडुंगर इति प्रसिद्धस्य बीजं कलिंगो मधुरस्त्रीतः पि
त्तदाहश्रमापनुत् ॥ वृष्यः संतर्पणो बल्यो वीर्यपुष्टिविवर्धन इति राजनिघंटुः ॥ कुसुमं मालतीपुष्पं सा
मान्यपुष्पनिर्देशात् मालतीकुसुमं क्षिपेदिति राजनिघंटुक्तेः ॥ जलं गाठवाळा इति प्रसिद्धं ॥ देवदारु
प्रसिद्धं वचा वेखंड इति प्रसिद्धा ॥ पिष्ट्वा संचूर्ण्य मधुना सह मिश्रयेत् ॥२६॥ चिंतामणिरिति ख्यातो धूपः

७

152

परमनोहरः॥ एवम्प्रयुक्तो विधिनासर्वकार्यो गिताधयेत्॥२५॥ स्वर्षहोर्यः॥ एलासर्जरसस्तार्क्ष्यं चंदनंसुव
तीवचा॥ शृंगीचैभिः समेर्धूपात् सर्वं विश्वं विमोहयेत्॥२६॥ एलेति एला लायचीति प्रसिद्धा॥१॥ छवी॥ कांच
द्रवलैले समरः॥ सर्जरसः राळ इति प्रसिद्धस्य वृक्षस्य निर्यासः॥ शाले तु सर्जकार्ष्याश्वकर्णकाः सस्यसं
वैः इत्यमरः॥ तार्क्ष्यं रसांजनं इति प्रसिद्धं॥ रसांजनं तत्र दारुहरिद्रा निर्मितः क्वाथविशेषः॥ तार्क्ष्यः स्यादश्व
कर्णाख्यवृक्षे रथकुरंगयोः॥ तार्क्ष्यं रसांजने तार्क्ष्यो गरुडे गरुडाग्रजे इति विश्वः॥ चंदनं प्रसिद्धं॥ सुवती प्रि
यंगुर्गोधन इति प्रसिद्धा॥ श्यामा तु महिलाह्वया॥ लता गोवंदनी गुंद्रेत्यमरः॥ वचोग्रगंधा॥ शृंगी काकडा
शिंगीति प्रसिद्धा॥ समैरेभिर्धूपात् सर्वं विश्वं मोहयेत् पुरुष इति शेषः॥२६॥ अथ कामेश्वरमंत्रविधानं॥ सु

गमं ॥ प्राक्पूर्वकामेश्वरोक्त्वा प्रणवादितः ततो मुद्रां ह्रीं ॥ आनयानयमेस्वंतं वशानां क्लीं ततः पदं ॥ २७ ॥ अथ
कामेश्वरमंत्रमाह प्रागिति ॥ प्राक् पूर्वं प्रणव ओंकार आदिर्यस्य से वंभूतं कामेश्वरेति वर्णचतुष्टयमुक्त्वा
ततो वर्णचतुष्टयानंतरममुकीमित्युक्त्वा ॥ पावरी कर्तुमिष्टाद्दितीयांतेन नामा वार्यं स्यर्थः ॥ ततआनया
नयमेस्वंतं वशानामित्युक्त्वा ततः क्लीं पदमुच्चार्यमितिशेषः ॥ २८ ॥ अयं कामेश्वरो मंत्रः करवकुसुमैः सह ॥
पलाशकुसुमैश्चापसंजप्तो युतसंख्यया ॥ २९ ॥ अयमिति ॥ अयं ॐ कामेश्वरामुकीमानयानयमेस्वंतं
वशानां क्लीं नेवंरूपः कामेश्वरमंत्रो युतसंख्यया जप्तः सन् करवकुसुमैः सहपलाशकुसुमैर्दशांशहो
मेनसर्वसिद्धिप्रदः स्मृत इत्युत्तरश्लोकेनान्वयः ॥ ३० ॥ तथा दशांशहोमेन सर्वसिद्धिप्रदः स्मृतः ॥ अ

नेनजप्तंपुष्पादिरक्तंपरममोहनं॥२८॥स्पष्टोर्थः॥अथचामुंडामंत्रः॥सुगमं॥चामुंडेमोहयाद्धेनांवशंतान
यचामुंकी॥स्वाहापदं॥हस्फुकश्चामुंडामंत्रउत्तमः॥३०॥चामुंडेति॥चामुंडेमोहयेनांवशंतानयचामुंकी॥
स्वाहेतिमंत्रः॥पलाशकुसुमैरक्तैर्लक्षसंख्याहुतांशतः॥होमेनवामविधिनासर्वसिद्धिंप्रविंदति॥३१॥पलाशे
ति॥एतंमंत्रंवामविधितावामप्रकारेणस्पष्टं॥३१॥इमंमंत्रेणजप्तानिसप्तधाकुसुमानिच॥रक्तानिवशगा
कुर्युः कामिनीनात्रसंशयः॥३२॥इमीति॥इतिमंत्रेणसप्तधाजप्तानि॥सप्तवारमभिमंत्रितानीस्पष्टः॥शेषंस्पष्टं॥
३२॥अथपद्मिनीवशीकरणं॥सुगमं॥कामेश्वरपदंदद्यात्मेकाराद्यमनोहय॥स्वाहांतंमंत्रमेतोयंत्रंनागवल्लीदलेलि
खेत्॥३३॥कामेश्वरेति॥पदंप्रथममेकारादिकामेश्वरपदंअथस्वाहास्वाहेतिवर्णद्वयमंतेयस्येवंभूतंमोह

नमो हर्षपेति पदं इति मंत्रं ॥ ॐ कामेश्वर मोहय स्वाहेति मनुना नागवल्लीदले तांबूली पत्रे ॥ तांबूलमध्ये तांबूलीना
गवल्लपत्रपर्णेत्यमरः ॥ क्षिपेदिति ॥ २३ ॥ पुष्पेण मधुयुक्तेन रविवारेभिमंत्रितं ॥ शतधा दीपमानं तत स्त्रिनीव
शमानयेत ॥ २४ ॥ पुष्पेणेति रविवारे मधुयुक्तेन पुष्पेण शतधाभिमंत्रितं ॥ मधुयुक्तेन पुष्पेणे सस्य पर्वस्लो
कान्वयि विंवा ॥ दीपमानं तत नागवल्ली दलं पद्मिनी वशमानयेत ॥ २४ ॥ ॐ कारादि तदं प्रोक्तं विहंगमपदद्वयं ॥
कामदेवाय तस्मै च स्वाहेत्यन्तं मनोभुवः ॥ ॐ कारेति ॥ ॐ ॐ विहंगम विहंगम कामदेवाय तस्मै स्वाहेति म
नोभुवः कामस्यास्त्रं मनुस्तं शस्त्रं स्यादिति ॥ २५ ॥ पिष्ट्वा जाती फलं रंभा मूलं तोयेन लेपयेत ॥ संघोष्यमानु
क्षिरेण नागवल्ली दले क्षिपेत् ॥ २६ ॥ पिष्ट्वेति रंभा मूल तोयेन कदली मूलोदकेन जाती फलं प्रसिद्धं शेषं स्पष्टं ॥ २६

निमंत्र्यानेन मंत्रेण रविवारे प्रदापयेत्॥ स्तद्दक्षणमात्रेण स्त्रियो वशगा भवेत्॥ ३७॥ निमंत्र्येति॥ अनेन पूर्वो

क्तेन मंत्रेण निमंत्र्याभिमंत्र्य शेषं स्पष्टं॥ ३८॥ अथ शंखिनीवशीकरणं॥ ॐ नमो भगवति स्वाहा। तं च पदद्वयं॥ अ

यं महासिद्धमंत्रः कीर्तितः पूर्वसूरिभिः॥ ३९॥ ॐ नमो भगवति स्वाहा॥ अंते पदसे सेवं भगवति पदद्वयं ओं नमो भगवति स्वाहाकार कंदर्प मं

त्रो नमः॥ कामस्यायतनस्मादिति शिरो शेषं स्पष्टं॥ विघ्नमाक्षर पारभेदः॥ तत्तु ध्यानं चरित्र लोकस्येदया॥ विघ्नमाक्षरपा

रं वा पादे रस्म मंत्र साधयेत्॥ क्रकर शंखिनी नाम मंत्रगणैः कीर्तितः सिद्धिभिः प्रोक्तमिति॥ ३०॥ मंत्रेणानेन संजप्य मूलं तगर

संभवं॥ श्रीफले च वसेद्ध्यात् शंखिनीं वशतां नयेत्॥ ३१॥ मंत्रेणेति॥ श्रीफले बिल्वफले॥ बिल्वे शंखिन्या पौ

ष्पो मालूरश्रीफलावपीत्यमरः॥ शेषं स्पष्टं॥ ३२॥ अथ हस्तिनीवशीकरणं॥ स्पष्टोर्थः॥ ॐ कारोपि रिपुर्गंतेच

कामदेवायर्चेत्सदा ॥ तस्मै स्वाहेति कथितो मंत्रश्रेष्ठो मुनीश्वरैः ॥ ४० ॥ ॐ मितिॐ धिरि धिरि कामदेवाय
तस्मै स्वाहेति मंत्रश्रेष्ठो मुनीश्वरैः कथित इति ॥ ४० ॥ कपोतपक्षं संदिह्य मधुनाथ तिमंत्रयेत् ॥ मंत्रेणाने
न तद्दानाद्धस्तिनी वशगा भवेत् ॥ ४१ ॥ कपोतेति ॥ कपोतपक्षं पारावतगरुतं मधुना संदिह्य पानेन मंत्रेणानि
मंत्रयेत् अभिमंत्रयेत् ॥ तद्दानात् तादृशकपोतपक्षदानात् ॥ हस्तिनी वशगा स्वाधीना भवेदिति ॥ अथांगरागा
दिकमुच्यते ॥ स्पष्टार्थः ॥ समुत्थितानुरागाणां रत्युत्सवविलासिनाम् ॥ कामिनां प्रीतिजननं अंगरागादिकं ब्रुवे
४२ ॥ समुत्थितेति ॥ अंगरागं दृष्टिनंतरादिकं ब्रुवे ॥ ४३ ॥ चंदनोशीरपथ्यानिर्लोध्रामत्रसकसमुद्भवः ॥ लेपः
स्वेदजदौर्गन्ध्यहरस्यांगुविलासिनाम् ॥ ४४ ॥ चंदनोशीरेति ॥ चंदनं प्रसिद्धं ॥ उशीरं वाळा इति प्रसिद्धं ॥ पथ्या ह

रीतकी ॥ आर्त्तिः कुष्ठं लोध्र आम्रत्वक् प्रसिद्धा एतत्समुद्भूतो लेपो विलासिनां ॥ स्वेदजदौर्गंध्यं घर्मजदुर्गंधं मा

शु हरतीति ॥ ४४ ॥ पथ्यानिंबदलं लोध्रं दाडिमीसप्तपत्रयोः ॥ वल्कलं च प्रलेपोयमंगदुर्गंधनाशनः ॥ ४५ ॥ पथ्ये

ति ॥ पथ्या हरीतकी अभया लव्ययापथ्ये समगः ॥ निंबदलं निंबपत्रं लोध्रं दाडिमी प्रसिद्धा सप्तपत्रः सप्तनर इ

ति प्रसिद्धः सप्तपत्रः वल्कलं ॥ तत्कल्कस्य प्रलेपो मुखदुर्गंधनाशनो भवेदिति ॥ ४५ ॥ चिंचाफलं करंजस्य बीजे

नाथ हरीतकी ॥ बिल्वमूलेन कक्षादिदुर्गंधहरणं द्वयं ॥ ४६ ॥ चिंचेति ॥ करंजस्य बीजेन सह चिंचाफलं मय

बिल्वमूलेन सहिता हरीतकी एतत् द्वयं कक्षादिदुर्गंधहरणं भवेत् ॥ प्रोक्तदुर्गंधहरणमिदं भेषजं द्वयमिस्य

र्थः ॥ नागपुष्पाग[illegible]रकोलमज्जां च्छुचंदनेः ॥ लिप्तांगो बिनिहंत्याशु दुर्गंधं स्वेदवारिजं ॥ ४७ ॥ नागेति ना

८२

मैकदेशेननामग्रहणमितिन्यायेननागशब्देननागकेसरस्तस्यपुष्पंतन्नागरःप्रसिद्धउशीरं।भाषायांवाळातुरईइति
चप्रसिद्धं॥स्याद्वीरणंवीरतरंमूलेस्योशीरमस्त्रियां॥अभयंनलदंसेव्यमित्यमरः॥कोलमज्जाबदरीफ
लास्थिरंबुगडेकाल॥इतिप्रसिद्धंचंदनंप्रसिद्धंतच्चेतिद्वंद्वस्तैः॥गंधसारोमलयजोभद्रश्रीश्चंदनोस्त्रियामित्य
मरः॥लिप्तमंगंदेनेस्वेदभतःपुरुषःस्वेदवारिजंदुर्गंधमाशुवैनिहंतिनाशयतीति॥४९॥श्वेतपीलुतरोःपु
ष्पंतथाजंबूफलंसमं॥एतद्देहेनिदाघेषुलिप्तंघर्मोद्भवनाशनं॥५०॥श्वेतेति॥श्वेतपीलुतरोगुर्जरदेशेपीलु
इतिप्रसिद्धस्यवृक्षस्यपुष्पंपीलुःशीतफलःस्रंसीधारीगुडफलोपिचेत्यभिधानात्॥तथाजंबूफलंजांबुवी
इतिप्रसिद्धवृक्षस्यफलं॥जंबूःसुरभिपत्राचेत्यमरः॥समंसमभागमेतत्निदाघेषुदेहेलिप्तंसत्घर्मोद्भवना

८२

शानं भवेदिति ॥४८॥ पिचुमंदफलं भोस्तै ध्रदाडिमवल्कलेन ॥ निदाघकाले लिप्तांगो घर्मवारिचयं जयेत ॥४९॥
पिचुमंदेति ॥ अंभो दो नागरमोथाइति प्रसिद्धं लोध्रं प्रसिद्धं दाडिमीवल्कलं दाडिमीत्वक तज्जेति द्वंद्वः पिचुमं
दफलैर्भाव्यमानिंबो कीर्तितमासिद्धं सहितान्यंभोहलोध्रदाडिमीवल्कला निर्तै निदाघकाले ग्रीष्मकाले लि
प्तांगो घर्मवारिचयं जयेत ॥ हरीकुर्पादिस्पर्धः ॥४९॥ शिरीषकेशरोशीरलोध्रैरंगाविरूक्षणात ॥ रूक्षणाद्धि
घर्मांबु निदाघे नैव विद्यते ॥५०॥ शिरीषेति शिरीषं शिरीष इति प्रसिद्धस्य फूलं ॥ पुन्नागकेसरो नागकेसर उ
शीरं प्रसिद्धं लोध्रं चेति द्वंद्वस्तै रंगाविरूक्षणात गात्रमर्दनात शरीरविभिन्नत्व रूक्षणाद्रूपुरुषो निदाघे ग्री
ष्मे घर्मधारितापिंडी तीनप्राप्नोति ॥५१॥ अथ स्नानीयसुगंधिविधिः ॥ सुगंधं ॥ बिल्वपत्रं मरुवकमरो दकु

(16)

८३

सुमानिच॥ क्रमात् पुष्पाणि केतक्याः क्षिप्त्वा तत्र निधापयेत्॥ ५१॥ अथ महापरिमलाख्यतैलप्रकारं पुष्पेनाह॥
बिल्वेति॥ बिल्वपत्रं प्रसिद्धं मरुबकं मरुवा इति प्रसिद्धस्य पुष्पं समीरणो मरुबकः प्रस्थपुष्पः फणिज्झक इत्यम
रः॥ अशोककुसुमान्यशोकपुष्पाणि केतक्याः पुष्पाणि क्रमात्तैस्तत्र तैले क्षिप्त्वा आतपे निधापयेत् तस्मादपेदि स्फुत
रेणान्वयः॥ ५१॥ आतपेशुष्कपुष्पाणि ततो निष्कासयेन्नरः॥ महापरिमलं तैलं ख्यातं योगं दिव्यनासिकं॥ ५२॥
आतपइति॥ नरस्तस्मात्तैलात् शुष्कपुष्पाणि निष्कासयेत्॥ नासिकायां योगं महान् परिमलो धर्मरोगं स्पर्शो यस्
स्मिन्निति संभृतं तैलं ख्यातमिति॥ ५२॥ एलांबु नलदं स्वर्णं नासी कर्पूरपत्रकैः॥ स्नात्वा सुगंधिं परमं मर्त्ये जानां प्र
विंदति॥ ५३॥ एलेति॥ एला प्रसिद्धा अंबु गाठेवाला इति प्रसिद्धं नलदं जटामांसी इति प्रसिद्धं स्वर्णपीतचंपकपुष्पिका॥ नागि

८३

(162)

स्का प्र।भिकांबष्टासा पीताहेमपुष्पिकेसमर ॥ मांसी जटामासीति प्रसिद्धा कर्पूरः प्रसिद्धः पत्रकं प्रसिद्धं त्वचेति हृद्दस्तैः
त्तालामर्धं आनांकेशानां परमं सुगंधं प्रविरतिप्राप्नोति ॥ ५३ ॥ धात्री स्वर्णं घनोशीर पथ्या मांसी ॥ दिलेपनैः ॥ त्तालामा
सार्धमाघनैकेरासैरभ्यनुत्तमं ॥ ५४ ॥ धात्रीति ॥ धात्र्यामलकी स्वर्णा पीतपुष्पिका घनो नागरमोथा इति प्रसिद्धः ॥ उशी
रं वाला इति प्रसिद्धं पथ्या हरीतकी मांसी जटामासीति प्रसिद्धा साम्येतिहृद्दस्तासां विलेपनैः मासार्धं दशपर्यंतामुत्तमं के
रासैरभ्यं केशसौगंध्यमाधत्त इति ॥ ५५ ॥ चंदनेला सटी पत्र शिग्रुदध्यंबुतोयदैः ॥ सामम्पेलं पक्कोयं सुगंधिः कामि
वल्लभः ॥ ५५ ॥ चंदनेलेति अयं सामम्पे लेकामय कोष्ठइति प्रसिद्धस्तैन सहितैः चंदनं प्रसिद्धं एला प्रसिद्धा सटी गह्
ला इति प्रसिद्धा ॥ संस्पर्शाद सटी गंधमलीपह गंधिकेसपिकर्दूरो पीलवीसमरः ॥ पत्रं प्रसिद्धं शिग्रुर्मुनगा इ

८४

ति प्रसिद्धः पद्मचारिणीत्यस्यां अंबु गाठेवाळा इति प्रसिद्धं तोयदो नागरमोथा इति प्रसिद्धः स्पृक्केति द्वयं द्वयैर्लेपस्तज्जन्यो ले
पः स्पर्द्धः ॥ कामिवल्लभः कामिप्रियः स्यादिति ॥८८॥ कश्मीरं कुंकुमं लोध्रं स्थौणेयं जलमंबुदः ॥ उशीरं च समैरेभिर्लेपः
स्यात्सुरभिः परः ॥८९॥ कश्मीरमिति ॥ काश्मीरं च कुंकुमं केसरं लोध्रं स्थौणेयं थुणेर इति पर नाम कं गाठवना ख्यं सुगंधि
द्रव्यं ग्रंथिपर्णं शुकं बर्हपुष्पं स्थौणेयं कुक्कुरं इत्यमरः ॥ जलं गाठेवाळा इति प्रसिद्धं अंबुदो नागमोथा इति प्र
सिद्धः ॥ उशीरं प्रसिद्धं एभिश्च समैरेभिर्लेपः दाः सुरभिः सुगंधिः स्यादिति ॥८९॥ पद्मांबुवेरनोशीरकृष्णाग
रुसमुद्भवः ॥ लेपः कृतोऽधमंगेषु सौरभ्यं परमं दिशेत् ॥९०॥ पद्मांबुवेति ॥ पद्मं प्रसिद्धं तच्च अंबु पूर्वोक्तं वेरनं उशीरः
कृष्णागरुः प्रसिद्धः स्पृक्केति द्वयं द्वयसमुद्भवो लेपोऽधमंगेषु कृतः सन् परं सौरभ्यं दिशेत् दद्यादिति ॥९०॥ अथ सर्वांगीम

८४

१६४

सुगंधिः ॥ स्वदष्टोर्थे ॥ कस्तुरी नागकुसुमं शैलेयं चंदनं घनः ॥ श्रीवासः कनकाचंद्रो जातीस्थौणेयपूतिकं ॥ ५८ ॥ अथ
सर्वेषाम सुगंधिद्रव्याणामर्थः ॥ कस्तूरी नागकुसुमं कारपुष्पेनाह ॥ कस्तूरीति ॥ कस्तूरी प्रसिद्धा ॥ नागकुसुमं नागके
सर इति प्रसिद्धं ॥ शैलेयं शैलज इति प्रसिद्धं चंदनं ॥ घनो नागरमोथा इति प्रसिद्धः ॥ श्रीवासो गारवाडर इति च
प्रसिद्धः ॥ श्रीवासो वृक्षधूपोपि समरः ॥ कनका पीतपधिका चंद्रः कर्पूरं ॥ जाती मालती पुष्पं स्थौणेयं पर्वतोत्प
तिकं करंजबीजं चेति जातिरप्राणिनामिति द्वंद्वैकवद्भावः ॥ करंजके प्रकीर्यः पूतिकरजः पूतिकालेमारकुसुमः ॥
५८ ॥ सुसक्ष्मपिष्टैरेभिस्तु नागवल्लीदलोद्भवैः ॥ रसैर्लेपः सुगंधोपयुक्तो योग्यो महीभृतां ॥ ५९ ॥ सुसक्ष्मेति ॥ सुस
क्ष्मं पिष्टैरेभिः पर्वश्लोकोक्तैर्नागवल्लीदलोद्भवैरसैर्लेपस्ताम्बूलपत्ररसैर्युक्तः महीभृतां राज्ञां योग्य उक्तः ॥ ५९ ॥

८५

स्यात्तोयस्य भागैकं पथ्याभागचतुष्टयं ॥ व्याधिः स्यौणेयचंद्राणां प्रत्येकं भागयुग्मकं ॥ ५०॥ अथ कस्तूरीदलसं
ज्ञकं सुगंधिं पुष्पेनाहस्याहिति ॥ तोयं ह्रस्वतागरतो ध्या इति प्रसिद्धस्य भागैकमेको भागइस्सुर्भेः ॥ पथ्या हरीतकी
नागो नागकेसरस्तस्यो भागचतुष्टयं स्यात् ॥ व्याधिः कुष्ठं कोष्ठ इति प्रसिद्धः स्यौणेयं मुरा स्तु भावपायुणेरा इ
ति प्रसिद्धं सुगंधिद्रव्यं ॥ चंद्रः कर्पूरः स्त्रेणी द्वंद्वं तेषां प्रत्येकं भागयुग्मकं भागद्वयमिति ॥ ५९॥ शिलात्मजस्य दं
चैस्युर्नव भागा नखस्य तु ॥ एभिः स्यात्कः सुगंधो यं कस्तूरीदलसंज्ञकः ॥ ६०॥ शिलेति । शिलात्मजस्य शिलाजमिति
प्रसिद्धस्य पंचभागाः नखस्य प्रसिद्धस्य नव भागाः स्युः स्यमेभिः पर्वोक्तैः सुगंधः कस्तूरीदलसंज्ञकः स्यादि
ति ॥ ६०॥ नखपथ्यामयाभोटैर्मांसीनाकुकरंजकः ॥ समास्त्वर्णो भसोत्कं प्रत्येकं भागयुग्मकं ॥ ६१॥ अथ सो

८८

रम्भगर्भो रख्यं लेपं श्लोकैस्त्रयेणाह ॥ नखेति नखं प्रसिद्धं पथ्या हरीतकी आमयः कुष्ठं अंभोदो नागरमोथा इति प्र
सिद्धः ॥ मांसी जटामांसी ति प्रसिद्धा नागो माडइति प्रसिद्धः ॥ माडो माडद्रुमो दीर्घो ध्वंसहश्चेति तालकः ॥ माडस्तु
शिशिरो रूक्षः कषायः पित्तदाहनुत् इति राजनिघंटुः ॥ करंज कश्चेति द्वंद्वः एते समाः समभागाः ॥ स्वर्णापीतपुष्पि
का पुष्प मं भोगा ठेवाला इति प्रसिद्धं तत्स्वेपीद्वंद्वः समोः प्रत्येकं भागचतुष्कं भागद्वयमुक्तमिति ॥ ६१ ॥ कर्पूरागु
रुकस्तूरीजातीस्थौणेयकस्य च ॥ भागत्रिकं स्यात्प्रत्येकं सर्वैरेभिरिहोच्यते ॥ ६२ ॥ कर्पूर इति कर्पूरः प्रसिद्धः ॥
अगरुः प्रसिद्धः कस्तूरी प्रसिद्धा जाती मालती स्थौणेयकं पर्वो गंठो इति द्वंद्वैकवद्भावस्तस्य प्रत्येकं भागत्रिकं
स्यात् ॥ इह सर्वैरेभिः सौरम्भगर्भाख्यो लेपः स्यात् इत्युत्तरश्लोकेनान्वयः ॥ ६२ ॥ लेपः सौरम्भगर्भाख्यः सर्व

८६

सर्वलोकमनोरमः॥ भनुजामेवयोप्यो पमत्येषां दुर्लभस्यतः॥ ६२॥ लेपइति॥ स्पष्टोर्थः॥ अथमुखवास विधिः॥ स्प
ष्टोर्थः॥ मकपत्रे लानखस्वर्णजातीभिःकारयेद्वटी॥ तांबूलपुक्तासामुक्तावक्त्रं सुरभितां नयेत्॥ ६४॥ लगिति लव
पत्रांतज इतिप्रसिद्धं॥ लवकपत्रांत सूक्ष्मभंगं त्वचं वोचंवरागकमिद्रमरः॥ एलाप्रसिद्धानखं प्रसिद्धं स्वर्णजातीपीत
मालतीसा चेति द्वंद्वस्ताभिर्वटीकारयेत अत्यसुगमं॥ ६४॥ केसरं कोलमज्जा वल्को णेयं जातिपुष्पकं॥ वटिका
मधुनैतेषां कृतावक्त्रंसुवासयेत॥ ६०॥ केसरइति॥ केसरो नागकेसरः कोलमज्जाव हरीफलाद्दिः स्योणेयंप
र्वतकंसुगंधि द्रव्यं॥ जातिपुष्पकं मालतीपुष्पं मधुना कृताए वांवटिका वक्त्रं सुवासयेदिति॥ ६५॥ सुराकिं जल्क
कुष्ठानांचूर्णलीढं हि संधयेत॥ कर्पूरगंधिवदनं कुर्यान्मासाद्दितोध्रुवं॥ ६६॥ मुरेति मुरा सुगंधि द्रव्यविशेषः॥ ता७ ८८

पर्णी मुरैसांगं धुकुटी मुरा। गंधिनी स्यान्मरः॥ किंजल्कः कमलकेसरः कुहंदसिद्धंतच्चेतिदं द्रुस्तेपां वर्णसंध्ययो
लीढमात्वादितं सततरोषं सुगमं॥ ६६॥ करंजबीजकुष्ठेस्यं पर्णमधुघृतान्वितं॥ योऽत्वेद्दिमासंतद्वक्त्रं केतकीगंधव
द्भवेत्॥ ६७॥ करंजेति॥ योमासमासपर्यंतं करंजबीजेन युक्तं कुष्ठं तदुस्थं तद्रुसल्लं मधु घृतान्वितं॥ चर्पलेद्दा
स्यात्स्यातितद्वक्त्रं केतकीगंधवत् केतकीगंधतुल्यगंधयुक्तंमभवतं भवेदिति॥ ६७॥ आम्रपत्ररसेक्षारं मार्गवृक्षभवं
शिवेत्॥ संशोष्य भानुकिरणे भक्षेतांबूलमध्यगं॥ ६८॥ आम्रेति॥ आम्रपत्ररसेमार्गवृक्षभवं स्यात तरवदिरव
शोष्यं। सोमसारोऽने मेदकस्सोमवल्कः अधिदुमं इरिराजनिर्घंटुः॥ क्षारं क्षिपेत्॥ शोषं स्पष्टं॥ ६९॥ प्रातःप्राति
दिनं यस्तु सुगंधिः स्यात्तदानने॥ सर्वपुसुरवासस्य योगेप्वयममनुत्तमः॥ ६९॥ प्रातरिति अनुत्तमः न विद्यते उ

८७

नमोयस्मादिस्येवं भूतः शोषं सुगमामिति॥ ६२॥ इति सनंगरंगव्याख्यायां वशीकरणादिनिरूपणं नाम कसप्तकस्थ लव्याख्या॥ ॥७॥ अथ विवाहादि सुहृदेशाः॥ अथ वशीकरणादिनिरूपणानंतरं विवाहादीनामुद्देशेनाभासं कीर्तनं क्रियत इति शेषः॥ विद्यासौम्यविवेकधैर्यमहिते शुद्धे स्वधर्मस्थिते विख्याते धनधान्यवैभवयुते जाता समाने कुले॥ कन्या दोषविवर्जिता गुणवती सद्भालका सुंदरी सद्भिः शास्त्रविधानतः स्मरकलायोग्या विवाह्या सदा॥ ॥१॥ अथ विवाहयोग्यकन्यास्वरूपमाह॥ विद्येति श्लोकार्थः स्पष्टः॥ अथ कन्यादानलक्षणानि॥ नीलांभोरुहपत्रकांतिरथवा स्वर्णप्रभाभासुरा भृंगीनीलशिरोरुहा शशिमुखी सारंगनेत्रा शुभा॥ स्याद्यस्याः तिलपुष्पसन्नसरुग्नी नासा सुदंतावली सुश्रोत्रापिकभाषिणी जलजग्रीवाथ बिंबाधरा॥ २॥ अथ वरकर्तव्यानि ग्रहणयो

८७

178

ग्यानि कन्यानिष्ठचिन्हानि नीलंभोरुहेत्यादिश्लोकद्वयेनाह ॥ नीलंभोरुहेतिजलजग्रीवाकंबुकंठीश्लोकार्थः
स्पष्टः ॥ चकारार्थं क्लितं ॥ गणपाणिचरणाश्यामोदरीस्वल्पसुकर्णभार्सतामनोहरोरस्तुगलाश्रोण्याद्हस्तान्विता ॥
नाम्राचैवसुनम्रयागजगतिः शांताल्पनिद्रालसाशीलाढ्यासुकुमारिकावरकरैः कन्याविवाह्यासदा ॥ ३ ॥ स्पष्टोर्थः
॥ अथकन्यादूषणानि ॥ अथवरकर्तृकपाणिग्रहणायोग्यलंसंपादकानि कन्यासंस्थचिन्हानि ॥ क्रूरेत्यादिश्लो
कत्रयेणाह ॥ क्रूरापिंगलकेशाः लोचनवतीस्वर्वानिर्दीर्घाकृशगालंबोष्ठीपृथुकंधरान्वबद्धुस्तुकस्पामाथरादंतु
रा ॥ वाचालाविषमस्तनी द्रुतगतिः श्मश्रुस्वरा कोपिनीरक्तापल्लवजिह्विकातिकठिनासरमश्रुकालोनरा ॥ ४ ॥
निद्राशोककृतीसदाप्रचलतेयस्याःप्रकंपेदुराहास्याच्चापितरंगितोप्रभयतागद्गदोन्मर्शानंचलो ॥ अंगुष्ठार

८८

धिका भवेत्तदुपगा पादे तथानामिकासांप्रातोथ रंगीस्फुरो ह्रस्वा भवेन्मध्या तु हीनाग्रका ॥५॥ निर्दोतिपस्याःपादे
तदुपगा अंगुष्ठोपगा तर्जनी स्पर्धेः ॥ अंगुष्ठादधिका भवेत् ॥ तयासांप्रा कनिष्ठासहितानामिका धरणीनोस्पृशे
त् ॥ अथ मध्या तु हीनाग्रका भवेत् ॥ चलनं इत्यस्याभ्यास्तु वंगः कार्येः ॥ पंडितैः सा अबलाकन्या विवाहकर्मणि सदा
त्याज्येत्यर्थः ॥ शेषं सुगमं ॥ ५ ॥ अस्ताता गिरिपाक्षिभरुहनदीनक्षत्रसंज्ञा च या प्रोदारोमसमाकु
लाचरा कलभवल्लरी निरूपा ॥ गंडो कूपमुगालितौ विरुधती हीनाधिकांगी तथा दुःशीला च विवाहकर्मणि सदा
त्याज्या वला पंडितैः ॥ ६ ॥ अस्तातेति स्पष्टार्थः ॥ ६ ॥ अथ जामातृलक्षणानि ॥ विद्यार्थोपेधनाश्रयो गुणनिधिः
ख्यातो युवा सुंदरः साचारः सुकुलोद्भवो मधुरवाक् दाता दयासागरः ॥ भोगी भूरि कुटुंबवान् स्थिरमतिः पा

८८

172

धार्मिर्हीनोबली॥ जामातापरिवर्णितः कथितैरेवं विधः सत्तमः॥७॥ इति चेतिस्पष्टोर्थः॥ अथ जामातृदूषणानि॥
वृद्धोदुर्व्यसनोस्याद्विरहितोरोगीमहापापवान् षंढोदुष्टकुलोद्भवश्चपिशुनोधूर्तोनिबद्धस्पृहः॥ दारिद्र्यः रू
पणोतिचंचलमतिर्निन्त्यप्रवासीऋणी भिक्षुः स्नेहविवर्जितः सुमतिभिःकार्योवरोनेदृशः॥८॥ वृद्धइति॥ सुमति
-व भिरीदृशोनरोनकार्यइत्यन्वयः॥ ईदृशं कथंभूतं वृद्धइत्यादि॥ विशेषणानियोज्यानि॥ अत्रमहापापवानितिशास्त्रस्यनकर्म
धारस्यान्मतत्वर्थीयोबहुव्रीहिश्चेन्मत्वर्थप्रातिपदिकात् इत्सतुरागमस्तस्यसंदिग्धसाध्यवानस्वहृदसादिप्रयोगदर्शनात्सा
वेतिकस्माभावेनस्याद्युक्तमन्यत्सुगमं॥८॥ आयुःक्षितिविकलतास्थूपदाहाश्यनाव निंदार्थहानिलघुताविगतिःपरत्र॥
स्यादेवपद्यपिरतेनदर्शनायाःप्राहुस्ताभ्याप्यनघभित्यपिकारणेन॥९॥ अथदूषितास्याद्विपरस्त्रीसंगस्यकारणव

ग्दानि कन्यानिष्ठचिन्हानि नीलंभोरु हेत्यादिश्लोकद्वयेनाह ॥ नीलंभोरु हेति जलजग्रीवा कंबुकंठी श्लोकार्थः
स्पष्टः ॥ चक्रार्थं कृतशोणपाणिचरणा श्यामो हरी स्वल्पमुकुरंभा सतां मनोहरोरस्सुगलाश्रोण्या दहस्तान्विता ॥
नाम्राचैव सुनम्रयाग जगतिः शांताल्पनिद्रालसा शीलाढ्या सुकुमारिकानरवरैः कन्याविवाह्या सदा ॥ ३ ॥ स्पष्टोर्थः
॥ अथ वर्ज्यापादूषणानि ॥ अयवरकर्तकपाणिग्रहणायोग्यलक्षसपारकानिकन्यासंस्थचिन्हानि ॥ क्रूरेत्यादिश्लो
कद्वयेनाह ॥ क्रूरा पिंगलकेशः लोचनवती खर्वो निर्दीर्घा हृस्वा गलनो द्वीपयुक्तधरा च बहुस्मुकस्पामाथरादंतु
रा ॥ वाचालाविषमस्तनी द्रुतगतिः श्मश्रुयुक्ता कोपिनी रक्षा प्रबलवजिह्विकाति कठिना सरमश्रुकालोन्नरा ॥ ४ ॥
निद्राशोकवती सदाप्रचलनेयस्याः प्रकंपे द्वैराहास्याचापितरंगितौ प्रभवतो गल्लौनरं चंचले ॥ अंगुष्ठार

धिका भवेत्तदुपगा पादेतथानामिकासांसानोधरणींस्पृशेद्‌यभवेन्मध्यातु हीनायका ॥५॥ निर्दृतिपस्माः पादे

तदुपगा अंगुष्ठोपगा तर्जनी स्पर्शः ॥ अंगुष्ठाद्धिकाभवेत् ॥ तयासाप्याकनिष्ठासहितानामिकाधरणींनोस्पृशे

त् ॥ अथमध्यातु हीनायका भवेत्सा चलनइत्युस्यात्रा प्यनुबंगः कार्ये ॥ दंडितैः साऽबलाकन्याविवाहकर्मणि सदा

सा ज्येष्ठकारश्लोकेनान्वयः ॥ शेषं सुगमं ॥ ५ ॥ अन्तानागिरिवृक्षिभरुहनदीनक्षत्रसंज्ञाचेया प्रोद्दारोमसमाकु

लाचरावकलभवल्लरीनिरूपा ॥ गंडोकूपसुगानिवैतौविरथतीहीनाधिकांगीतथा दुःशीलाचविवाहकर्मणि सदा

त्याज्याबलापंडितैः ॥ ६ ॥ अन्तानीति स्पष्टोऽर्थः ॥ ६ ॥ अथयजमानलक्षणानि ॥ विद्यार्थोऽधनाश्रयोगुणनिधिः

ख्यातोमुखासुंदरः साचारः सुकुलोद्भवोमधुरवाक्दातादयासागरः ॥ भोगीभूरिकुटुंबवान्स्थिरमतिः पा

पापैर्हीनो बली॥ जामित्रादरिखर्णितः कश्चिदपरे रेवं विधः सप्तमः॥ ७॥ विधेतिस्य छोर्थः॥ अथ जामित्रदूषणानि॥
वृद्धो दुर्व्यसनो स्याद्विरहितो रोगी मतापवान् षंढो दुष्टकुलोद्भवश्च पिशुनो ध्यते निवद्धस्पृहः॥ दारिद्र्यः रू
पणो ति चंचलमतिर्निल्लप्रवासी ऋणी भिक्षुः स्नेहाविवर्जितः सुमतिभिः कार्यो वरो नेदृशः॥ ८॥ वृद्ध इति॥ सुमति
भिरीदृशो नरो न कार्य इत्यन्वयः॥ ईदृशं कथं वृद्ध इत्यादि॥ विशेषणानि योज्यानि॥ अत्र महापापानि तिरा स्पतनकर्म
धारयान्मतर्थी यो बहुश्री हि श्चेन्न र्थे प्रातिपदिकाः इ सतुरगसनस्पर्श दिग्ध साध्यवान्यश इ सादि प्रयोगवशान्सा
वैशिकसाभावेनसा सुतमन्यस्य गमं॥ ९॥ आयुःक्षतिर्विकलता स्वपहास्यता च निंदार्थहानि लघुता विगतिः परत्र॥
स्यादेव पद्य पि रते नदर्शननायाः प्राहुस्तथाप्य नघमित्यपि कारणेन॥ १०॥ अथ दूषितस्यापि परस्त्रीसंगस्य कारणेव

(176)

८९

रागान्निर्देशसमाहास्वरिति॥ यद्यपि परांगनापारतेनादुःस्थितिद्विपारिस्पादेव तत्रार्थहानिलघुतेस्वग्रशाकपार्थि
वादित्वसमासः तत्थापितत्वपरस्त्री रतिकारणेनवक्ष्यमाणेनानर्थनिर्देशमितिप्रादुरित्यन्वयः॥ शेषं सुगमं॥८॥
लंकेश्वरोजनकजाहरणेनवालीतारापहारकृतपापफलप्रवीक्षकारब्धः॥ पांचालिकाहरणतो निधनंजगाम तद्वे
नसादिदशहारहरतिं नकांक्षेत॥१०॥ अथकारणवशास्तु परस्त्रीगमनस्यानिवार्यत्वस्यापि॥ सुगमं॥ अन्यप्रोक्तमे
वपरांगनासंगमनिषिद्धनिषेधात् दृष्टादृष्टं तत्प्रदर्शनेनदर्शी कुर्वन्निषेधति लंकेश्वरोजनकजेति॥ श्लोकार्थः
स्पष्टः॥१०॥ दृष्ट्वाप्रेमपुराप्रमोदयनसिप्रोक्तोयसंकल्पकोनिद्रौच्छोतिस्त्रिशरीरतनुतालज्जाविनाशस्ततः॥ वै ८९
राग्यंविक्षेपदृष्यो निगदितोयत्स्मादनंगस्ततो मूर्च्छा स्यादितिदर्शितैः स्मरदशा उक्ता दशैवक्रमात्॥११॥ अथद

177

शम्याः कामावस्थायाः प्राप्तिसंभावनायामेव परस्त्रीसंगमः कार्य इति वक्ष्यंताः क्रमेणाह ॥ दृष्टिप्रेमेति स्त्रीपुरुषयोर
न्यतरस्यान्यतरावलोकने सति पुरः प्रथमं दृष्टिप्रेमावलोकनविषयकरुच्याविशेषः अथानंतरं मनसि भ्रमो भ्रां
तिः प्रोक्तोथानंतरं संकल्पकः ॥ मयैतत्संगः कर्तव्य एवंरूपः । अतोनंतरं निद्रोच्छित्तिर्निद्रानाशस्ततः शरीरतनुता श
रीरकार्श्यं ॥ ततस्तदनंतरं लज्जाविनाशस्ततो विषयेषु तदन्यभोजनादिविषयेषु विषयेवैराग्यमथोनंतरमुन्माद
मूर्छे निगदिते ततस्तदनंतरं मृत्युः स्यादत्र पूर्वपूर्वावस्थाप्राप्तौ कामस्पर्शाभावे उत्तरोत्तरावस्थोत्पत्तिर्ज्ञेया ॥ द
शैतैरिति स्मरस्य स्मरदशाः कामावस्थाः क्रमादुक्ताः प्रोक्ता इति ॥ ११ ॥ उर्वशीसुरतचिंतया ययौ संक्षयं किल पुरू
रवान्नृपः ॥ रक्षणाय निजजीवितस्य तत्संभजेत्परवधूं न कामतः ॥ १२ ॥ अथ परस्त्रीसंगस्य दृष्टांतप्रदर्शनेन नाश हे

178

९०

तुसंकल्पपतनं तथाविधसंकटे एव स्वप्राणरक्षणार्थे तत्संगः कार्यो न कामादिति प्रदर्शयति ॥ उर्वशीतिश्लोकार्थः स्प
ष्टः ॥ ८३ ॥ नारीत्येवान्ततयौवनाभिलषितं कांतं न चेद्दूत्पुमाप्नुयादुन्मादं मरणं चाविंदतिमदात्कंदर्पसंमोहिता ॥ संचिंत्यैव
समागतां परवधूं स्पर्धिनीं स्वेच्छया गच्छेत्कापि न सर्वदा सुमतिमानित्याह वात्स्यायनः ॥ ८४ ॥ अथान्यदंसंकटका
लं प्रदर्शयन्नेवंविधसंकटे एवान्यांगनासंगमः कार्यो न सर्वदेत्येतदुद्भूयेव वात्स्यायनसंमतिमाह नारीतिद्वल्लानं.
यौवना नारी स्वेनात्यंतमभिलषितं मिथ्याविषयभूतं कांतं नाप्नुयाच्चेत्कंदर्पसंमोहिता सत्युन्मादं मरणं वावि
दति प्राप्नोतीत्येवं संचिंत्य विचार्य स्वेच्छया न तु पुरुषप्रयत्नेन । समागतां स्पर्धिनीं परवधूं कापि कदाचिद्गच्छेत्सु
मतिमान् सर्वदा न गच्छेदिति वात्स्यायन आह तथापि तत्र प्राणरक्षणार्थमेव परमोपजितं गच्छेत् ॥ न सुखार्थं

९०

दाचित्स्र २

मितिवात्स्यायनेनाप्यनुज्ञामात्रं विहितं न तु विधिप्रदर्शनं कृतं ॥ उपक्रमे दत्तकोनाम भोजइत्यादिना परदारसंगस्य
तद्वध एव निष्किंचनात् ॥ उपसंहारे च पुरुषः परवधूमेवं वशीकुर्वीतेत्यतः सिद्धं नागरिकवृत्तान्तं विज्ञापयते
ऽयः स्वस्त्रियारक्षणं कार्यमिति तयावशीकरणादिप्रकारः प्रदर्शितो न तु परांगनासंभोगार्थं तस्यानिष्टफलज
नकत्वेनातिनिंद्यत्वादिति तेनैव प्रतिपादितत्वाच्च ॥ तेन स्त्रीयांगनासंभोगजनिता नरकप्राप्तिरेवैतद्ग्रंथस्य प्रयोजन
मिति प्रत्यवस्थानेन संगतिरिति रहस्यमिति दिक् ॥१०२॥ अपि द्विजश्रोत्रियभूपमित्रसंबंधिभार्या यदि पंच भुक्ताः ॥
स्युस्तास्वदोषापन्नचेत्स गच्छेद्धेतो पुमान् कामतएवनैव ॥१०३॥ अपीति यदिदं च द्विजश्रोत्रियभूपमित्रसंबंधि
भार्या अपि विभुक्ताः प्रयत्नपूर्वकं कृतभोगाः स्युस्तर्हि तादोषापत्स्युः हेतोर्गमनहेतोः पर्वैकसंकटकालेनापि इत

९२

चेत् तर्ह्यपि स्वप्राणसंरक्षणजन्यदोषाय स्युरिति चेन्मैवं तादृशकाले कामत एव तन्न गर्भोऽस्तीति दर्शनकारस्या
प्यनुषंगः। तत्प्राणरक्षणार्थं न गर्भोऽस्ति सर्वः॥ एवं च। यावच्च प्रोक्तसंकटकालेऽपि तत्प्राणरक्षणार्थं नधिकाम
तोऽपि सर्वं ग्राह्यं प्रोक्ता द्विजातिभार्या अगम्या एवेति तात्पर्यं॥१४॥ अथ गम्याः स्त्रिय उच्यंते। कन्या प्रव्रजिता सती रि
पुवधूर्मित्रांगना रोगिणी। शिष्यभार्या तपस्विपत्नी यतिनी स्वसंबंधिनी॥ वृद्धा पापेन धृष्टा गर्भसहिताऽहा
ता महापापिनी। पिंगा कृष्णवर्णा तमादरात् बुधजनैस्त्याज्या इमा प्रोदिताः॥१५॥ कन्येति॥ कन्या स्त्री नग्ना॥ प्रव्रजि
ता विरक्ता व्रतस्थाचार्यवधूरिति पदद्वयं स्पष्टं सुगमं॥१५॥ अथ द्वादशोच्यंते॥ मालाकारवधूः सखी च विधवा
धात्री नटी शिल्पिनी सैरंध्री प्रतिगेहिका सवर्णजकी दासी स्वसंबंधिनी॥ बालप्रव्रजिता च भिक्षुवनिता तारा कस्य विके

९२

४

सैरंध्रयन्त्वेरमस्याः स्वाधीना शिल्पकर्त्री ॥ २५

त्रिका मान्यकारवधर्वैरंध्यपुरुषैः प्रेष्याइमा दूतिकाः ॥ २६ ॥ मालाकारेति विरंध्य पुरुषैरिमा दूतिकाः प्रेष्याइत्य
न्वेयः ॥ मान्याकारवधूः स कारयोग्या दूतिका भिन्नास्त्री सैरंध्री परवेश्मरूपस्य शिल्पकारिके समरः ॥ प्रातिवे
शिका नदीघाट हानिक टवर्तिंग हा ॥ धिहितामान्याकारवधूः सकारयोग्या दूतिका भिन्नास्त्री शो पंजुगमं ॥ २९ ॥ अथ
मुखसाध्या लक्षणानि ॥ निर्लज्जा विभ्रमाकुलसुकुमाला गोष्ठी परा दुर्भगा क्लीबस्थूलदुष्टा खामन जरद्वैरूपभा
र्यातुषा ॥ हारावस्थितिशीलिका तिर्यक्पलायं ध्यामहामानिनी प्रत्यग्रा तस्पी महाविरहिणी साध्या सुखेनांग
नाः ॥ ३० ॥ निर्लज्जेति स्पष्टोर्थः ॥ ३१ ॥ अथानुरागिणी लक्षणानि ॥ लज्जां न धत्ते ऽभिमुखं चपरूपे सदेन भर्मिं वि
लिखेत स्थितास्य ॥ व्यसनिका गात्रं कुरुते च हासं दृष्ट्वा कटाक्षं नयने विदध्यात् ॥ ३२ ॥ लज्जामिति स्पष्टोर्थः ॥ ३३ ॥

182

९२

दृष्ट्वा स्फुटं सस्मितमेव बाला कंदृशानैर्भ्रूजैः स्वानुसरैः व्रजंतं॥ विलोकितं व्याजकपापसंगाद्दूरैर्वरे स्वं दरिदर्शयं-
ती॥१९॥ दृष्ट्वेति॥ अस्फुटमिति च्छेदः॥ स्पष्टोर्थः॥१९॥ तस्मिन्नवर्गे प्रणयं विदध्यादित्यादिश्यात्तोमसकृत्त्वपृच्छे-
त॥ कृतिस्त्रियोस्यालयगाः सुरूपाः कस्यामयं प्रेमभरं विधत्ते॥२०॥ तस्मिन्निति॥ तस्मिन्नवर्गे प्रणयं विदध्यात् वि-
धत्तेतं प्रति॥ सिन्धोवः असकृत्वारंवारं॥ मित्यादि वार्तां पृच्छेत्॥ इतीतिकिं॥ अस्यालयगाः सुरूपाः स्त्रियः कति
संति॥ अयं कस्यां भरं प्रेम विधत्ते इति॥२०॥ बध्नाति दृष्ट्वास्य कुचं करेण संस्फोटयेदंगुलिकाः सजृंभा॥ भू-
षाविहीना नददाति तस्मै स्वदर्शनं मानिजितमप्यजस्त्रं॥२१॥ बध्नातीति॥ दृष्ट्वास्य कुचं करेण बध्नाति आच्छाद-
यतीत्यर्थः॥ सजृंभा सती अंगुलिकाः संस्फोटयेत्॥ भूषाविहीना सत्यजस्त्रं मानितं प्रार्थितमपि स्वदर्शनं तस्मै न

९२

183

दृष्टा तीति ॥२१॥ पुष्पादिनाहं तिलघातिता रंसंकाशयेन्माष्टि भुजंकरेण ॥ व्याजेन गच्छेत्सह नंकरां छिन्न श्रेष्ठ बुधर्मा
बुध हेद्वि लोकन ॥२२॥ पुष्पादिने ति ॥ नथा आनितार मस्कंचं पुष्पादिनाहं तिताडयति पुरुषमिति रोषः ॥ संकाशये
त ॥ स्वशरीरमिति शेषः ॥ रोषं सुगर्भ ॥२३॥ इत्यादि चिन्हैरनुरागयुक्तां ज्ञात्वा विदग्धां मृगनायकः स्त्रीं ॥ संप्रेषयेत्तां
प्रति निर्विशेषं दूतीं सुराकामकलाप्रवीणः ॥२३॥ इत्यादि चिन्हैः लोके स्वयं कोक्तचिन्हादि चिन्हैः शेषं स्पष्टं ॥२३॥
अथ दुःसाध्या लक्षणानि ॥ भर्तृस्नेहवती दृढैकवनितापे मणा विहीना मत्सरं सेर्ष्याभरसुताप्रपाभरयुता गुर्वा
दिभीतिस्त्रिया ॥ प्रायेणार्थवतीत थापरजनालापे विरक्तासदा ॥ निर्लोभाप्यभिचारकर्मणि बुधैर्दुःखेन साध्या
स्मृता ॥२४॥ भर्तृस्नेहेति बुधैरेवंविधा स्त्री व्यभिचारकर्मणि दुःखेन साध्या स्मृता दृढैकवनितावल्लोदन्तु

९३

रण्यपि विरन्ध्रसङ्गमं ॥२४॥ अथ स्त्रीपुंसस्थानावसराः॥ स्थानानि चावसराः समयाश्चेत्याद्यास्त्रितेष्वस्थानावसरा
श्चेति विग्रहः। वह्निर्ब्राह्मणपूज्यवर्गनिकटे न चैत्ये देवालये दुर्गे शैलस्य तु व्यपेदशे हेरम्बे स्मशाने दिवा ॥ सं
क्रान्तौ राशिसंक्षये ग्रहणयोर्दिग्धे ज्वरान्ते व्रते संध्यायां च पर्वस्वमेषु सुरतं कुर्यान्न विद्वान्क्वचित् ॥२५॥ वह्नी
ति॥ राशिसंक्षये अमावास्यायां सुगममन्यत् ॥२५॥ अथ विहितप्रदेशाः॥ विस्तीर्णे ललिते सुधाधवलिते चित्रा
दिनालंकृते रम्ये प्रोन्नतचतुरंगस्रमहाधूपादिपुष्पान्विते॥ संगीतां गविराजिते स्वभवने दीपप्रभाभासुरे निःशं
कं सुरतं प्रयाभिलषितं कुर्यात्समं कान्तया ॥२६॥ विस्तीर्णे इति॥ पुमानिति शेषः॥ विस्तीर्णे ललिते रमणीये सुधापा
चूर्णेन धवलिते मिश्रेवं भते चित्रमालेख्यं आलेख्याश्चर्ययोश्चित्रमित्यभिधानात् तदादिना आदिशब्देन वि

९३

185

तानजघनिकां उपटादिकं ग्राह्यं ॥ अलं कृते भवितेरम्यं प्रोन्नतं च सुरमंगणं यस्येत्येवंभते अगरुसंबंधि महा
धूपादियुक्तानि पुष्पाणि तैरन्वितमेवं भूते संगीतस्यांगानि वीणामृदंगादीनि तैर्विराजितमेवं भूते दीपप्रभया
भासुरेण भवनस्थलेस्य भवनेस्वकीय वेश्मनि कांतया स्वरमण्पा समं सह साकं सार्धं समं सहेत्यमरः ॥ सुरतंय
था भिलषितं यस्येदं निःशंकं शंका सामान्य रहितामिति क्रियाविशेषणाद्द्वयं कुर्यात् ॥ निःशंकमिति क्रियाविशे
षणोपादानात् कांतपदस्य स्वरमणी परत्वमभिहितमिति शार्दूलविक्रीडितं वृत्तं रससंगरंगव्याख्यायां विवा
हाद्युद्देश निरूपणं नाम काष्टमस्थल व्याख्या ॥ ॥ ७ ॥ अथाष्टसंभोगविधिः ॥ अथ सुरतस्थाननिरूपणानं
तरं अष्टौ ये संभोगास्तेषां विधिः कथ्यत इति शेषः ॥ मतिमानुपभोगपर्वेवं सुरतं सर्वविदधीत कांतया ॥ परि

186

रमणमेव वदंति तैः प्रथमं तेषु निगद्यते यथा ॥१॥ अथ सुरतविधानकथनपूर्वकं प्राधान्येन परिरंभणाभिधा
नं प्रीतिं जानीते । मतिमानिति ॥ मतिमान् बुद्धिमान् उपभोगाः पूर्वोक्तास्तत्पूर्वकं सुरतं चतुःषष्टिविधं कांतया
सह संविदधीत कुर्वीत ॥ सुरतस्य चतुःषष्टिविधत्वमुक्तं वात्स्यायनग्रंथे यथा ॥ आलिंगनचुंबनदशनन
खच्छेद्यसंवेशनसीत्कृतपुरुषायितौपरिष्टकानामष्टधाविकल्पभेदादष्टावष्टकाश्चतुःषष्टिरिति बाभ्रवीयाः ॥
विकल्पवर्गाणामष्टानामन्यूनाधिकत्वदर्शनात् प्रहरणविरुतपुरुषोपसृप्तचित्ररतादीनामन्येषामपि वर्ग
णामिह प्रवेशः सामान्यो वाचोयं ॥ यथा सप्तपर्णोयं वृक्षः ॥ पंचवर्णो बलिरिति वात्स्यायनः रति ॥ दशनच्छेद्यं
नखच्छेद्यं चेत्यर्थः ॥ इत्थं चुंबनमालिंगनं दंतक्षतं नखक्षतं संवेशनं सीत्कृतं पुरुषायितमौपरिष्टकं चेत्य

द्विविधं रतं ॥ प्रसेकमसंप्राप्तभेदैश्चतुःषष्टिविधमिति प्रसिद्धं ॥ तेषु प्रोक्तसुरतेषु मध्ये प्रथमं अष्टधा अष्टप्रकार-
कमेव परिरंभणमालिंगनं निगद्यते कथ्यते इति वैतालीयं पदं ॥१॥ वृक्षाधिरूढं तिलतंडुलाख्यं ललाटिकं जाघ-
नविद्धकेच ॥ ऊरूपगूढं स्तनपट्टदुग्धनीरं तन्नाष्टमं वाल्लरिवेष्टितं स्यात् ॥२॥ अथालिंगनविभागमुद्देशेनाह ॥ वृक्षे-
ति ॥ वृक्षाधिरूढं प्रथमं तिलतंडुलमिश्राख्या यस्य द्वितीयं ललाटिकं तृतीयं जाघनं
॥ जाघनं चतुर्थं विद्धकं पंचमं ॥ ऊरूपगूढाख्यं येन युक्तं दुग्धनीरमिति विग्रहः ॥ ऊरूपगूढाख्यं षष्ठं दुग्धनीरं
सप्तममित्यर्थः ॥ तत्र तेष्वष्टमं वल्लरिवेष्टितं स्यादिति छेकात्रानुवृत्तं ॥२॥ अथ परिरंभणलक्षणं ॥ परिरंभलक्षणा-
मालिंगनलक्षणं कथ्यते इति शेषः ॥ चरणकमलमेकं ... ॥ तर

मिव भुजवल्याऽऽपीड्य चुंबेल्लतांगी कथितमिह मुनींद्रैस्तद्धि वृक्षाधिरूढं॥३॥ अथ वृक्षाधिरूढाख्यालिंग
नलक्षणमाह॥ चरणेति॥ नतांगी नायिका एकेनांघ्रिणा स्वीयचरणेन भर्तुर्नायकस्य चरणकमलमाक्रम्या
परपदसरोजेन स्वकीयेनान्यचरणकमलेन तदूरुं पुरुषसक्थिप्रदेशमाश्रयंती सती तरुमिव तं भुजवल्या
आपीड्य संमर्द्य चुंबेत॥३॥ वक्ष्यमाणं लतावेष्टितं चेति द्वयं स्थितयोः कर्म ज्ञेयमिति॥ अथ भर्तृपृष्ठदेशे नापि
केकभुजार्पणं तरसेतरपरभुजार्पणं चांगं यात्तरोरूसुन्धेयं॥ इहास्मिन्विषये मुनींद्रैस्तदालिंगनं वृक्षाधिरू
ढं वृक्षाधिरूढसंज्ञकं कथितं॥ यथा कश्चित्तरुतलप्रदेशमेकपादेनाक्रम्यान्यपादेन तदूर्ध्वप्रदेशमाधिरुह्य
वृक्षमधिरोढुमिच्छति तद्वत्त्रैनायिकानायकमारोढुमिच्छतीत्यन्वर्थेनामतोऽतः॥ लिंगनस्येति स्पष्टं॥ उक्तं च

189

वात्स्यायनेन ॥ चरणेन चरणमाक्रम्य द्वितीयेनोरुमवनमय्य तीव्रबहुलतां तः श्वसितं कूजितं ॥ चुंबनार्थमेवाधिरो
ढुमिच्छेदिति वृक्षाधिरूढकमिति मालिनी वृत्तं ॥३॥ भुजगुह्यविपर्यये प्रियो घटयेद्धि मिथुनं सुनिश्चलं ॥ ति
लतंडुलसंज्ञकं तदादरेण रंभकं प्रपद्यते स्फुटः ॥४॥ अथ तिलतंडुलसंज्ञकालिंगनलक्षणमाह ॥ भुजेति ॥ मि
थुनं स्त्रीपुंद्वंद्वं ॥ स्त्रीपुंसौ मिथुनं द्वंद्वमित्यमरः ॥ सुनिश्चलं संतमिथः परस्परं भुजगुह्यविपर्यये भुजौ च गु
ह्यं गुह्यशब्दश्च तस्मिंस्तोरद्वंद्वं च भुजगुह्यं तस्य च विपर्ययो नायिकानायकयोः परस्परं दक्षवामांसयोर्वामद
क्षिणभुजार्पणपूर्वकं कंठग्रहणमन्योन्यस्य दक्षवामोर्वोर्वामदक्षिणोरुनिवेशनं चेत्येवं लक्षणं संघटये
येत हि सरसः पंडिताः ॥ तस्य तिलतंडुलसंज्ञकं परिरंभमालिंगनं प्रपद्यते ॥ तिलतंडुलानिवात्र परस्परावय
दृसरादौ

९६

नानां व्युत्क्रमि स्त्रीभावाद्दन्वर्थे संशैत सहालिंगनस्येति भावः॥ वात्स्यायनः॥ शयनगता वृक्षव्यपासंभुजव्यपसार्य सं
चसंसंघर्षमिव समस्तजानेन निलतंडुलकमिति॥ वैतालीयं वृत्तं॥ ४॥ मिथोललाटाक्षिकपोलवक्त्रं हृद्धाहुवक्षो
मिथुनं घटेत॥ रसांतिरेकाद्यदि निस्तरंगं लालाटिकं तं प्रवदंति संतः॥ ५॥ अथ ललाटिकालिंगनलक्षणमाह॥
मिथो ललाटेति॥ मिथुनं द्वंद्वं यदि रसातिरेका सेमाधिक्यात् मिथः परस्परं ललाटाक्षिकपोलवक्त्रं हृद्धाहुव
क्षोरिस्प्रद्वंद्वं॥ निस्तरंगं तरंगशून्यमिति क्रियाविशेषणं॥ निश्चलमित्यर्थः॥ घटेत संयोजयेत॥ संतो वि
द्वांसः॥ विद्वान् विपश्चिद्दोषज्ञः सन्सुधीः॥ कोविदो बुधः इत्यमरः॥ तं परिरंभं लालाटिकं प्रवदंति कथयं
ति॥ परस्परं ललाटसंघर्षात् तन्नाम्नेनामतै तदालिंगनस्य बोध्या॥ यथोक्तं वात्स्यायनग्रंथे॥ मुखेन मुख

९६

१९१

मासज्ञा।क्षिणी॥अक्ष्णोर्ले।वाटेन तत्त्वाटमाहन्यात्सा लालनारिकेति॥ इंद्रव आनंतः॥५॥ जघनपरिसरस्थे श्रो
णिदेशे स्वभर्तुर्निजभुजलतिकाभ्यां गाढमालिंग्य रागात्॥ लुलितवसनकेशा चुंबनं पत्रकुर्यात् स्फुटमिह परि
रंभं जाघनं तद्वदंति॥ ६॥ अथ जाघनालिंगनलक्षणमाह॥ जघनेति॥ अत्र नायिकेत्यध्याहारः॥ लुलिताः वस
नकेशाः वस्त्रकुंतला यस्याः स्तथाभूता सती अत्र वसनराहित्यस्याप्यहितत्वात् वपौनिपातः॥ वसनपुरःसरः केशा
इति वा विग्रहः॥ जघनस्य स्वीयकटिपुरोभागस्य परिसरे समीपप्रांते तिष्ठतीत्येवंभूते स्वभर्तुः श्रोणिदेशे
कटिप्रदेशं जघनमित्यर्थः॥ निजे स्वीये भुजावेव लतिके ताभ्यां रागात् प्रेम्णा गाढं दृढमालिंग्य पश्चात् आलिंगने
चुंबनमिति नखदशनक्षतोपलक्षणं॥ कुर्यात् विदध्यात्॥ इह अस्मिन् विषये तं जाघनं परिरंभं स्फुटमिति त्रिमा

९७

विशेषणं वदंति॥ ब्रुवंति॥ अत्र प्राधान्येन जघनालिंगनात्स्वर्थे नाम यैतत् सरिरं भस्या॥ यदा हृत्वा स्थापनः॥
जघनेन जघनमवपीडय प्रकीर्यमाणकेशहस्ता नखदसनचुंबनप्रयोजनाय उपरिलंघयेत् तज्जघनोपगू
हनमिति॥ मालिनी वृत्तं॥ ६॥ स्थितं दयितं मीलितनेत्रसुगमं दृश्या स्मिविष्टेः इनि तौ कुचाभ्यां॥ गुह्यात्स्तनो नाम
पि विहृत्वाक्ष्यालिंगनं तन्मुनिभिः परिदृष्टं॥ ७॥ विहृत्वाक्षाख्यालिंगनलक्षणमाह॥ स्थितमिति॥ वनिता स्थितं
मीलितनेत्रसुगमं येन पस्य वक्षो वंभतं पतिं कुचाभ्यां पश्चात् पृष्ठतः प्रविश्य तताडयेत्॥ असौ पतिरपि तां वनितां
विहृत्वे आक्षिणीयास्मिन् कर्मणीति क्रिया विशे[illegible]पं॥ गृह्यात्वालिंगतीति॥ मुनिभिस्त द्विहृत्वाक्षमालिं
गनं परिदृष्टं कथितं॥ अस्ये व विद्धकमिस्य पिसंता॥ विद्धकलक्षणं चोक्तं वात्स्यायनग्रंथे॥ स्थितमुपविष्टं वा

९७

१२३

विजने किंचिद्दृष्ट्वा ति पयोधरेण विध्येत्॥ नायकोपि तां मवपीड्य गृह्णीयादिति॥ विद्धकमिति॥ इदं च ज्ञाप्य
तं॥७॥ उद्दाममन्मथो मन्मथितां गलनया उर्वोर्युगं स्यात् स्मुगेन यत्र॥ आपीड्येत् कांतमुदीरितं तदूरूपगूहं परिरंभ
णं हि॥ना॥ अथोरूपगूहनाख्यालिंगनलक्षणमाह॥ उद्दामेति॥ यत्रालिंगने कांतः प्रिय उद्दामः प्रोद्दीपः कामस्ते
नोन्मथिता पीडिता सा कासा अंगना वनितास्या ऊर्वोर्युगं स्वोरुयुगेन आपीडयेन्मर्दयेत् तदूरूपगूहं तत्संज्ञकं परि
रंभणमालिंगनमुदीरितं कथितं॥ ऊरूपगूहने ऊरूपगूहनादन्वर्थनामतास्येति॥ यद्वा हवास्वापकः॥ तत्र ऊरुसंदे
शो नैकमनस्मर इत्येवास्य सर्वथा प्राणप्रपीड्येदिस्म ऊरूपगूहनमिति॥ ऊरुसंदंशेन ऊरुएव संदंशस्तुल्या। अना
तित प्रभांडोद्धरणसाधने भतोलोहशलाकाद्वयनिर्मितो भाषया सांडसी इति प्रसिद्धो वस्तुविशेषस्तेन॥

१९४

९८

रोधं सुगममिति॥ स्त्र्यार्धे॥ ई इन स्त्रीरत्नं॥ ७॥ अंकेप तल्पे पतिसंमुखस्था कांतासमालिंगति प्रगाढं॥
मिथः प्रवेशं कुरुते निजांगैः स्यात् क्षीरनीरं परिरंभणं तत्॥ ९॥ अथ क्षीरनीराख्यालिंगनलक्षणमाह॥ अंकेइ
ति॥ कांता अंके उत्संगे अथ अपवाते तल्पे शय्यायां तल्पं शय्या इति शरीरे छिद्रभिन्नानात्॥ पत्युः संमुखे तिष्ठंती सेवंभ
तासती यत्रालिंगने गाढं दृढं समालिंगति॥ प्रियामिति शेषः॥ निजांगैः स्वीयहस्तपादहृदयाद्यवयवैर्मिथः परस्प
रं प्रवेशं कुरुते निरधाति॥ तत् क्षीरनीरं क्षीरजीराभिधं परिरंभणमालिंगनं स्यात् भवेत्॥ मिथः प्रवेशं कुरुतो निजां
गैरिति पाठे उभावपि व्याहारः॥ उभौ निजांगैः स्वीयनिखिलावयवैर्मिथः परस्परं प्रवेशं कुरुतः अत्ययमनपे
क्षया दृढतरमालिंगत इत्यर्थः॥ यथोक्तं वात्स्यायनग्रंथे॥ रागांधावनपेक्षितात्ययौ परस्परमनुविशत इवोत्संग ९८

(195)

गतायामभिमुखोपविष्टायां शयने वेति क्षीरजलकं तदुभयं दरमरागकालेऽस्ति ॥ तदुभयं पूर्वोक्तं तिलतंडुलं नीर
क्षीरं चेत्यर्थः ॥ अत्र नीरक्षीरयो रिवोभयावयवानां मध्यतः मिश्रीभावात् क्षीरनीरत्वव्यपदेशः ॥ तिलतंडुलयोस्त्व
यमेव विशेष इति ॥ इंद्रवज्रावृत्तं ॥ ९ ॥ वल्लीव वृक्षं सरलांगयष्टिं पतिं समालिंगति पद्मकांता ॥ चुंबेच्च रागात् तू त
मंदसीत्कारा प्रोक्तं बुधैर्वल्लरिवेष्टितं तत् ॥ १० ॥ अथ [illegible] लिंगनलक्षणमाह ॥ वल्लीति ॥ यत्रालिंगने का
ता वल्ली वृक्षमिव सरलां अंगयष्टिं स्पष्टमेवं भूतं पतिं समालिंगति ॥ पुनः रागात् रसात् तूनामंदसीत्कारसी
त्कारोपपत्नेवं भूतासती ॥ नामैकदेशेन नामग्रहणं ॥ चुंबेत् चुंबनं कुर्यात् ॥ बुधैस्तत् आलिंगनं वल्लरिवेष्टितं पद्मरि
वेष्टितसंज्ञकं प्रोक्तं कथितं ॥ अत्र वल्ली यथा वृक्षं वेष्टयति तद्वन्नारी स्वावयवैः पुरुषं वेष्टयतीत्यन्वर्था संज्ञेति ॥

196

९९

वात्स्यायनः॥ ललाटेन ललाटमावेष्टयंती चुंबनार्थे मुखमवनमयेत्॥ उद्धृष्टपसीकृतातमा॥ श्रीतावा॥ किंचिद्गाम
णीयकं परस्परं स्पृस्ता वेष्टितकामिति॥ इदं पूर्वोक्तं वक्षाधोरूरुवस्थितयोः कर्मसेपमिति॥ अत्रानुक्तान्यन्यान्यपि
स्तनालिंगनादीन्यालिंगनान्यह्यानि॥ तल्लक्षणान्यन्यो वित्री पर्यवास्यापनग्रंथे॥ यथा॥ स्तनाभ्यामुरः प्रवि
श्य तत्रैव भारमावेशयेदिति स्तनालिंगनं॥ संमुखागतायाम्प्रयोज्याया मन्यापदेशेन गच्छतो गात्रेण गात्रस्प
र्शनं स्पृष्टकं॥ इदं पूर्वोक्तं विद्धकं चेति द्वयमतिप्रवृत्तसंभाषणयोर्ज्ञेयं॥ नमसि जनसंबाधे विजने वा पदानैके
गच्छतोर्नाति ह्रस्वकालमुद्धर्षणं परस्परस्य गात्राणामुद्धृष्टकं॥ तदेव कुड्यसंदेशे वा स्तंभे वा पीडये
त्तदिति पीडितकं॥ तदुभयमवगतपरस्पराकारयोर्ज्ञेयं॥ तत्र स्पृष्टकं विद्धकमुद्धृष्टकं पीडितकं चेत्यालिंगनं च

९९

197

तुल्यमसमागतयोः प्रीतिलिंगद्योतनार्थं ॥ लतावेष्टितं ॥ वृक्षाधिरूढं ॥ तिलतंडुलकं ॥ क्षीरनीरकमिति चत्वा
रि संप्रयोगे इति ॥ एवं चस्य स्वकारि चतुष्टयस्य प्रीतिलिंगद्योतनार्थत्वमेवाभिमतं ॥ अत एव तत्र त्रयेष्वपि
धालिंगने विद्धकमगृहीत्वा स्तनालिंगनं गृहीतं ॥ एतद्ध्युपकर्मोतु सानालिंगनलक्षणस्याप्यत्र तिलतंडुलादौ
समावेशात् तत्रतत्रांतर्भावदिति कस्याप्युपादानं कृतमिति ॥ उपगूहनविधेः फलमाह ॥ स्थितसंप्रयोगग्रहणं
योगे तत्रैव यथा ॥ पृच्छतां शृण्वतां वापि तथा कथयतामपि ॥ उपगूहनविधिं कृत्स्नं रिरंसा जायते नृणां ॥ येपि
ह्यशास्त्रिताः केचित्संप्रयोगरागवर्धनाः ॥ आदरेणैव तेप्यत्र प्रयोज्याः सांप्रयोगिकैः ॥ शास्त्राणां विषयस्ताव
द्यावन्मंदरसा नराः ॥ रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रमः इति ॥ अशास्त्रिता अशास्त्रसिद्धाः ॥ अन्येपि विशेषा

१००

विस्तरभयान्नलिख्यंत इति दिक्॥ ईदृशं च आकृतं॥१॥ इत्यालिंगनभेदाः॥ अथ चुंबनभेदाः॥ अथालिंगननि रूपणानंतरं चुंबनस्य विशेषो निरूप्यत इति शेषः॥ अधरालिकपोलमस्तकं बदनां तस्तनयुग्मकांतरे॥ विहि तानि पदानि पंडितैः परिरंभाद्यनु चुंबनस्य हि॥१॥ अथ चुंबनविशेषान्निरूपयितुं प्रथमं तत्स्थानानि युग्मेनाह॥ अधरेति॥ पंडितैरधरालिकपोलमस्तकमत्र पार्श्वं गलातदृशैकवद्भावः। वदनांतो मुखाभ्यं तरं स्तनयुग्मकांतरं कुचद्वंद्वमध्यं चेति द्वंद्वः॥ एतानि परिरंभाद् आलिंगनादन्वनंतरं चुंबनस्य आलिंगनो त्तरं विहितं पश्चाच्चुंबनं तस्थेत्यर्थः॥ पदानि स्थानानि पदं व्यवसितं॥ त्राणस्थानलक्ष्मांघ्रिवस्तुष्विसमरः॥ वि हितानि विहितत्वेनोक्तानीत्यर्थः॥ ह्रीणनिश्चयपार्श्वक॥ वैतालीयं वृत्तं॥१॥ कक्षामुखं मन्मथमंदिरं च नाभे

१००

श्रमलंस्मरलोलन्विंताः ॥ चुंबेतिललाटनिजदेशासाम्या न्वास्य पतश्चुंबनजातिरेषा ॥ २ ॥ कक्षेति ललाटक
स्पोर्वाहुमूलयोर्युग मन्मथमंदिरं कामवेश्म गुह्यस्थानमित्थाग्रतः ॥ जनाभेर्मूलमेतानि निजदेशाः स्वीयदे
शास्तत्रैसात्म्यंतो लंयं तस्मात् । तद्देशीयानां सर्वेषामुक्तस्थानत्रय चुंबनप्रवृत्तेरित्यर्थः ॥ चुंबेति ॥ एतानि काचुं
बनजातिरन्यतोन्यत्र नास्ति ॥ स्पर्शहृतमेतद्वात्स्यायनग्रंथे ॥ यथा चुंबननखदशनच्छेद्यानां न पौर्वापर्यमस्ति
रागयोगात् प्रसंगयोगादेषां प्राधान्येन प्रयोगः ॥ प्रहणनसीत्कृतयोश्च संप्रयोगे ॥ सर्वं सर्वत्र रागस्यापेक्षि
तत्वादिति वात्स्यायनः ॥ तानि प्रथमरते व्यक्तानि स्फुरितं विकल्पेन प्रयुंजीत ॥ तथाभूतत्वाद्रागस्य ॥ ततः प
रमत्वरयाविशेषवत्समुच्चयेन रागसंधुक्षणार्थं ॥ ललाटगलकपोलनयनवक्षःस्तनोष्ठांतर्मुखेषु चुंबनं

२०१

१०१

ऊरुसंधिवा हृन्नाभिमध्ययोरपि लाटा सा रागवशात् द्वेषात् प्रवर्तते श्वसंति॥ तानि तानि स्थानानि नतु सर्वजनप्रयोज्या
नीति वात्स्यायन इति॥ तत्र ग्रहणं वक्ष्यमाणं॥ संप्रयोगे मैथुने॥ तानि चुंबनारीणि॥ प्रथमरते चकारो संस्म
स्पष्टानि स्त्रीषु प्रयुंजीत अवकाशाभावे सति न संप्रयुंजीत नाधिकायतनाय करोति विषयकरागस्यास्तुल्यतारम्भ
तत्वाद्दितिवा॥ ततः परं दृष्टी मरता रावकरत्पोसाध्यल्पेन रागवृध्यर्थं प्रयुंजीतेति निरूढः सूत्रार्थः॥ अन्यरूपग
मभिनितिईदृश आदृते ईदृश्गताते ज्ञोभिनिति लक्षणात्र॥२॥ नारीमुखं नीतेन दृष्टं स्वकीयं समानयेद्यत्र बलेन कांतः॥ सा
नैव चुंबेदरतिको पयुक्तास्यात् चुंबनं तन्निमीलिताभिधानं॥२॥ अथ मिलितास्य चुंबनलक्षणमाह॥ नारीति॥ यत्र चुं
बनेः कांतः प्रियेनारी मुखं आते कांतामुखस्पृष्टं स्वकीयं मुखं बलेन हृतमात् समानयेत्तत्स्पर्शपेहिस्पर्शं॥ अस्पर्शं तं १०२

201

कोपेनमुक्तास्या प्रियानैव चुंबेत्॥ तन्निमितमित्यभिधानं नाम यस्येत्येवंभूतं चुंबनं स्यात्॥ आख्याहे अभिधा
नं च नामधेयं च नामकेयमभरः॥ जस्य निमितमित्यपि संज्ञा॥ तथा च वात्स्यायनः॥ बलात्कारेण गृहीता मुख
मुखमाधत्ते न चेष्टत इति निमितमिति॥ इदं द्रष्टव्यं वृत्तं॥३॥ दयितस्य निवेश्य वक्त्रके निजवक्त्रं परिचुंबिताधरं॥
न पिबेद्बलात्स्वकामतः स्फुरिताख्यं किल चुंबनं तत्॥४॥ अथ स्फुरिताख्यचुंबनलक्षणमाह॥ दयित
स्येति॥ अबला स्त्री दयितस्य वक्त्रके मुखे परिचुंबितोऽधर ओष्ठो यस्येत्येवंभूतं निजवक्त्रं स्वीयवदनं निवेश्य
स्थापयित्वा अल्पकामतश्चुंबनविषयकमनोरथपूर्तेः कामस्याल्पत्वादि स्पर्शः॥ न पिबेत्॥ तदधरमि
ति शेषः॥ यद्यपि परिचुंबिता सती तस्याधरं न पिबेदिति कायोजना॥ दृष्टं समानं॥ तदा स्फुरिताख्यं चुंबनं

स्मारिति॥ वसन्तापनः॥ वहन्ते श्रेव शीतमो हंसमागदभ्रपाऽसगट्टी तुमिछंती स्पंदयंती स्वमोष्ठमुत्तारं तस ह
त इति॥ स्फुरितमितीवैतालीयं वृत्तं॥४॥ करेण कान्तस्य निमील्य नेत्रे जिह्वां मुखांतर्दिं निधाय पत्र॥ चुंबेद्वि
लोलापरिमीलिताक्षी तत् घंटिकाख्यं कवयो वदंति॥५॥ अथ घंटिकाख्यचुंबनलक्षणमाह॥ नादिकामत्र
चुंबने विलोलाचंचला परिमीलिते आक्षिणी यस्याः एवंभूता वसती करेण निजहस्तेन कांतस्य प्रियस्य नेत्रे नि
मील्या स्वाधरविवरांतः स्वीयरसनां मुखांतस्तद्दशनांतर्निधाय स्थापयित्वा चुंबेत्॥ कवयस्तच्चुंबनं घंटिका
ख्यं वदंति ब्रुवंति॥ एतानि त्रीणि कन्याचुंबनानि ज्ञेयानि॥ उपेंद्रवज्रा वृत्तं॥ उपेंद्रवज्रा जतजास्ततो गा
विति लक्षणात्॥५॥ करेण कांतानुकुरंगहीला हृष्टो सतिः पश्चिमभागवर्त्ती॥ प्रियाधरं पत्रतुतिर्पंगारम्य त्रो

तं कवींद्रैः खलु चुंबनं तत्॥६॥ अथ तिर्यगाख्यचुंबनलक्षणमाह॥ करेणेति॥ पतिः प्रियः पश्चिमभागे प्रि
याः पृष्ठभागे वर्त्तते इत्येवं भूतः सन् करेण निजहस्तेन कांता चुबुके स्त्रीमुखाधोभागे॥ अधस्तात् चुबुकं गंड
कपोलौ तत्परा हनुरित्यमरः॥ गृहीत्वा पादाग्रपश्चिमपार्श्वं नासिकाधरोष्ठं पश्च चुंबेनेत् इत्येतत्॥ तत्र ईदृशं कुर्यादि
त्यर्थः॥ कवींद्रैः कविश्रेष्ठैस्तत् चुंबनं तिर्यगाख्यं तिर्यक्संज्ञकं प्रोक्तं कथितं॥ इंद्रवज्रावृत्तं॥६॥ इतो गृहीत्वा
मदनार्त्ता लोलाधरं विचुंब्याभुवरे स्व भर्तुः॥ कांतस्तदास्यं कथितं कवींद्रैः स्फुतारोद्दीप्तचुंबनं हि॥७॥ अ
थोत्तरोष्ठाख्य चुंबनलक्षणमाह॥ इतो गृहीत्वा॥ स्त्री मदनार्त्ता कामकर्ता कपोलपालो लोलाधरं चलेति तत् ख्या भर्तां सती
स भर्तुरधरमेवधरोष्ठं इतो गृहीत्वा विचुंब्याप्सरीशे स्थितः तत्र ईदृशं कुर्यादित्यर्थः॥ वरेति तिपाठे किमपि ब्रूयादित

२०५

१०३

दृश्यः ॥ कदा तस्मिन्नेव काले कांतः प्रियस्तस्याः इति शेषः ॥ अन्यं प्रवीणा हितं तर मुत्तरोष्ठमित्यर्थः ॥ दंतैर्गृहीत्वा निचुं
ब्यदशेत् ॥ कवीन्द्रैरेवं प्रकारक मुत्तरोष्ठमुत्तरोष्ठाभिधं चुंबनं कथितमुक्तं ॥ [illegible]स्थापनः ॥ तस्याश्चुंबं सा मे वा
न संस्थाप्यादित्युत्तरोष्ठमिति ॥ इंद्रवज्रा वृत्तं ॥ आह ॥ यदंतरुत्तरमाधुपकस्य करांगुलीसंपुटकेन नारी ॥ जिह्वाग्रे ग्र
देशेन घटेद्दशेष्वस्तचुंबनं पीडितसंज्ञकं स्यात् ॥ अथ पीडितसंज्ञकं चुंबनलक्षणमाह ॥ आहृत्येति ॥ नारी प
त्युः प्रियस्य दंतच्छदमधरोष्ठमाहृत्य गृहीत्वा करांगुलीनां संपुटकेन नाह्यगृहीता जिह्वाग्रदेशेन स्पृशेत् जिह्वाग्रभागेन
घट्टयेत् जघदेशलोष्ठे [illegible] दत्वा पर्यंस्रोतः इंद्रवज्रा वृत्तं ॥ तत्संबु चुंबनं पीडितसंज्ञकं स्यादिति ॥ तत्पात्सकासमापनः ॥ ईष
त्परिगृह्याधिनिमीलितनयना जिह्वाग्रेण घट्टयेत्सा समाप्तिपर्यंतं प्रजानं पीडितामिति ॥ अथ कोष्ठिगत्वस्तेन वा

१०३

२०५

कोपप्रसादवपीडितं निर्दयेन नखव्यपीडये हि स्वपीडितकं ॥ एवमंमाधिकरणं द्यूतं चात्र प्रवर्तयेत् ॥ एवमोष्ठसं
पाद्देन न जितमिदं स्यात् ॥ तत्र जितासा धरदितं करं धुनुपात प्रणुदेद्गृहीत परिवं कयेत ब्लादाहता विवदेत ॥ पु
नरथ्यस्तु पणइति ब्रूयात् ॥ तत्रापि जिता द्विगुणमायस्येत् ॥ विश्रब्धस्य प्रमत्तस्य चाधरमवगृह्य दशनांतर्गतम
निर्गतं कृत्वा हसेत् क्रोशेत् तर्जयेत् ॥ वल्गेन भ्रूलताचाविकलनयनेन मुखेनाविहसंती तानि तानि च ब्रूयादिति चुंब
नद्यूते कलहः ॥ एतेन नखदशनच्छेद्यग्रहणेन द्यूतकलहाव्याख्याताः ॥ चंडवेगयोरेव त्वेषां प्रयोगः तत्सात्म्या
दिति ॥ उपजातिवृत्तं ॥ ७ ॥ प्रियामुखं स्वाधरसंपुटेन पिबेत् स्तिः स्वापितचैव भर्तुः ॥ तत्संपुटरव्यं हनुव्यक्तसंज्ञं स्या
त्केलिजिह्वाननतस्तदेव ॥ ८ ॥ अथ संपुटाख्या चुंबनस्य लक्षणं तस्येव संज्ञांतरं चाह ॥ प्रियेति ॥ पतिः प्रियामुखं

१०४

स्वस्याधरयोरोष्ठयोः संपुटं तेन पिबेत् सा दंशं चुंबेत्॥ तथैव सापि भर्तुर्मुखं स्वस्याधरयोरोष्ठयोः संपुटेन पि
बेत्॥ तच्चुंबनं संपुटाख्यं संपुटनामकं स्यात्॥ तदेव संपुटमेव केलिजिह्वाललनं तत्केलिः क्रीडार्थं वल्गमि
ति पाठः तद्युक्ता जिह्वा यस्मिन् तत् चेत् तदाननं च तस्मादिति तान् दंशस्यास्तमिल॥ हनुवक्त्रसंज्ञं स्यात् तत्संपु
टाख्यमनुवक्त्रसंज्ञमिति पाठे अनुवक्त्रसंज्ञं स्यादित्यन्वयः॥ अयमेव पाठो ग्रंथांतरानुरोधेन साधीयान्॥ त
माचयास्यापनस्त्वे॥ ओष्ठसंदंशेनावगृह्योष्ठद्वयमपि चुंबेदिति संपुटकं स्त्रियाः पुंसो वा॥ अजातव्यसन
स्य तस्मिन् स्मितरोपि जिह्वयास्यास्यहनानान घट्टयेत् तालु जिह्वां चेति जिह्वायुद्धं॥ समं पीडितसंचितं मृदुश्वोपांगे
षु चुंबनं॥ स्थानविशेषादिति चुंबनविशेषा इति॥ उपजातिवृत्तं॥ ८०॥ संप्राप्य निद्रां रहसि स्वकांतां चिरात्

१०४

तस्मिं चुंबतीति पत्रभर्त्ता ॥ प्रोक्तं कवींद्रैः प्रतिबोधसंज्ञं तच्चुंबनं सर्वरसातिरेकं ॥ ११ ॥ अथ प्रतिबोधसंज्ञकचुंब
नलक्षणमाह ॥ संप्राप्येति ॥ यत्र चिरात् चिरकालेन गतः प्राप्तो भर्त्ता रहस्ये कांतस्य तल्पे निद्रां संप्राप्य स्थितामि
ति शेषः ॥ संप्राप्तनिद्रामिति पाठः साधुः ॥ एवं भर्त्ता स्वकांतां चुंबति ॥ प्रबोधनार्थमिति भावः ॥ अत्र तां यि का
म्याः कृत्रिमैव निद्रा बोध्या ॥ कवींद्रैः कविश्रेष्ठैः सर्वरसेभ्योतिरेकं आधिक्यं यस्मिन्नेवंभूतं तत्पूर्वोक्तं चुंबनं प्र
तिबोधसंज्ञं कथितं ॥ वात्स्यायनः ॥ चिरात् आगतस्य शयने प्रसुप्तायाः स्वाभिप्रायेण चुंबनं प्रातिबोधकं ॥ सा
पि तु भाव जिज्ञासार्थिनी भर्त्तुरागमनकालं संलक्ष्य कृतकसुप्ता स्यादिति ॥ अत्र छलितकारस्य मध्ये
कं चुंबनं तेनैवोक्तं ॥ प्रयासुप्तस्य मुखमवलोकयंत्याः स्वाभिप्रायेण चुंबनं रागदीपनं ॥ प्राप्तस्य विवदमान

१०५

स्य चाप्यतोऽभिमुखस्य स्वमभिमुखस्य वा निद्राव्याघातार्थं ज्वलितकमिति ॥ उपजातिवृत्तं ॥१०॥ अधरोष्ठकामि
नीपतिवक्त्रोष्ठयुगं स्वजिह्वया ॥ परिपीड्य विचुंब्यते स्फुटं कथितं तदिह समोष्ठसंज्ञकं ॥११॥ अथ समोष्ठसंज्ञ
कचुंबनलक्षणमाह ॥ अधरोष्ठेति ॥ कामिनी योषित् पत्युर्वक्त्रसंबंध्योष्ठयुगं अधरोष्ठयुगेन अधरशब्देना
धरोष्ठः स च उत्तरोष्ठशब्देनोत्तरोष्ठः स च तस्य युगं द्वंद्वं तेन स्वजिह्वया च परिपीड्य विचुंब्यते सा तिनः करोति ॥
तच्चुंबनं समोष्ठसंज्ञकं कथितं प्रोक्तं ॥ अत्रोक्ताह्न्योपि विरोधो नास्मायनग्रंथे प्रतिपादितः ॥ यथा आह रु कु
डंबसलिले वा प्रयोत्पाया छायायां चुंबनमाकारप्रदर्शनार्थमेव कार्यं ॥ बालस्यापि चित्रकर्मणः । प्रतिमापार्श्वचुंब
नं संक्रांतकमालिंगनं च ॥ तथा निशि प्रेक्षणके स्वजनसमाजे वा समीपेण तस्य प्रयोऽपाया हस्तांगुलिचुंबनं संदि

१०५

हस्य वामपादांगुलीचुंबनं॥ संवाहिकायास्तु नाम्न्यकमाकारमं प्रानिद्रावशाद्वा माया इव तस्योर्वोर्वस्नस्य नि
धानं मरुचुंबनं पादांगुष्ठचुंबनं चेत्याभियोगिकानि॥ कृते प्रतिकृतं कुर्यात् ताडिते प्रतिताडितं॥ करणेन च ते
नैव चुंबिते प्रतिचुंबितमिति॥ वैतालीयवृत्तं॥ लक्षणं तत्कृतमागतं॥१॥ इति चुंबनभेदाः॥ अथ नखदानाभि
धानं॥ अथ चुंबनभेदनिरूपणानंतरं नखदानाभिधानं निरूप्यत इति शेषः॥ ग्रीवाकक्षोरुजघनस्तनपृष्ठवक्षा
हृत्पार्श्वगंडविषये नखराः खराः स्युः॥ माने नवीनसुरते विरहे प्रवासे द्रव्यक्षये च विरतौ च मदे प्रयोज्याः॥१॥
अथ नखक्षतानि निरूपयितुमादौ तेषां स्थानानि समर्पयन्नाह॥ ग्रीवेति॥ ग्रीवा च कक्षौ च ऊरू च जघनं च स्तनौ
च पृष्ठं च वक्षो बाहुमूले च हृदयं च पार्श्वौ कक्षाधःप्रदेशौ चांगौ चेति द्वंद्वैकवद्भावस्तस्य विषयः प्रदेशास्तस्मिन्

७६

खराः कठोरा नखा नखक्षतानीत्यर्थः॥ स्तुभे वेपुः॥ मनोमानावसज्जयां नवीनं वपत्सूरंतं तस्मिन्विरहे भर्तरि कौ
क प्रवासोत्तरकालिकप्रत्यागमन इत्यर्थः॥ प्रवासे प्रवासाद्यगमना सुरकाल इत्यर्थः॥ द्रव्यक्षयेन तोन्यपके रमादि
रते अथ विरतौ प्रबलतर स्त्रीमे पुनः प्रचंडवेगस्त्रीपुंरत इति वामदेवतंत्र मरुभस्त्रादामिल इत्यर्थः॥ एतत्प्रयोज्याः॥
प्रोक्तनखक्षतानि चंडवेगयोः समानयोर्वा नायिकानायकयोर्निरूपम्न्ये नांतत्समये विहितानीति तात्पर्यं॥
तथा च वात्स्यायनग्रंथे॥ रागवृद्धौ संघर्षात्मकं नखविलेखनं॥ तस्य प्रथमसमागमे प्रवासप्रत्यागमने च क्रु
द्धप्रसन्नायां मत्तायां च प्रयोगो नित्यं प्रचंडवेगयोः॥ तथा दर्शनछेद्यस्य साम्यवश्यं द्वा॥ अच्छुरितकं॥ अर्धचं
द्रं मंडलं रेखा व्याघ्रनखं मयूरपदकं॥ शशप्लुतकमुत्पलपत्रकमिति रूपतो ष्टविकल्पकं॥ कक्षोस्तनो गलं पृष्ठं

१०६

२१।

०घनमस्त्यस्थानानि॥प्रद्धनरतिचक्राणांमतस्थानमपरस्थानंगाविद्यत इतिसुवर्णनाभः॥तत्रसव्यहस्तेमस्याग्र
शिखराणि द्वित्रिशिखराणिवाच्चंडवेगयोर्नखानिस्युरिति॥ वसंततिलकावृत्तं॥१॥ निरेखतानिर्मलतोज्वलत्वंव
र्धिष्णुतालस्फुटितत्वमेवं॥अमार्दवंचेतिगुणान्नखानांबुधैःवदुक्ताःकिलकामशास्त्रे॥२॥अथनखगुणाना
ह॥निरेखतेति॥बुधैःदंडितैर्नखानांनिरेखतारेखाराहित्यंनिर्मलतामलशून्यत्वंउज्वलत्वंवर्धिष्णुत्वंनातुपु
नरस्फुटितत्वमखंडितत्वं॥एवममार्दवंमृदुताशून्यत्वंचेतिषड्गुणाःकामशास्त्रेउक्ताःकथिताःकिलेतिनि
श्चयेन॥वात्स्यायनः॥अनुगतराजिसमुज्वलममलिनमविपाटितंविवर्धिष्णुमृदुस्निग्धदर्शनमितिनखगु
णाइति॥उपजातिवृत्तं॥२॥अथनखरेखंकृतरोमहर्षसमर्पितंगंडकुचाधरेषु॥पक्ष्मभेसंपूर्णनखप्रभृतंविशा

८

स्तद्देवाच्छुरितं वदंति ॥३॥ अथाच्छुरिताख्यनखक्षतलक्षणमाह ॥ अल्पकेति ॥ अल्पकारवा मदस्पेलेखं भवतं रू-
तो रोमहर्षो रोमांचो येनैषलेखं भवतं रोमांचो रोमहर्षेण मिश्रमरः ॥ गंडकुचाधरेषु समर्पितं संपरूणे नखेभ्यः
प्रभवतमुत्सन्नमेवं भवतं यत्कर्म नखप्रयोगरूपं कर्मस्यात् ॥ विज्ञाः पंडितास्तद्देवाच्छुरितं वदंति ध्रुवं तिष्ठत याच्च
वास्मापनः ॥ तैः सुनिपमिते हेतुदेशे स्तनयोरधरे वा लघुकरणमुतुंक्त नरवस्पर्शमात्रजननाद्रोमांचकरमं-
ते संनिपातवर्द्धमानशब्दमाच्छुरितकं ॥ त्रयोऽस्यायां पतस्यांगसंवाहने शिरसः कंडूयने पिटकभेदने व्याकुलीकर-
णे च भीषणे च प्रयोग इति ॥ उपजातिवृत्तं ॥३॥ ग्रीवाकुचेषु वक्रनखप्रहारो स्तोर्धचंद्राख्य उदीरितो सौ ॥ इत्येवं चं-
द्रार्धमुखे प्रयुज्यात् तदा बुधा मंडलकं वदंति ॥४॥ अर्धचंद्राख्यनखक्षतस्य लक्षणं चाह ॥ ग्रीवेति ॥ ग्रीवा

१०८

213

चकुचौच ग्रीवा कुचं तसिन्सकक्षावासौ नखप्रहारःश्वसदृशः स्यात्॥ असौ नखप्रहारोर्धचंद्राख्य उदीरितः प्रो
क्तः पंडितैरितिशेषः॥ इत्येवं पूर्वोक्तप्रकारेणैकं चंद्रार्धमुखे चंद्रार्धयोर्मुखे कर्मभूते प्रयुंज्यात् अन्योन्याभि
मुखं योजयेत् खुधास्तदा मंडलकं मंडलकाख्यं नखक्षतं वदंति॥ अर्धचंद्रद्वययोगेन भवतीत्यर्थः॥ तथा
योक्तं पास्मायनग्रंथे॥ ग्रीवायां स्तने च पृष्ठे च वक्रो नखपद इति वक्रोर्धचंद्रकः॥ तावेव द्वौ परस्पराभिमुखौ
मंडलकं॥ नाभिमूलकंधरवंक्षणेषु तस्य प्रयोग इति॥ वंक्षणं ऊरुसंधिः॥ सक्थि क्लीबे पुमानूरुस्तस्य संधिः
पुंसि वंक्षण इत्यमरः॥ तस्य मंडलस्येति॥ उपजातिवृत्तं॥ ४॥ द्व्यंगुलादधिक एव नखप्रहारो मूर्ध्नि रुगु
ल्मकवंदे रासमर्पितो यः॥ रेखाह्वयं मदनकेलिकलाविधिज्ञाः प्राहुस्तमेव तरुणस्य तदा स्तिभावं॥ ५॥ अ

१०८

यरेखाभिधनखक्षतलक्षणमाह ॥ द्व्यंगुलेति ॥ मूर्द्धादिषु समर्पित एवंभूतो यो द्व्यंगुलात् द्व्यंगुला
पेक्षयाधिक एवं न तु न्यून एवंभूतो नखप्रहारः स्याद्द्वितिरो यः ॥ मदनस्य कामस्य केलिः क्रीडा तत्संबोधिन्यः
कलास्तासां विधिं जानंतीति ते एवंभूताः ॥ कामशास्त्राभिज्ञा इत्यर्थः ॥ तमेव सरलनखप्रहारमेव तरुणस्य
तपस्विभूतं तपस्विधर्मं तं रेखारूपं रेखासंज्ञकं प्राहुः ॥ तपस्वि वोपयाज्ञपर्संख्यार्थेभ्मो रेखाविनिर्माण
कुर्वीति दलरणा आपिनाधिकावपवेषु निऊनखे स्नानि भाति सामर्थ्यास्ताव दुर्मीरोप इति भावः ॥ सरलो नख
प्रहारो रेखारूपो यत्र श्रेष्ठा प्रकरणमिति बोध्यं ॥ यथोक्तं वात्स्यायनग्रंथे सर्वस्थानेषु नातिदीर्घा रेखा ॥ से
ववक्रा व्याघ्रनखं आस्तनमुखमिति ॥ वसंततिलकावृत्तं ॥ ५ ॥ रेखा इतास्य यन्नखेर धस्तांद्गुष्टमाधा

१०८

यत्नुकूचुकेमा॥ मयूरपादं खिलतां वदंति शशप्लुतं सर्वैर्नखैः कुचाग्रे॥ ६॥ अथ मयूरपदलक्षणं खन खक्षतल
क्षण शशप्लुतलक्षणं चाह॥ ऊर्ध्वस्तनवृत्तनो ग्राधो गुष्ठमाधाय तत्र नखाग्रैः संक्षतं कुसैस्यर्थ॥ चुचुकेन कुचस्य मी
पे सर्वैर्नखैर्यो नु रेखा कृता कुचाग्रैस्तां रेखां मयूरपदकं वदंति॥ कुचाग्रे सर्वैर्नखैः शशप्लुतं वदंति॥ वात्स्यायनः पंच
भिरभिमुखैर्नखैः रेखा चूचुकाभिमुखा मयूरपदकं॥ तत्प्रयोगः श्लाघनाय॥ चूचुके संनिकृष्टानि पंच नखपदानि
शशप्लुतकमिति॥ उपजातिवृत्तं॥ ७॥ रेखात्रयं पृष्ठकुचेषु गुह्ये कृतं भवेदुत्पलपत्रं वद्यत॥ अन्वर्थसंज्ञं प्रवदंति तज्
ज्ञा स्मरंतु यथा सा वसरे दिशंति॥ अथोत्पलपत्राख्यनखक्षतलक्षणमाह॥ रेखेति॥ यत्र रेखात्रयं पृष्ठे च कुचौ चे
ति हृदि कदाचन स्तनसीमनि गुह्ये उत्पलपत्रवत् कर्कशाकारं कृतं भवेत्॥ विद्वांसः अन्वर्थार्थानुसारिणी संज्ञा य

216

१

स्वेप्येवं भक्तं तंडुलत्वपत्रं नखक्षतं समंदंतिकपर्यंतीकामिनस्ततत॥ उक्तंनखक्षतंस्मर्तुंस्थामितिश्लोकः॥ प्रभात्मावस
रे प्रवासस मध्ये दृष्टीति प्रवक्ष्यस्य सूतिकनायिक्तांगे ध्वितिश्लोकः॥ यात्स्या पनः स्तनद्वंद्वे भेमेखलापथ्येवोसलप
त्रालतीति तंडुलत्वपत्रकं दुर्वीस्तनद्वंद्वे च प्रवासं गजतः स्मारणीयकं संहताश्चतस्त्रस्ति स्थोवालेखाइतिनखकर्म
णीति॥ पुष्पजातिवृत्तं॥७॥ नखंप्रसुक्तं प्रणयार्द्रसंज्ञैर्देशेतदेवास्तिमनोभवस्य॥ सर्वस्वमत्यंतसुखैकहेतुर्ना
तोस्ति किंचिद्दरकामिनीनां॥८॥ अथनखक्षतप्रशंसामाह॥ नखमिति॥ रसहेः प्रणयार्द्रम्णः प्रणयास्तुमी॥
दिग्धं नयंतानाप्रेमाण इत्यमरः॥ यत्तन्नखंप्रयुक्तंकामिन्यावयवेष्विति शेषः॥ एतदेव मनोभवस्य कामस्य सर्वस्वं
गुप्तधनमस्ति॥ कामिनीनां योषितामत्यंतसुखस्य एकहेतुरसाधारणकारणमत एतदेवमपादि किंचिन्नास्ति॥ १०९

217

इदं नायिकाभिरपि नायकांगेषु कार्यं ॥ मधोर्गं ताम्बूलास्यापनं ग्रंथे ॥ आकृति विकार युक्तानि चान्योन्यमपि कुर्यात् आविकारा
णामानं न स्यादनंतराच्च कौशलविधेरभ्यासस्य सर्वेणाभिलाद्राणमुकलाश्चैद्यस्य प्रकारान् कोभिसमी॥ स्तितुमर्ह
तीस्वान्यायोः॥ भवति रागोपि चित्राक्षरावैचित्र्याच्च परस्परं रागो जनयितव्यः॥ वैचक्षण्य युक्ता गणिका स्तकामिनश्च
परस्परं प्रार्थनीया भवंति॥ धनुर्वेदादिष्वपि हिकमरणशास्त्रेषु वैचित्र्यमेवापेक्ष्यते किं पुनराहितेति वात्स्यायनः॥ ननु
परपरिगृहीतास्वेवं कुर्यात्॥ नन्विति निश्चयार्थकं॥ कुर्यादेवेति तदर्थेः॥ प्रछन्नेषु प्रदेशेषु तासामनुस्मरणार्थं
रागवर्धनार्थं च विशेषानदर्शयेत्॥ नखक्षतानि परपंसा गूढस्थानेषु योजितः॥ विरोहत्स्वप्यभिनवा प्रीतिर्भव
ति पेशला॥ चिरोत्सृष्टेष्वरागेष्वप्रीतिर्भजे सरागं भवे॥ रागापतनसंस्मारं यदि न स्यान्नखक्षतं॥ पश्यतो युवतीं दूरा

११०

नखो ऽसि हृदये धृतः ॥ अङ्गुमानः दरस्यापि रागयोगश्च जायते ॥ पुरुषस्य प्रदेशेषु नखचिह्नैर्विचित्रितः ॥ प्रदेशे
षु तेषु यवप्रदेशेषु चिह्नं स्थिरमपि प्राय श्चाल्पसेवयोषितः ॥ नातः परतरं किंचिद्रतिरागविवर्धनं ॥ नख
दंतसमुत्थानां कर्मणां गतयोऽपरे सलमति विस्तरेण ॥ उपजातिवृत्तं ॥ ८ ॥ इति नखच्छेद्यभेदाः ॥ ॥ ९ ॥ अथ स्थानवि
धि ॥ अथ नखविधिनिरूपणानंतरं दशनविधिं दंतक्षतप्रकार इत्यर्थः ॥ निरूपयति इति शेषः ॥ मुखप्रदेशेषु रताः
प्रयोज्या नासानयनांतनयनानि हि सा ॥ हिंकारसीत्कारविशेषयुक्तो दंतार्पणे कामकलाविधिज्ञैः ॥ ॥ अथ दंतक्ष
तस्थानानि तात्कालिकरागवृद्धिरोष्ठश्चाह ॥ नखेति ॥ नासानयनांत मुखाभ्यंतरं स्तनयनेचेति इदं इत्या नि हि सावि
हायमुखप्रदेशेषु प्रोक्तमुखस्थानेषु मुखकरणचुंबनस्थलेष्वित्यर्थः ॥ दशादंता प्रयोज्याः कामकलाविधिज्ञैः ११०

ईतादेणेसन्निहिः कारसीत्कारयोर्वक्ष्यमाणलक्षणयोर्यो विक्षेपः स उक्तः कथितः ॥ वात्स्यायनः ॥ पुनरोष्ठमंतर्मुखेन
यन्नमितिमुत्थाप्य चुंबनं बहिर्गतच्छेद्यस्थानानीति ॥ उपजातिवृत्तं ॥ १ ॥ रागस्फुरस्निग्धतराः समाना ह्यग्राश्च सूक्ष्माः स
शिखाः सभासः ॥ दंताः प्रशस्ता अतिखर्वरूक्षाः करालका द्याम लिनाश्च निंद्याः ॥ २ ॥ अथ दंतानां गुणान् दोषांश्चा
ह ॥ रागेति ॥ रागस्फुरंतश्च ते स्निग्धतराश्चैवंभूताः समानाः सूक्ष्माः सशिखाः साग्राः सभासः कांतियुक्ता दंताः प्र
शस्ताः स्युः ॥ अतिखर्वा अत्यंतह्रस्वाः सोवणा रूक्षास्तथाभूताः करालाः भयकराश्चैव ते बाह्या बहिर्निर्गता एवंभूताः
मलिनाश्च दंता निंद्याः स्युः ॥ वात्स्यायनः ॥ समाः स्निग्धच्छाया रागग्राहिणो युक्तप्रमाणा निश्छिद्रास्तीक्ष्णाग्रा इति
दशनगुणाः ॥ कुंठा अस्फुटिताः परुषा विषमाः श्लक्ष्णाः पृथवो विरला इति च दोषा इति ॥ उपजातिवृत्तं ॥ २ ॥ अथ पर

११९

स्थितरागमात्रकं रदलेखं किल गद्दकं विदुः॥ दशनच्छदगंडपीडनादिह मुच्छूनकमुच्यते बुधैः॥३॥ अथ गद्दकमु
च्छूनकं विंदुर्बिंदुमाला प्रवालमणिर्मणिमाला खंडाभ्रकं वराहचर्वितमिति दशनच्छेद्यविकल्पा इति वा स्यापन
ग्रंथेदृतस्तद्भेदाः प्रोक्तास्तत्र गद्दकलक्षणमाह॥ अधरेति॥ अधरे अधरोष्ठे स्थितं रागमात्रं यस्मिन्निस्त्येवंभूतं
रदलेखं रदस्य लेखा यस्मिन्नेवंभूतं॥ अतिसूक्ष्मामित्यर्थः॥ रदस्य लेखेति गद्दकं गद्दकाख्यं दंतच्छेद्यं विदुर्जा
नंतिस्म बुधा इति शेषः॥ बुधैर्दशनच्छदोऽधरोष्ठस्तद्युक्तो यो गंडस्तस्य पीडनाद्धेतोरिदं गद्दकमेवोच्छूनकसंज्ञ
कमुच्यते कथ्यते॥ ओष्ठगंडपीडनमुच्छूनकं तदभावे गद्दकमित्यर्थः॥ वात्स्यायनस्तु नातिलोहितेन रागमा
त्रेण विभावनीयं गद्दकं॥ तदेव पीडनादुच्छूनकमिति॥ वैतालीयं वृत्तं॥३॥ दंतोष्ठयोगः सा विंदुर्वसाध्यः प्रवाल

११९

प्रवालमणिरेष उक्तः॥ अभ्यासयोगेन च दंपतीभ्यां संसाध्यते नान्यविनोदिमास्तु॥४॥ अथ प्रवालमण्याख्यं दृष्टान्तभेद
माह॥ दंतोष्ठयोगइति॥ स एव विशेषेण साध्य एवं मतो दंतोष्ठयोगः प्रवालेति पूर्वमुक्तो स चासौ मणिश्चेति॥ प्र
वालमणिरित्यर्थः॥ उक्तः कथितः॥ दंतोष्ठयोर्योगविशेषसाध्य इति पाठे दंतोष्ठयोर्योगविशेषो विलक्षणयोगस्ते
न साध्य एव प्रवालपूर्वं मणिरुक्तः शेषं समानं अर्थं दंपतीभ्यामभ्यासयोगेन परोनः पुनर्योगेन संसाध्यते॥ अ
न्ये परस्या स्यात्मा विनोदितः प्रेरित आचरितः इति यावत्॥ न स न भवतीत्यर्थः॥ नान्यविनोदरतास्विति पाठे अन्य
श्चासौ विनोदश्चान्यविनोदः न अन्यविनोदो नान्यविनोदः इति सुप्सुपेति समासस्तस्मादिति ततः अनन्यकेलीड्ये
कोपेणेत्यर्थ इति तदर्थः॥ वात्स्यायनः॥ दंतोष्ठसंयोगाभ्यासनिष्पादनात्प्रवालमणिसिद्धिरिति॥४॥ अथ रे

तिलके च कामिनी रदपुंगेन खंडने कृते ॥ इति बिंदुरुद्दीरितो ॥ खिलैर्दशनैः स्यात्किल बिंदुमालकः ॥ ५ ॥ अथ बिं-
दोर्बिंदुमालकस्य च लक्षणमाह ॥ अधर इति ॥ अधरे अधरोष्ठमध्ये तिलके तिलकस्थाने कपोले चेत्यर्थः ॥
तिलतुल्य इति वा ॥ कामिन्या रदपुरःसंदंशरूपेण तेन विखंडने कृते सति ॥ एवंप्रकारेण बिंदुरुद्दीरितः प्रोक्तः ॥
कामिनीति पुरुषस्याप्युपलक्षणं ॥ कामिने इति पाठः साधुः ॥ अखिलैः संपूर्णैर्दशनैर्दंतैरधरे तिलके च विखंड-
ने कृते सति बिंदुमालकः स्यात्किलेति निश्चयार्थकं ॥ वात्स्यायनग्रंथे ॥ तदुभयं बिंदुरधरमध्य इति ॥ स्वल्पदेशा-
पाचेत्स्यो सानद्वय संदंशजा बिंदुसिद्धिः ॥ सर्वैर्बिंदुमालाया श्चेति ॥ अत्र बिंदुमालकस्य प्रोक्तस्थलमेतद्दु-
पकर्तुरेवाभिप्रायेण बोध्यं ॥ अथ पोलस्थलोक्तस्थितकपोलकक्षागलभालदेशा इति समस्यंत पदार्थे स्यात्रै

११२

वान्वयः॥ एतदुदलक्षणकत्वेनान्यदपि वक्ष्यमाणादिकमेतत्सूचितं ज्ञेयं॥ सर्वैर्बिंदुमालायाः॥ तन्मालाद्वयमपि
गलकक्षवंक्षणप्रदेशेषु ललाटेचोर्वोर्बिंदुमालेति वा समापनोक्तेः॥ सर्वैरंती र्बिंदुमालायाः सिद्धिः॥ तन्मा
लाद्वयं बिंदुमाला मणिमालेति रूपं गलकक्षवंक्षणप्रदेशेष्वपि॥ बिंदुमाला ललाटऊर्वोश्चेति सत्त्वार्थः मणिमा
ला लक्षणं॥ सर्वैः सिता प्रस्थाने मणिबिंदुमाले वक्षाललाटगलवंक्षणभजने श्चितिरतिरहस्यो कं ज्ञेयं॥
दंतद्वयस्योष्ठस्य च योगो विशेषसाध्यः प्रवालमणिः॥ बहूनां तेषां तस्य च योगो मणिमालेति द्वयोर्भेदः॥
वैतालीयं वृत्तं॥५॥ कपोलकक्षागलभालदेशे खंडाभ्रकं स्यात् दशनाग्रलेखं॥ तन्मंडलाकारकमंगनानां मगेषु
शोभां लभते नितांतं॥६॥ अथ खंडाभ्रकलक्षणमाह॥ कपोलेति॥ कपोलस्य कक्षे च गलस्य भालदेशश्चेति द्वंद्वैकव

२२५

११२

द्वारवस्तस्मिन्नृक्षानां ग्राणां इंताग्राणां ने स्वं॥ खंडाभ्रकस्याप॥ मंडलाकारकं मंडलाकारं तत्खंडाभ्रकमंगनानां मि
गो चुनितां तं शोभां लभते प्राप्नोति॥ अत्रापि प्रोक्तस्थानमेतत्कूप तल्लाभिप्रायेणैकश्लेषं॥ म हासधम्यं तस्य प्रक्षि
न्वयि वेत्रागे वस्यास्यातं॥ अंगनानां मंगोधि इति अत्रांगनानां स्तने श्चिति पाठप्रकल्परति रहस्यादि ग्रंथांतरैकवा
क्यता भास्याम्न ग्रंथसम्मतिश्चोत्नेमा॥ मंडलामि वक्षिपम कूटपुक्त खंडाभ्रकं स्तन एवेति॥ ई द्रवज्रावज्रो॥ ६॥
अरवर्वे सांद्राद्क्षानां वलीपाकांतां शरीरे क्षिपते स्वभर्त्रो॥ प्रस्थानकाले स्मातिहेतुभूता तक्रोल चर्वैपर्वदं इति वि
ज्ञा॥ ७॥ अथ कोत्स्वर्वो रवयदंतक्षतलक्षणमाह॥ अरवर्वेति॥ स्वभर्त्रा प्रस्थानकाले कांताशरीरे अखर्वो महसा त
रासा वा सौ सांद्रा स्निग्धे से वंभूता मार्दरनावली दंतक्षत पंक्तिः क्षिप्यते॥ तत्र हेतुगर्भ विशेषणं स्मातिहेतुभूता ११२

225

स्मरणकरणभूतेति ॥ विज्ञां बुधास्तदिस्मत्रयि धेयलिंगता ॥ को लक्ष्यं वर्तितसंज्ञकं दंतक्षतं प्रवदंति ॥ आस्वादनः ॥ प्र
दीर्घावक्त्रो स्तनपदराजयस्तास्त्रांतरालावराहचर्वितकं ॥ स्तनपृष्ठस्य ॥ तदुभयमपि चर्चं उरोगयोरिति हरान
क्षेप्यानीति ॥ तदुभयं खंडाभ्रकं वराहचर्वितकं चेत्यर्थः ॥ उपजातिवृत्तं ॥ ७ ॥ इति दंतक्षतानि ॥ अथ केशग्रहणोद्देशः
॥ अथ दंतक्षतनिरूपणानंतरं केशग्रहणस्योद्देशो नाम्नां संकीर्तनं क्रियत इति शेषः ॥ स्निग्धा घनाः कुंचितनी
लवर्णाः केशाः प्रशस्तास्तरुणीजनानां ॥ प्रेमप्रवृद्ध्यै विधिनैव मर्दं ग्राह्या नरैश्चुंबनदानकाले ॥ ८ ॥ अथ केशग्रह
णप्रकारमाह ॥ स्निग्धा इति स्निग्धाः सांद्राः चिक्कणा घना हृद्याः कुंचिताश्च ते नीलवर्णाश्चेत्येवंभूतास्तरुणीजनानां
केशाः प्रशस्ताः स्युः ॥ नरैस्ते प्रेमप्रवृद्ध्यै विधिनैव कामशास्त्रोक्तप्रकारेणैव चुंबनदानकाले मर्दं यथा स्यात्तथा

228

ग्राह्याउदाहरणः॥ इंद्रवज्रा वृत्तं॥१॥ चिकुरान्परिगृह्य चुंबति करयुग्मेन पतिः प्रियां यदि॥ समहस्तकमित्युच्यते तोयदि हस्तेन तरंगरंगाकं॥९॥ चिकुरेति॥ यदि पतिः प्रियः करयुग्मेन चिकुरान्केशान् परिगृह्य समादाय प्रियां चुंबति॥ तर्हि समहस्तकं तत्संज्ञकं करणकर्षणमिति स्यात्॥ अथ एकतएकस्मिन् भागे हस्तेन तानुपरिगृह्य परिचुंबति॥ तर्हि तरंगरंगकं तरंगरंगकसंज्ञकं स्यात्॥ वैतालीयं वृत्तं॥९॥ परिवेष्ट्य करेण कुंतलान्म दृशं नर्तोयदि संधारयेत्प्रियां॥ रतिकेलिकलापकोविदाः कथयंतीति भुजंगवल्लिकं॥१०॥ परिवेष्ट्येति॥ पुरुषो मदनेन कामेन नर्मः पीडितस्तथाभूतः सन् यदि प्रियां करेण कुंतलान् केशान् परिवेष्ट्य धारयेत्॥ तर्हि रतिकेलिकलापसुरतक्रीडासमुदायकोविदाः॥ इत्येवं प्रकारं भुजंगवल्लिकं तत्संज्ञकं केशकर्षणं कथयंति वदंति॥

२२१

वैतालीयं वृत्तं ॥ १०॥ कर्णप्रदेशास्यकपोलान्विगृह्य परस्परं चुंबति यत्र नारी ॥ पतिश्च रागात्सुरतावसाने कामावतं
सः स कचग्रहः स्यात् ॥ ११॥ कर्णेति ॥ अत्र यस्मिन् कचग्रहे नारी पतिश्च सुरतावसाने सुरतांते रागात्प्रेम्णा क
र्णप्रदेशोल्लिंगंती स्वेवं भूतान् कपोलान् केशान् ॥ चिकुरः कुंतलो वालः कचः केशः शिरोरुह इत्यमरः ॥ विगृह्य परस्प
रमन्योन्यं चुंबति ॥ स कामावतंससंज्ञकः कचग्रहः स्यादिति उपजातिवृत्तं ॥ ११॥ इति प्रदिष्टान्यपि तानि सि
द्धाः कामाल्पमायाह्यरतप्रकाराः ॥ प्रसिद्धभावाद्बहुशोपरत्र न दर्शिता विस्तरतां कृपाणः ॥ १२॥ अथ बाह्यरतोप
संहारमाह ॥ इतीति ॥ मदायसिद्धाः ॥ कतिचिज्जीह्यरतप्रकाराः ॥ बाह्यमाभ्यंतरं चेति द्विविधं रतमुच्यते ॥ तत्राद्यं
चुंबनाश्लेषनखदंतक्षतादिकं ॥ द्वितीयं सुरतं साक्षात् नानाकारणकल्पितमिति ॥ द्विविधं रतं ग्रंथांतरे उक्तं ॥ तत्र प

२२८

११५

ह्यार्ध्वरतमालिंगनादिनस्तत्प्रकाराः॥ इत्येवंप्रकारेण क्रमात् त्रिहाः कथिताः। अपरे अन्ये बहवः प्रसिद्धभावात्प्र
सिद्धत्वात् विस्तरशंकया ग्रंथविस्तरशंकया वात्र न प्रदर्शिता इति विवेकः॥ २३॥ इति बाह्यसंभोगाभिरूप
णं॥ अथ सुरतभेदाः निरूप्यंते॥ अथ केशग्रहणानंतरं सुरतभेदाः अभ्यंतरसुरतविशेषा निरूप्यंते वर्ण्यंते॥ सा
म्यानुरूपान् प्रविधाय पूर्वं विज्ञः पुमान् बाह्यरतोपचारान्॥ विधिश्लथीभूतवरांगदेशां भजेत कांतां स्मरके
लिरंगे॥१॥ साम्येति॥ विज्ञः कामकलावित् पुमान् साम्यानुरूपान् पूर्वोक्तजातिभेदादिभिर्यत्साम्यमुभयोस्त
मसं स्यात् तद्रूपाः अनुगुणाः एवंभूतान् बाह्यरतोपचारान् पूर्वोक्तालिंगनादिप्रकारान् पूर्वमादौ प्रविधाय कृ
त्वा विधिना पूर्वोक्तेन श्लथीभूतो वरांगदेशो गुह्यरंध्रं यस्याः एवंभूतां कांतां स्त्रियं स्मरकेलिरंगे कामक्रीडास्थ्ला ११५

२२९

नैभजेत समेवेत आभ्यंतरसुरतं कुर्वीत लघ्यः॥ उपजातिवृत्तं॥१॥ दृढापि नारी श्लथतामुपैति प्रसारणादूरुयुग
स्य सद्यः॥ अपि श्लथा संयमितोरुयुग्मा गच्छेद्दृढत्वं सुरतप्रयोगे॥२॥ अथ सुरतावरणप्रकारमाह॥ दृढेति॥
दृढापि गाढभगेत्यर्थः॥ नारी स्त्री ऊरुयुगस्य प्रसारणात् श्लथतां शैथिल्यमुपैति प्राप्नोति॥ श्लथापि शिथिल
भगापि नारी संयमितमूरुयुग्मं यस्यास्तथाभूता सती सुरतप्रयोगे दृढत्वं गच्छेत्प्राप्नुयात्॥ नाडी तिंदाठ प्रके
काशस्त्रीयोनिरंध्रस्था नाडी ग्राह्या॥ संवेशनप्रकारस्तु वात्स्यायनग्रंथे विशदः कृतोपद्या॥ रागकाले वि
राग लघ्यं स्येव जघनं मृगी संविरोदुच्चरते॥ अकन्हासयंतीव हस्तिनी नीचरतेन्यायो यत्प्रयोगस्तत्प्रसम
दृष्टकं॥ आभ्यां वड्वा व्याख्याता॥ तत्र जघनेनायकं प्रति गृह्णीयात्॥ अपद्रव्याणि च सर्विशोयं नीचरते॥

२३०

११६

उत्फुल्लकं ॥ विजृंभितकं ॥ इंद्राणी चेति मृगयाः ॥ प्रायेणाशिरोविति पाद्यमूर्ध्वं अधनमुत्फुल्लकं ॥ तत्रापसारं
दद्यात् ॥ अनीचे साक्थिनी तिर्यगवष्टभ्य प्रतीछेदिति विजृंभितकं ॥ [illegible] पार्श्वयोः सव्यमूरुं
विन्यस्य पार्श्वयोर्जानुनी विदध्यादिभ्यासयोगादिंद्राणी ॥ एतयोरुत्तरस्यापि परिग्रहः संपुटेन प्रतिग्रहणी
यानीचरते ॥ एतेन नीचतररतस्यापि संपुटकं ॥ पीडितकं ॥ वेष्टितकं ॥ वाडवकमिति हस्तिन्याः ॥ ऋजुप्रसारिता
वुभौ चप्युभयोश्चरणाविति संपुटः ॥ स च द्विविधः ॥ उत्तानसंपुटः ॥ पार्श्वसंपुटश्चेति ॥ तथा कर्मयोगात् पार्श्वे
न तु शयानो दक्षिणेन नारीमधिशयीत ॥ सार्वत्रिकमेतद्धि सादि ॥ उपजातिवृत्तं ॥ २ ॥ उत्तानकेति दिग्पासिता एवं
स्थितं तथैवानतकं रतहेतोः ॥ पंचप्रकारं सुरतं प्रदिष्टं तस्य प्रभेदान् क्रमतो ब्रवीमि ॥ ३ ॥ अथ सामान्यतः पंचवि

११६

धं रतमुद्देशेनाह ॥ उत्तानकमितिरतं जानंतीत्येवं मतैः बुधैः सुरतं ॥ उत्तानकमुत्तानसुप्तायां योषिति पुरुषेण वि
धीयत इति तत्संज्ञकं समपादादि ॥ तिर्यक् तिर्यक्स्थिताभ्यां क्रियमाणं तात्तन्नामकं वीणकादि ॥ अथासितास्व
मासीनाभ्यां विधीयमानत्वादन्वर्थसंज्ञं पद्मासनादि ॥ स्थितमुत्थिताभ्यामाचरितं तेनानुगुणनामकं कूर्परारव्यादि
॥ तथैवानतकं न्युब्जानतायामिंगनायां तथाभूतेन नायकेन क्रियमाणं ॥ मितियथार्थाभिधानं धेन्वादिकमेवं
पंचप्रकाराण्यस्मेयेवं भूतं प्रदिष्टं दर्शितं ॥ अर्द्ध तस्य पंचविधसुरतस्य प्रभेदान् वक्ष्यमाणान्विशेषानुक्रमतः
क्रमेण प्रवीमि कथयामीति ॥ उपजातिवृत्तं ॥ ३ ॥ अथादावुत्तानबंधाः ॥ अथास्मिन्ग्रंथे आदौ प्रथममुत्तान
बंधाः निरूप्यंत इति शेषः ॥ निधायपादौ रमणांसयोः श्चेदुत्तानसुप्तारमतोपुरंध्री ॥ इति प्रबंधं समपादसंज्ञं प्रो

२३२

११७

चुम्बनाभोग विधान दक्षा ॥४॥ अथ समपादसंज्ञकोत्तानबंधमेरोपलक्षणमाह ॥ निधायेति ॥ पुरंध्री स्त्रीउ
त्तान सुप्ता सती रमणांसयोः प्रियस्कंधयोः अधिकरणभूतयोः स्वकं योभुजमिरो तं सोस्त्री स्यमरः ॥ पादौ स्व
चरणौ निधाय स्थापयित्वा रमते क्रीडतीत्यर्थः तदा भोगविधानदक्षाः संभोगादरण दक्षाः समपादसंज्ञः समभोपा
दौ यस्मिन्निति समपादः स इति संज्ञा यस्य सद्वंधः ततः तरतेः प्रबंधसंप्रोच्युर्वदंति स्मेति ॥ उपजाति वृत्तं ॥४॥ उत्ता
निताघ्राः स्मरमंदिरेपि स्थितस्तु हस्तद्वयमुग्दृहीता ॥ संस्थाप्य बाहुं कटितो रमेत कांतस्तु शास्त्रालि नागरा
ख्यः ॥५॥ अथ नागराख्योत्तानबंधलक्षणमाह ॥ उत्तानितेति ॥ कांतः प्रियः उत्तानिताघ्राः नायिकायाः इ
ति शेषः ॥ स्मरमंदिरे गृह्ये स्थितः सन्नपि तद्हस्तद्वयं तस्या ऊर्वोर्द्वयं उद्गृहीता ऊर्ध्वमादाय कटितः स्वकटयोर्बाहुंच ११७

डिर्यदि संस्थाप्य स्थापयित्वा रमेत रतिं कुर्वीत तदा नागरहस्याख्या अस्येत्येवं भर्तो बंधः स्यादिति उपजातिवृत्तं ॥५॥
स्त्रीपादमेकं विनिधाय भर्ता स्कंधे स्वमौलौ निजपाणियुग्मं ॥ पृथ्व्यां समाधाय रमेत भर्ता त्रैविक्रमाख्यः करणं त
दा स्यात् ॥६॥ अथ त्रैविक्रमाख्यानां बंधलक्षणमाह ॥ स्त्रीति ॥ भर्ता एकं स्त्रियाः नायिकायाः पादं हस्तं भूमौ विनिधा
य अन्यं स्त्रीपादं स्वमौलौ स्वमस्तके विनिधाय स्थापयित्वा निजपाणियुग्मं स्वहस्तद्वंद्वं पृथ्व्यां समाधाय संस्थाप्य रमेत
क्रीडां कुर्वीत तदा त्रैविक्रमाभिधाख्यो अस्येत्येवं भर्तः करणं बंधः स्यात् ॥ यथा बलिविग्रहे त्रिविक्रमस्यैकः पादः पृ
थिव्यामेकः ऊर्ध्वे स्थितस्तथैवात्र नायिकायाः इत्यन्वयो संजातैतत्करणस्येति ॥ उपजातिवृत्तं ॥६॥ तल्पप्रसुप्ता
निजपाणियुग्मम् ऊर्ध्वे विधत्ते रमणी कराभ्यां ॥ स्तनौ गृहीत्वाथ भजेत कांतो बंधस्तदा व्योमपदाख्य उक्तः ॥७॥ अथ व्योम

१८

म पराख्य बंध लक्षणमाह ॥ तल्पेति ॥ तल्पे पर्यंके प्रसुप्तानिद्रिते सेवं भर्तारं मणी स्त्री कराभ्यां स्वहस्ताभ्यां कर
पाभ्यां निजपारयुग्मं स्वांघ्रिद्वयमूर्ध्वं विधत्ते करोति ॥ अथानंतरं कांतः प्रियः स्तनौ कराभ्यां गृहीत्वा भजेत् तसेवे
तपतिं कुर्वीतेत्यर्थः ॥ तदाख्योस्मिन्नंतरे शे पदे पासिम्निलिसे वध्वा ख्याय स्य सेवं भर्तोबंध उक्तः कथितः ॥ उपजाति
वृत्तं ॥ ७ ॥ कांतोरयुग्मांतरगः स्वहस्तौ निधाय भूमौ रमते पतिश्चेत ॥ बंधस्तदोक्तः स्मरवक्रसंज्ञः प्रेष्ठः सदा का
मिजनस्य लोके ॥ ८ ॥ अथ स्मरवक्रसंज्ञक बंधलक्षणमाह ॥ कांतोविति ॥ यदि भर्ता कांतायाः स्त्रियः ऊरुयुग्मस्य स्त
क्थिद्वयस्यांतरं मध्यं गच्छति प्राप्नोति स्वेवं भर्तः सन् स्वहस्तौ भूमौ निधाय स्थापयित्वा रमते क्रीडति चेत् ॥ कांतोरयु
ग्मांतरगः स्वहस्ताविति पाठे कांतोरयुग्मांतरं गच्छतस्तौ च तौ स्वहस्तौ चेत्यर्थः ॥ तदा लोके कामिजनस्य सदा प्रेष्ठः

११८

235

प्रियःस्म स्वश्वसंज्ञो बंधः प्रोक्तः॥ कथितः पुष्पजातिवृत्तौ ॥८॥ नार्याश्च पार्श्वे दयितः स्ववक्षःस्थितौ समालिंग्य क
रद्वयेन॥ किंचिन्नतोरू रमते तदासौ प्रोक्तो मुनींद्रै रविदारिताख्यः॥९॥ अथावदारिताख्यबंधलक्षणमाह॥
नार्या इति॥ दयितः प्रियः स्ववक्षःस्थितौ नार्याः पार्श्वे करद्वयेन स्वहस्तयुग्मेन समालिंग्य किंचिन्नता ऊरू यस्य स एवंभू
तः सन् रमते॥ तदा मुनींद्रै रविदारिताख्यो बंधः प्रोक्तः॥ उपजातिवृत्तं॥९॥ उत्तानितोरद्वयमध्यगामी हृद्दं समालिं
ग्य भजेत्प्रियत्र॥ कांतो विलासिप्रिय एष बंधः सौम्याख्य उक्तः कविभिः पुराणैः॥१०॥ अथ सौम्याख्यबंधलक्षण
माह॥ उत्तानितोर्विति॥ यत्र यस्मिन् बंधे कांतो भर्ता उत्तानिताया ऊरुद्वयस्य मध्यं गच्छतीत्येवंभूतः सन् हृद्दं समा
लिंग्य कांतामितिशेषः॥ भजेत् सेवेत रतिं कुर्वीतेत्यर्थः॥ पुराणैः प्राचीनैः कविभिर्विलासिनां प्रियस्तथाभूत एष

सौम्याख्यो बंधउक्तः कथितः इति उपजातिवृत्तं ॥१०॥ ऊर्वौ युगं वक्रमुदंचितं च कृतं तु जाती भजते पतिश्चेत् ॥ आनं
दकर्त्ता तरुणी जनानां बंधो यमुक्तः किल जृंभिताख्यः ॥११॥ अथ जृंभिताख्यबंधलक्षणमाह ॥ ऊर्वोरिति ॥ पतिर्भर्त्ता
ऊर्वौ युगं स्वस्य कांतायाश्च ॥ वक्रमुदंचितमूर्ध्वंगतं चलसां तु जाती स्त्री यं भजते सेवते चेत्तदा तरुणी जनानां आ
नंदकर्त्तायं जृंभिताख्यो यं बंधउक्तः किलेति निश्चये ॥ इंद्रवज्रावृत्तं ॥११॥ कांतोरुयुग्मं परिवर्तितं च निःपीडयन् कामा
कुलचित्तवृत्तिः ॥ रमेत भर्त्ता यदि वेष्टिताख्यं तदेति बंधं मुनयो वदंति ॥१२॥ अथ वेष्टिताख्यबंधलक्षणमाह ॥
कांतोर्विति ॥ भर्त्ता प्रियः परिवर्त्तितं भ्रमितं कांताया ऊर्वोर्युगं निःपीडयन् कामेनाकुलचित्तस्य वृत्तिर्यस्य स एवं
भूतः सन् रमेत क्रीडां कुर्वीत चेत्तदा मुनयः इमं एवंप्रकारं वेष्टिताख्यं बंधं वदंति ॥ उपजातिवृत्तं ॥१२॥ स्कंधप्र

देशे विनिधाय पत्नं घर्मितां तद्वत्सामध्यसंविशाय॥ अथो विनीय प्रबलं रमेत भर्ता पदा वेणुविदारितं तत्॥१२॥ अथ
वेणुविदारिताख्योत्तानबंधलक्षणमाह॥ स्कंधेति॥ भर्ता नायकः प्रियायाः इति शेषः॥ एकां जंघां प्रसृतां॥ जंघा तु प्र
सृता जानूरूपर्वाष्ठीवदस्त्रियामित्यमरः॥ स्कंधप्रदेशे स्वस्येति शेषः॥ विनिधाय विशेषेण स्थापयित्वा अथानंतरं
तदन्यां तस्या अन्यां द्वितीयां तां जंघां संविशाय अधः शय्याप्रदेशे विनीय विशेषतः स्थापयित्वेत्यर्थः॥ पदा पादेन प्र
सुरतकाले प्रबलमिति क्रियाविशेषणं रमेत रतिं कुर्वीत तत्तद्रतं वेणुविदारिताख्यं॥ वेणुविदारणवत् जंघाद्वयवि
दारणात् अन्वर्थसंज्ञं स्यादिति॥ उपजातिवृत्तं॥१३॥ विलासिनी संहतमूरुयुग्मं हृत्तोर्ध्वमालिंग्य भजेत भर्ता॥ उ
द्भूतकः स्यात्समदांघ्रियुग्मे कांतोरसि स्वे स्फुटवान्यदिष्टः॥१४॥ अथोद्भूतकाख्योत्तानबंधं स्फुटवदाह॥ख्य

बंधंचाह ॥ विलासिनीमिति ॥ भर्त्ता विलासिनीं स्त्रियं तस्याः संहतं संलग्नम् ऊरुयुग्मं मर्द्दयित्वा आलिंग्य च भजेत् सेवेत तद्रतिं कुर्वीत स्मर्येः ॥ नरेति शेषः ॥ उद्भिन्नक उद्भिन्नकाख्यबंधः स्यात् ॥ अयमेव प्रमर्दाङ्घ्रियुग्मेप्यभिज्ञैरण दृष्टकांतोरसि स्थेकांतस्य प्रियस्योरसि वक्षसि तिष्ठतीत्यलुक् समासः ॥ तथा भर्त्ते सति स्फुटया न स्फुटयसिक्तकेः प्रदिष्टः कथितः ॥ नागरिकैरिति शेषः ॥ उपजातिवृत्तं ॥ १४ ॥ इति उत्तानबंधाः ॥ अथ तिर्यग्बंधाः ॥ अथोत्तानबंधनिरूपणानंतरं तिर्यग्बंधानिरूप्यंत इति शेषः ॥ कांतांघ्रिमेकं हृदये स्वकीये निधाय भर्ता शयने द्वितीयं ॥ कुर्याद्रतिं चेदिति वीणकाख्यः प्रोदांगनापां परिकल्पनीयः ॥ १ ॥ अथ तिर्यग्बंधेषु प्रथमोद्दिष्टवीणकाख्यबंधलक्षणमाह ॥ कांतांघ्रिमिति ॥ भर्त्ता प्रियः कांतांघ्रिं प्रियाचरणं स्वकीये हृदये निधाय संस्थापयित्वा

द्वितीयं तं राग्यने पर्यंकादौ निधाय सन्तु बंधः ॥ रतिं सुरते कुर्यात् तर्हि इत्येवं प्रकारकः वीणकाख्यो वीणक
संज्ञकस्तिर्यग्बंधः स्यात् ॥ अयं प्रौढांगनायां पतिमात्रविषयककेलिकलापकोविदा प्रगल्भेत्युक्तलक्षणायां त्रिंश
द्वर्षाधिकवयस्कायां योजितिपरिकल्पनीयो योजनीय इति ॥ उपजातिवृत्तं ॥ १ ॥ पार्श्वे प्रसुप्त प्रमदोपरिस्थः कांतः
समालिंग्य रतिं करोति ॥ यत्र प्रदिष्टो मुनिभिः पुराणैर्बंधस्तदा संपुटनामधेयः ॥ २ ॥ अथ संपुटाख्यबंधलक्षण
माह ॥ पार्श्वे इति ॥ कांतो भर्त्ता पार्श्वे प्रसुप्तायाः स्वाभिमुखं निद्रितायाः प्रमदायाः स्त्रियाः उपरि तिष्ठतीत्येवं भूतः सन् त
त्क्षण एवेति शेषः तां समालिंग्य परिरभ्य यत्र बंधे रतिं करोतीति विदधाति पुराणैर्मुनिभिर्वात्स्यायनादिभि
स्तदा संपुटनामधेयः संपुटाख्यो बंधः प्रदिष्टः कथितः ॥ इंद्रवज्रावृत्तं ॥ २ ॥ यदंगनाकुंचितपादयुग्मं स्व

250

२१

नाभिदेशे परिकल्प्य भर्ता ॥ रतिं प्रकुर्यादिति कुक्कुटाख्यं तत्राकवीन्द्रैः करणं प्रदिष्टं ॥३॥ अथ कुक्कुटाख्यबंध
लक्षणमाह ॥ यदीति ॥ भर्ता यदि यर्हि अंगनास्त्री तस्या आकुंचितं संकुचितं पदसादयुग्मं तत्तस्य नाभिदेशे
परिकल्प्य कल्पयित्वा रतिं कुर्यात् तदा कवीन्द्रैः कविश्रेष्ठैरेवं प्रकारं कुक्कुटाख्यं कर्कटाख्यमित्यपि पाठः ॥
करणं प्रदिष्टं कथितं उपजातिवृत्तं ॥३॥ अथोपविष्टबंधाः ॥ अथ त्रिभिर्बंधनिरूपणानंतरं उपविष्टबंधाः
स्त्रीपुरुषाभ्यामुपविश्य क्रियमाणा रतिप्रकारा इत्यर्थः ॥ निरूप्यंते इति शेषः ॥ प्रेंखाविलासं प्रसभं वहंत्या वि
पर्ययात् जंघयुगस्य नार्याः ॥ पद्मासनस्यादयथैक जंघाविपर्ययादूरुपदं प्रविष्टं ॥४॥ अथ पद्मासनाख्य
बंधलक्षणमस्य प्रख्यबंधलक्षणं चाह ॥ प्रेंखेति ॥ प्रेंखाविलासं दोला तस्य विलासं प्रसभं हठात् वहंत्या ना

२१

मौः स्त्रियाजंघपृष्ठास्य प्रसृताद्रूपस्य अत्र जानाभीरिप्रयोगत्वादेकस्मिन्नेव प्रयोगिकाः ॥ तादृश्यो रन्ध्रतो वृत्ता नद्या
लिंगांतरे पितइत्यु मरस्त्रामाण्यात जंघाद्वयस्यान्य लिंगता ॥ विपर्यासात भर्तुर्यो नरो दक्षिणजंघा प्रक्षेपस्तद्दक्षि
णौरो निजवामजंघा प्रक्षेपणमेवं रूपा सद्मासनं स्यात् ॥ अथवैकजंघा क्षेपपर्यायात्स्त्री दक्षिणोरौ वामजंघा
स्थापनं तद्वामोरौ निजदक्षिणजंघास्थापनमेतद्रन्ध्रतरस्यात उत्पदं ऊरोपस्थं । स्मिन्निसन्वर्थसंज्ञकमा
सनं परिष्टंकथितं ॥ उपजातिवृत्तं ॥ ४ ॥ स्वजानुयुग्मांतरनिर्गतौ चेद्भुजौ स्वकंठे विनयेन्मृगाक्षी ॥ कांतो पिकृत्वे
ति विधिं प्रगच्छेत्तदा बुधैर्बंधुरितास्यमुक्तम् ॥ ५ ॥ अथ बंधुरितास्योपविष्टबंधलक्षणमाह ॥ स्वजान्विति ॥
मृगाक्षी स्त्री स्वजानुयुग्मस्य यो अंतरं मध्यं तस्मात् निर्गतावेवंभूतौ स्वस्याः एव भुजौ स्वकंठे विनयेत् स्थापयेत् त्वे

१२

त॥ कांतोपि इत्थमेवं पूर्वोक्तविधिं प्रकारं कृत्वा स्वजानुद्वयमध्याभ्यां निर्गतौ स्वभुजौ स्वकंठे [illegible]॥ कांतोपि
~~कंठे तिविधिं [illegible] तदा बुधैर्बंधुरितारव्य [illegible]॥ अथ बंधुरिताख्योपविष्टबंधलक्षणमाह॥ [illegible]॥~~
निधाय स्त्रियः॥ प्रगाढं तरतिं कुर्यात् स्त्रियः॥ तदा बुधैर्बंधुरितारव्य स्तत्संज्ञक बंधउक्तः॥ उपजातिवृत्तं॥ ५॥ उक्तप्र
कारेयदि दंपती स्वौ भुजौ तु कृत्वा मणिकूर्परस्थौ॥ स्वैरं रमेते करणं प्रदिष्टं तदा कवींद्रैः फणिपाशसंज्ञं॥ ६॥ अथ
फणिपाशसंज्ञबंधलक्षणमाह॥ उक्तेति॥ यदि तु दंपती जायापती उक्तप्रकारैः पूर्वोक्तप्रकारैः॥ स्वभुजौ मणि
कूर्परौ कफोण्यपरनामको हस्तावयवविशेषौ स्यात् कफोणिस्तु कूर्परः इत्यभिधानात्॥ तयोः स्थितौ तदा स्वैरं भूतौ कृत्वा स्व
मणिकूर्परमध्यनिर्गतौ विधाय स्वैरं स्वेच्छया रमेते रतिं कुर्वीत तदा कवींद्रैः फणिपाशसंज्ञं करणं प्रदिष्टं

१२२

243

धितं ॥ उपजातिवृत्तं ॥६॥ निधायजंघायुगलंयुवत्याः स्वकीययोः कूर्परयोरधस्याः ॥ कंठेस्वबाहू परिरभ्यगच्छेत्स
तिस्तदा संयमनाख्यउक्तः ॥७॥ अथसंयमनाख्यबंधलक्षणमाह ॥ निधायेति ॥ पतिर्भर्तायुवत्याः स्वकीययोः
कूर्परयोरधस्याः ॥ कंठेस्वबाहू परिरभ्यगच्छेत्सतिस्तदासंयमनाख्यउक्तः ॥७॥ अथसंयमनाख्यबंधलक्ष
णमाह ॥ निधायेति ॥ पतिर्भर्ता युवत्याः योषितः जंघायुगलंप्रसृतावूर्ध्वंस्वकीययोः कूर्परयोः कफोण्योर्निधाय सं
स्थाप्य अनंतरं अस्याः कंठेस्व बाहू स्वीयभुजौ परिरभ्य आधाय गच्छेत् रमेत् निर्विघ्नं ध्यायेत् ॥ तदासंयमनाख्यः
संयमनमिव आख्या यस्य सः बंधः उक्तः कथितः ॥ अस्यैवं धुरीणमित्यपि संज्ञा ॥ उपजातिवृत्तं ॥७॥ मुखे
मुखं बाहुयुगे स्वबाहू जंघाद्वये जानुयुगं निवेश्य ॥ गच्छेत्सतिश्चेदिति कामुकः स्यादूर्ध्वोत्सयुग्मासखिनीलाख्यः ॥

१२३

॥८॥ अथ कामुकाख्यबंधलक्षणं परिवर्तिताख्यबंधलक्षणं चाह ॥ मुखमिति पतिः प्रियः पत्न्याः मुखे स्वस्य मुखं
निवेश्य ॥ वा कुचयुगे स्त्रियाः इति शेषः स्वबाहु स्वभुजौ निवेश्य तस्याः पादद्वयं स्वस्य अंसयुगे निवेश्य गच्छेत् रतिं
विदध्याच्चेत् ॥ इत्येवंप्रकारं कामुकाख्यं कामुकसंज्ञकं रतं स्यात् ॥ इदमेव ऊर्ध्वोरुयुग्मात् पुरुषस्योपरि शेषः ॥
परिवर्तिताख्यं परिवर्तितमित्याख्या यस्य एवंभूतं स्यात् ॥ उपजातिवृत्तं ॥८॥ स्थितां स्त्रियं कुंचितपादयुग्मां त
थैव भर्ता कृतनिर्गमः ॥ भजेत चेत् कामकलाविदग्धो बंधं तदा युग्मपदं वदंति ॥९॥ अथ युग्मपदाख्यबंधल
क्षणमाह ॥ स्थितामिति ॥ भर्ता कुंचितपादयुग्मं यस्याः एवंभूतां स्थितामुपविष्टां स्त्रियं तथैव स्वयमपि कुंचि
तचरणद्वयः सन्नित्यर्थः ॥ कृतानि निर्गमानि यानि स्वावयवानि येन स एवंभूतः सन् भजेत चेत् किंभूतः कामकला

९८

245

सुविदग्धश्चतुर एवंभूतः ॥ तत्रासु गमपदं युग्मपदाभिधं बंधं वदंति प्रवदंति बुधा इति शेषः ॥ उपजातिवृत्तं ॥ ९ ॥
विलासिनी कूर्परमध्यवर्त्तीकृत्य स्वकीयां भ्रमयन्मुहुश्चेत् ॥ भजेत भर्त्ता विवर्त्तितं स्यात्तन्मार्कटं संमुखसं
गमेव ॥ १० ॥ अथ विवर्त्तिताख्यबंधलक्षणं मार्कटबंधलक्षणं चाह ॥ विलासिनीति ॥ विलासिन्याः कूर्परयोर्म
ध्ये वर्त्तते इत्येवंभूतो भर्त्ता स्वकीयां कारं मुहुर्भ्रमयन् भजेत सेवेत रतिं कुर्वीतेत्यर्थः ॥ इत्येवंप्रकारं विवर्त्तितं
विवर्त्तितसंज्ञं रतं स्यात् ॥ तदेव संमुखसंगमेनाभिमुखगमनेन मार्कटं मार्कटसंज्ञं स्यादित्यनेन पूर्वबंधेषु
ष्वभिगमनं सूचितमिति ॥ उपजातिवृत्तं ॥ १० ॥ अथोत्थितबंधाः ॥ अथ उपविष्टबंधनिरूपणानंतरं उत्थितबं
धाः ॥ उत्थितास्तां श्रेयमाणा बंधा इत्यर्थः ॥ निरूप्यंत इति शेषः ॥ संवेष्टयेत् सा निजकूर्परेण जान्वंगनाया अवलं

१२५

ब्यकंठे॥ रतिं प्रकुर्याद्दिति कूर्पराख्यो बंधः प्रदिष्टः स च आनुपूर्वः॥ १॥ पुरुष इति शेषः॥ कूर्परेण स्वीयकफोणि
ना अंगनाना जानुसंवेष्ट्य स्वान्यभुजेन तां कंठे अवलंब्य आश्लिष्य आलिंग्य सम्यक्॥ रतिं प्रकुर्वीत विदध्यात्॥ इ
ति एवं प्रकारेण स आनुपूर्वः आनुलोम्येन दृष्टं पूर्वं यस्य स एवं भूतः कूर्पराख्यः आनुकूर्परसंज्ञक इत्यर्थः॥ बंधः प्र
दिष्टः कथितः चेति पादपूरणे॥ उपजातिवृत्तं॥ लक्षणं तत्कं प्राक्॥ १॥ अन्यप्रकारेण करणे पदैकपादे भवेदूर्ध्वग
तो गनायाः॥ तदा प्रदिष्टो हरिविक्रमाख्यो बंधः प्रियो यं तरुणीजनानां॥ २॥ अथ हरिविक्रमाख्यबंधलक्षणमा
ह॥ अन्यैनियदा तु कृतः संवेष्टयित्वा सा विना कथितः प्रकारो यस्य स एवं भूते करणे बंधे अंगनायाः स्त्रियाः पादश्चर
ण ऊर्ध्वगतो भवेत्॥ तदा तरुणीजनानां प्रियोयं हरिविक्रमाख्यो बंधः प्रदिष्टः कथितः॥ पूर्वबंधे एकेन कूर्परेण १२

957

योषिज्ज्ञातुर्संवेष्टनमपरेणतेनतदीयपर्यंकंठावलंबनमिहतुपोषिज्ज्ञातुसंवेष्टयेनैवस्त्रीपदकर्णपूरेणपुरस्कर्तकृत
हंसगावलंबनमिति पूर्वस्माद्विशेषः॥ एवंसत्यत्रांगनापादस्योर्ध्वगमनमप्यनायासेनसिध्यतीति॥ उपजा
तिवृत्तं॥ कंठंभुजाभ्यामवलंब्यभर्तुः श्रोणीं निजोरुयुगलेनगाढं॥ संवेष्ट्यकुर्याद्रतमंगनाचेद्बुधैः कवी
द्रैरितिकीर्तिबंधः॥३१॥ अथकीर्तिबंधलक्षणमाह॥ कंठमितिअंगनाभुजाभ्यांस्वबाहुभ्यांभर्तुः कंठमवलं
ब्याश्रित्य निजोरुयुगलेनस्वीयसक्थिद्वयेनतस्यैवश्रोणिंकटिपश्चाद्भागंगाढंदृढंसंवेष्ट्यरतंकुर्याच्चेत्॥
अत्रोरुद्वयस्यस्त्रीलिंगताकवीनांनिरंकुशत्वात्ज्ञेया नितोवोरिति पाठोस्तु॥ तदाकवीद्रैरिलेवंप्रकारेण
कीर्तिबंधउक्तः कल्पितः॥ एतस्यैवहंसलीलइत्यपिसंज्ञोक्तास्मरदीपके॥ एतत्प्रोक्तंबंधत्रयंचस्त्रीपुरुषा

न्यतरस्य कुड्याद्याश्रितत्वं एव सिध्यतीति प्रागेवोक्तं स्थितिरं द्रवज्ञावक्तं ॥३॥ अथ व्यानतबंधाः ॥ अथोव्यानबं
धर्निरूपणानंतरं व्यानतबंधाः व्यानता यांत्युक्ता पार्श्वे यां स्त्रियं तथाभूतेन पुरुषेण क्रियमाणा बंधा इ
त्यर्थः ॥ एतत्स्व पशुतुल्यं क्रियमाणत्वात्पशुबंधा इत्युच्यंते ॥ निरूपयति ॥ तेशोब ॥ विन्यस्तपाण्यंघ्रियुगा
धरिण्यामधोमुखी धेनुवदग्रसंस्था ॥ स्त्री स्यात्पृष्ठस्था स्यात् कटिस्थावर्ती भजेत्तच्चेद्धेनुकमेतदुक्तं ॥१॥ अथ
धेनुकाख्यव्यानतबंधलक्षणमाह ॥ विन्यस्तेति ॥ स्त्री धरिण्यां पृथिव्यां विन्यस्तपाण्यंघ्रियुगा पाणी चां
घ्री च पाण्यंघ्रि प्राण्यंगत्वाद्द्वंद्वैकवद्भावः ॥ तस्य युगं द्वंद्वं पाणियुगमंघ्रियुगं चेत्यर्थः ॥ द्वंद्वं तेष्व समानं पद
प्रत्येकमत्र संबध्यते ॥ तद्विन्यस्तं स्थापितं यया सैवं भूता विन्यस्तौ पाणी यस्मिन्नेवंभूतमंघ्रियुगं यस्यास्त

याभूतेति वा॥ अधोमुखे यस्यास्तथा धेनुवत् गोवत् लग्नं अग्रे अधोमुखस्य संस्था स्थितिर्यस्यास्तथाभूता च
स्यात्॥ अथानंतरं पुमानिति शेषः॥ अस्या योषितः कटिदेशे इभवदुन्नतश्रोणिदेशे वलितः रसेनैवंभूतः सन् रमेत
सेवेत चेत् तन्नाम वेति शेषः रतिं कुर्वीतेत्यर्थः॥ तदा तत्करणं धेनुकं धेनुकसंज्ञं स्मृतं कथितं॥ उपजातिवृत्तं॥
॥१॥ अधोमुखीं मस्तकदोः कृत्वास्ये भुवं गतां कामी तिष्ठन् नारीं॥ करीव भर्ता रतिमेवं ब्रुवन्ति तत्तदैभसंज्ञं क
रणं प्रदिष्टं॥२॥ अथैभसंज्ञककरणलक्षणमाह॥ अधोमुखीमिति॥ भर्ता करीव हस्तीव रसान्नोत्तमसक्त
चित्तं यस्य एवंभूतः सन् नरोत्तमश्चलसत्तमपोऽस्त्यभिधानात्॥ यत्र करणे अधोमुखं यस्यास्तथाभूतां मस्त
कदोः कृत्वास्ये शीर्षभुजस्तनवदने भुवं पृथ्वीं गतां प्राप्तां भस्यमीं मस्तके कृत्वाधवयवामित्यर्थः॥ नारीं स्त्रियं

(२५०)

क्रामति स्मयं तीव्रस्वर्थः॥ तत्रा इभस्य हस्तिन इदं ऐभं ऐभमिति संज्ञायस्येत्येवं भूतं करणं प्रदिष्टं कल्पितं॥ उपेंद्रवज्रा
वृत्तं॥२॥ ऐन सौकर गार्दभादिकान्यप्रयोजनतयात्र भट्टिना॥ अप्रसिद्धकरणानि नो मया दर्शितान्यतिवि
निंदितानि च॥३॥ अथाप्रसिद्धविधानिरूपणे बीजमाह॥ ऐनेति॥ मयात्रास्मिन्ग्रंथे एनस्येदमैणं सकु
रस्येदं सौकरं कस्यापि कप्रयोजनस्य पदः॥ गर्दभस्येदं गार्दभं चेति इद्दसांत्यादीनि एवमेवं भूतानि अतिविनिं
दितानि भट्टिना प्रसिद्धकरणानि नो दर्शितानि॥ अत्र भट्टिना पदेनादि पदस्याद्यमार्जारकरणस्य ग्रंथां
तरे प्रसिद्धत्वं सत्यितं॥ प्रसाधिते पाणिपादे दाम्यास्य श्रिमुखो रसि॥ उन्नतायाः स्त्रियाः कष्टं मार्जारकर
णविदुरिस्य ग्रामितिस्थो द्रुता वृत्तं॥ रथ्योद्धता नौ लौ गिति लक्षणात्॥४॥ अथ पुरुषायितबंधाः॥ अथोत्पा

नर्वंधनिरूपणानंतरं पुरुषायितबंधाः पुरुषेणेव स्त्रिया आचरिता बंधा इत्यर्थः ॥ निरूप्यंते इति शेषः ॥ जात
श्रमं वीक्ष्य पतिं पुरंध्री स्वेच्छाम एवापरतेष्वतृप्ता ॥ कंदर्पवेगाकुलिता नितांतं कुर्वीत तुष्ट्यै पुरुषायि
तं सा ॥ १ ॥ अथ पुरुषायितबंधावसरमाह ॥ जातेति ॥ सा पुरंध्री स्त्री पतिं भर्तारं जातश्रमं वीक्ष्यावलोक्य अ
थानंतरं रतेष्वतृप्ता अतएव नितांतमत्यंतं कंदर्पः कामस्तस्य वेगेनाकुलिता सती स्वेच्छातएव स्वेच्छये
वसार्थे विभक्ति कल्लसिल ॥ तुष्ट्यै उभयसंतोषायेत्यर्थः ॥ पुरुषायितं वक्ष्यमाणप्रकारं बंधविशेषं
कुर्वीत विदधीत ॥ इंद्रवज्रावृत्तं ॥ १ ॥ उत्तानसुप्तस्य पतिं भुजाभ्यामालिंग्य विनिवेश्य योनौ ॥ भजेल्लितं बं
धस्थिता तर्पयंती नारी तदास्माद्विपरीतबंधः ॥ २ ॥ अथ विपरीतबंधलक्षणमाह ॥ उत्तानसुप्तमिति ॥ नारी यो

२५३

१२८

ष्टित उत्तानसुप्तं द्वयितं भुजाभ्यां आलिंग्य तदीयं लिंगं योनौ स्वकीयगुह्यरंध्रे विनिवेश्य प्रवेश्य नितंबं स्वक
टिपश्चाद्भागं परिचालयंती रतिभिर्जेतस्तं कुर्यात् इत्यर्थः ।। तदा विपरीतबंधः ।। अत्र पुरुषेण कर्त्तायस्य प्र
कारस्य स्त्रियैव विधीयमानत्वात् अस्य विपरीतत्वं ज्ञेयं ।। उदाहृतिरुक्ता ।। २ ।। सुप्तस्य पुंसो जघनोपरि स्थि
ता संभ्रामयंत्यंघ्रियुगं विकुंचितं । चक्राकृतिस्त्री नरवत्स्थिवेष्टते तद्भ्रामरबंधकरणं समीरितं ।। ३ ।। अ
थ भ्रामरबंधं विपरीतबंधलक्षणमाह ।। सुप्तस्येति ।। यत्र स्त्री सुप्तस्य पुंसः ।। जघनोपरि स्थिता सती वि
कुंचितमंघ्रियुगं स्वीयचरणद्वयं संभ्रामयंती च सती चक्राकृतीति क्रियाविशेषणं नरवत् पुरुषवत् स्पंदवि
चेष्टते व्यापारं कुरुते तत् भ्रामरबंधकरणं समीरितं कथितं ।। इंद्रवंशावृत्तं ।। इंद्रवंशा ततो जाविति लक्षणा

१२८

253

त॥३॥ प्रेंखविभ्रमवती स्मरयंत्रे भर्तृलिंगमुपधाय पुरं श्री॥ भ्रामयेत्कटिमनंगविलोला स्यात्तदाकरण
मुत्कलिताख्यं॥४॥ अधोत्कलितास्यबंधलक्षणमाह॥ प्रेंखेति॥ पुरं श्रीस्त्री अनंगविलोला स्मरेण चं
चला स्मरयंत्रे गुह्ये भर्तृलिंगमुपधाय संस्थाप्य प्रेंखद्दोलातस्येव विभ्रमो भ्रमणं विद्यते यस्याः सैवं भू
ताप्यसती कटिं स्वकटिभागं भ्रामयेत् पालयेत्॥ तदा उत्कलिताख्यमुत्कलितानि सारव्या यस्यैवं भूतं कर
णं बंधः स्यात्॥ एतस्यैव प्रेंखालितमित्यपि संज्ञांतरं॥ अत्र ताडनसीत्कारादिकं यंत्रांतरोक्तमस्य॥ विस्त
रभयान्न लिख्यते इति स्वागतावृत्तं स्वागता नौ भौ गि इति लक्षणात्॥५॥ विपरीतरतेस्तु सीत्कृतादरहा
सातिमनोरमाननां॥ कितवाद्य वरांगनासि मे स्मरयुद्धे विजितोसि चाप्यलं॥५॥ विपरीतेति विपरी

१२८

तरले विलासिनी इति मंजुमधुररटं सालपती सती सदा अवनतां याती स्मृतरस्ते वेणनात्वदः॥ इतीति॥ हे कितव
हे धूर्त त्वं मे वशमधीनत्वं गतोसि पुनः त्वं मम यास्मरसुडे पि जितोप्यसि॥ कीदृशी सी कृतेन शाट्य विरोधेन स
हिता हरहासेनेव हासेनातिमनोरमाननं यस्यास्तथा भतेति॥ वैतालीयवृत्तं॥ वैतालीयं द्विस्वरा युक्पादे सु
ग्वसर्वो ते लौ इति लक्षणात् ॥ ६॥ इति मंजुरटं सुधाकुलासकुचाकर्षणचुंबिताधरा॥ अममीलितचारुलो
चनाद्रवतां पाति सदा विलासिनी॥ ६॥ इतीति॥ कुचाकर्षणेन सहितं चुंबितोधरो यस्यास्तथाभूता॥ श्र
मेण मीलिते लोचने यस्या सा॥ समवेक्ष्य नितांत निःसहां मनगच्छेद् बलादुत्तामिति॥ ७॥ श्लयेति॥ पुरुषो
बलात्स्त्रियं दृष्ट्वा मीलितं मीलितलोचनपद्मे देशे एवंभूतां॥ नितांत निःसहां मदपंतं सहनासमर्था॥ समवे

१२८

२८५

दृष्ट्वा वल्लोकयन्द्रुतामित्सव गच्छेत्संतीपातः ॥ शेषं सुगमं ॥ ७ ॥ करिणीं हरिणीं च गर्भिणीं नवसूतामनुरागिणीं कृ
शां ॥ बुरितां च कुमारिकां रते विपरीते वर्जयेत्सुधीः ॥ ८ ॥ करिणीमिति ॥ सुधीर्बुद्धिमान् करिणीं प्रोक्तलक्ष
णां विपरीतरते परिवर्जयेत् त्यजेत् ॥ स्वस्य श्रमप्राप्तेः स्वस्य सौख्यातिशयाभावादिति भावः ॥ हरिणीं च परि
वर्जयेत् ॥ तस्याः श्रमप्राप्तेः स्वस्य च सौख्यातिशयाभावादिति भावः ॥ गर्भिणीं च तत्र परिवर्जयेत् ॥ तस्या
एव श्रमाधिक्यादेः सेवं सर्वत्र पृथग्योजनेति ॥ शेषं स्पष्टं ॥ ९ ॥ अथ ताडनसीत्कारोद्देशः ॥ उद्देशो नाम्ना
कीर्तनं ॥ कामयुद्धांगयुग्मं स्यात् करताडनसीत्कृते ॥ तत्ताडनं चतुर्धा स्यात् सीत्कृतं पंचधा स्मृतं ॥ १ ॥ कामेति ॥
करताडनसीत्कृते द्वंद्वं कामयुद्धस्य सुरतस्यांगयोर्युग्मं स्यात् ॥ तत्र कामयुद्धांगभूतं ताडनं चतुर्धा स्यात् ॥

१२९ सीत्कृतंमुखांतर्वायुप्रयोज्य रदनरसनाग्रसंयोगजः शब्दविशेषः ॥ पंचधा पंचप्रकारकं प्रसृतेन ॥१॥ प्रसृ
तेनापहस्तेन मुष्टिना समपाणिना ॥ ताडनं स्याच्चतुर्थं यं तस्य स्थानानि संब्रुवे ॥२॥ प्रसृतेनेति ॥ एवमेवं प्र
कारेण चतुर्द्धा ताडनं स्यादित्यन्वयः ॥ प्रसृतेन निकुब्जपाणिना ताडनमेकं ॥ एवमपहस्तेन व्यस्तपाणित
लेन द्वितीयं ॥ मुष्टिना तृतीयं ॥ समपाणिना विस्तृतहस्ततलेनेत्यर्थः ॥ चतुर्थं ॥ तस्य ताडनस्य स्थानानि
संब्रुवे इति ॥२॥ पार्श्वे गुह्ये समतलं मुष्टिं पृष्ठे च मूर्धनि ॥ फणाकारं प्रसृतिकं दद्यात् हृद्यपहस्तकं ॥३॥
पार्श्व इति ॥ पार्श्वे गुह्ये च समतलं दद्यात् ॥ पृष्ठे मुष्टिं दद्यात् ॥ अथ फणाकारं प्रसृतिकं मूर्ध्नि दद्यात् ॥ हृ
दि अपहस्तकं दद्यादिति ॥३॥ विपरीतरतेपरांगना हृष्टमुष्टापरिताडयेत् सतिं ॥ करताडनकं तदा बुधैरिति १२९

257

संतानितसंज्ञमुच्यते॥२॥ अथसंतानिताख्यताडनलक्षणमाह॥ विपरीतेति॥ यदाऽङ्गनाविपरीतरते मु
ष्ट्यापतिं हृदयेताडयेत्॥ तदाबुधैरिसेवं प्रकारःसंतानितसंज्ञंकरताडनकमुच्यते कथ्यते॥ यद्यपिएतदेवमु
ष्ट्याताडनमुक्तं॥ तथापि विपरीतबंधे तत्रतत्कर्तुमशक्यमिति हृदयस्याप्यत्रतत्स्थानसोक्तिःइति॥२॥ वि
स्तीर्णहस्तेन प्रहारतेस्त्री हन्यात्सतिस्यात्सुपताकसंज्ञः॥ अंगुल्यैकेनैवकृतः प्रहारोबुधैः सउक्तःखलुबिंदु
मालः॥३॥ अथपताकसंज्ञकप्रहारलक्षणं बिंदुमालाख्यप्रहारलक्षणंचाह विस्तीर्णेति॥ स्त्रीयद्यहारते पतिं
विस्तीर्णहस्तेन चपेटिकयेत्यर्थः॥ हन्यात्प्रहरेत्॥ सप्रहारः पताकसंज्ञः स्यात्॥ यः प्रहारो गुल्यैकेनैव कृ
तःसबुधैर्बिंदुमालउक्तःखलुनिश्चयेनेति॥३॥ सांगुष्ठमध्यांगुलिकाप्रहारं ज्ञानैः पुरंध्रीकुरुतेतिरागात्॥

258

१३०

यद्येवमुक्तः कविभिः पुराणैरानंदकृत्कुंडलनामधेयः॥४॥ अथ कुंडलाख्यप्रहारलक्षणमाह॥ सांगुष्ठेति॥
पुरंध्रीयोषिद्यदि वदाति रागाद्रतिप्रमोदहेतोः सांगुष्ठाभ्यामधोंगुलिकानपायः प्रहारस्तं॥ मध्यमांगुष्ठयोग
विहितताडनमित्यर्थः॥ शनैर्मर्दकुर्वते तदा पुराणैः कविभिरानंदकृत्कुंडलनामधेयः॥ कुंडलाभिधाएवप्रहार
उक्तः कथित इति॥४॥ अथ सीत्कृतभेदांस्तु पंचैव क्रमतो ब्रुवे॥ हिंकृतं स्तनितं सीत्कृतं फूत्कृतं तथा॥५॥
अथ सीत्कारभेदांस्तु देशेनाह॥ अथ ताडनविकरणानंतरं सीत्कृतस्य भेदाः क्रमतः पंचैव संति॥ वा स्तापन
सच्चाशैः क्रमेणोक्ताः संतीत्यर्थः॥ तान् ब्रुवे क्रमाद्विवक्षया कथयामीत्यर्थः॥ अथ सीत्कृतभेदांस्विति॥ हिंती
यां न पाठे क्रमतो ब्रुवे इत्यस्य पदः॥ उद्देशेन कथयामीति ब्रुव इत्यस्यार्थः॥ अग्रे पमेयविंदु इति श्लोके सीत्कृतं १३०

४६७

कण्ठितं चैवाक्रमाद्भेदाः समीरिता इति पाठः समीरिता इत्यस्य निरूपिता इत्यर्थः स्त्रयाणां चैतल्लक्षणं यथाश्रुतं एवपो
ज्ञातः प्रकार इति ॥ क्रममेवाह ॥ हिंकृतं स्तनितं सीत्कृतं सीत्कृतमित्यर्थः ॥ उत्कृतं तथा फूत्कृतमिति ॥ ५ ॥ उच्चा
रो मुखनासाभ्यां हिंकृतं त्वाभिजायते ॥ स्तनितं मेघगंभीरघोषवत्स्यात् ततः स्मृतं ॥ ६ ॥ अथ हिंकृतादिलक्षणा
नि श्लोकत्रयेणाह ॥ उच्चार इति ॥ मुखनासाभ्यामुच्चारो हिंकृतं त्वाभिजायते भवति मेघस्य यो गंभीरघोष
स्तद्वत् स्तनितं ॥ स्तनितात् सीत्कृतं स्यात् ॥ ततः स्मृतमिस्कृतारान्वयि ॥ ६ ॥ फूत्कृतं तत्तु भुजगोच्छ्वासवत्स्या
दथोत्कृतं ॥ वेणुविस्फोटनारावतुल्यरूपं समुच्यते ॥ ७ ॥ फूत्कृतमिति ॥ ततः फूत्कृतं स्मृतं ॥ तत्फूत्कृतं तु भुज
गोच्छ्वासवत्सर्पनिश्वासतुल्यं स्यात् ॥ अथानंतरं ॥ उत्कृतं वेणोर्विस्फोटनस्यारावः शब्दस्तेन तुल्यरूपं यस्य

।२। तितं यथाभूतं समुत्पद्यते कथ्यत इति ॥ ७ ॥ मेघबिंदुर्यदा तोये निपतेत्तद्वदाहृति ॥ सीत्कृतं कथितं चैवं क्रमाद्भेदाः
समीरिताः ॥ ७ ॥ मेघेति यदा मेघबिंदुस्तोये भूमिस्थजले निपतेत् ॥ तद्वदाहृति तस्य निपतनस्य यो रवस्तस्या
हृतिरिवाहृतिर्यस्य तथाभूतं ॥ तत्तुल्यमित्यर्थः ॥ सीत्कृतभेदमतं सीत्कृतं कथितं ॥ एवं क्रमात्स्वाभिप्रेतक्र
मात् ॥ भेदाः ॥ विशेषिसीत्कृतविशेषाः समीरिताः कथिता इति ॥ ७ ॥ लावकोकिलकपोतहंसिकानीलकंठर
तसान्निभान् क्रमात् ॥ संदधाति किल हिंकृतादिकां चित्रभोगसमये विलासिनी ॥ ८ ॥ लावेति विलासि
नी चित्रभोगसमये क्रमात् ॥ लावः प्रसिद्धः पक्षिविशेषः स च कोकिलः कपोतः पारावतः ॥ हंसिका हंसि
नी नीलकंठो मयूरश्चेति द्वंद्वस्तेषां रुते तत्तुल्यास्तथाभूतान् हिंकृतादिकान् क्रमात्सीत्कृतभेदानसंदधाति । १३१

करोति ॥ एवं चाग्रहिंकृतस्तनितसीत्कृतो हृतगूढकृतानां क्रमेण तावको किल कपोतहंसिकामधुरस्वरा स्वसाम्यं
बोध्यमिति ॥ ९ ॥ सुरते दशनच्छदोपदामसादाः परिरम्भने भृशं ॥ दयितेन नतरातिरागतः प्रदने सीत्कृतमंज
सा नवा ॥ १० ॥ अथ सीत्कृतसमयमाह ॥ सुरत इति ॥ यदा दयितेन सुरते प्रमदायाः दशनछदो धरोष्ठो भृशं
परिरम्भते पीड्यते तदा तया प्रमदया अतिरागतो तिप्रेम्णा अंजसा अनायासेन सीत्कृतं क्रियते इति ॥ १० ॥ अथाष्ट
नायिकालक्षणानि ॥ सुगमं ॥ अखिलसुरतचिन्हैरंकितांगः सपत्न्याः भवनकलुषनेत्रो निद्रया जीविते शः ॥
सभयमधुरभावं प्रातरभ्येति यस्याः कथयति सुधियः तां खंडितां ध्यातुरंध्री ॥ ११ ॥ अथ खंडितालक्षणमा
ह ॥ अखिलेति ॥ प्रातः समागतभर्तृशरीरनिष्टान्यांगनासंभोगचिन्हावलोकनोत्तरकालिकेर्ष्याकषायि

१२२

ताखंडिताया लक्षणं ज्ञेयं॥ श्लोकार्थस्स्पष्ट एवेति॥१॥ वनिताशुभं वासवेश्मनि मदुराभ्यामधिवासिनी नि
शि॥ पतिमार्गं दिरार्पितेक्षणा कथिता वासकसज्जिता बुधैः॥२॥ वनितेति॥ बुधैरेवंविधा वनिता वासकसज्जि
ता कथितेत्यन्वयः॥ किंभूता शुभं यथा तथा वासवेश्मेति कर्मधारयस्तस्मिन्मदुराभ्यामित्यत्रोपान्वध्याङ्वसः इ
त्यनेन द्वितीयाशेषं स्पष्टं॥ लक्षणं तु स्ववेश्माधिकरणकमदुराभ्याधिष्ठितात्वे सति पतिमार्गविलोकना
नुकूलव्यापारवत्त्वमिति॥२॥ सागसत्याचरणगं दयितं प्रचंडैर्वाक्यैर्निरस्य बहुकोपत एव पश्चात्॥ सं
जायते विरहतापविलापदीना यातां वदंतीति कलहांतरितां कवींद्राः॥३॥ सागसेति॥ या सागस्त्वात्सापराध
त्वात्॥ आगोपराधो मंतुश्चेत्यमरः॥ चरणगं दयितं बहुकोपत एव निरस्य निष्काश्य पश्चात् विरहतापवि

१२२

263

लापद्दीनां विरहसंबंधितापपरिदेवनाभ्यां दीना संजायते ॥ कवींद्रास्तां कालहांतरितां वदंति ॥ कोपहेतुक
सापराधप्रियनिष्कासनोत्तरकालिकपश्चात्तापवती कलहांतरितेति लक्षणं ज्ञेयमिति ॥ ३ ॥ मद
नाकुलिता निजनिलयात्पाहृतभवना निशि गमदचारिणी ॥ सुरताय परालयं प्रजेल्कयपस्तामभिसारिणीं विदुः ॥
॥ ४ ॥ मदनेति ॥ अत्र निशीति दिवसस्याप्युपलक्षणं तेन दिवाभिसारिकाया अपि संग्रहो न्यत्र सुगमं ल
क्षणं नुकांतसंगमप्रयोजनकेनात्ततस्वच्छंदगमनानुकूलतान्निष्ठव्यापारप्रयोजकव्यापारान्यतरवत्त्वम
भिसारिकात्वमिति ध्येयं ॥ ४ ॥ प्रियतममनुनेतुं प्रेषयित्वैव दूती स्वयमथ रतिलोला याति संकेतदेशं ॥
तदनु पतिविहीनामागतां वीक्ष्य तां यावदतिबहुलतापं सोप्यतो विप्रलब्धा ॥ ५ ॥ प्रियतममिति ॥ यत्प्रिय

265

१३३

तमनन्वेतु दूतीं प्रेषयित्वैव स्वयमतिरतिलोलासती संकेतदेशं याति ॥ स्वयमपीतिपाठः साधुः ॥ तदनुत
दर्शनंतरं दयितविहीनामागतां दूतीं वीक्ष्य व्याकुलतामावहति ॥ बुधैः सा विप्रलब्धोच्यतइत्यन्वयो जना ॥ प्रियानु
नयप्रयोजनकदूतीप्रेषणोत्तरकालिकात्मिका मातुरासप्रयुक्तस्वयंकर्तृकसंकेतस्थलागमनोत्तरकालिक
नद्रहितनरकलोकनजन्याग्लानिमापवती विप्रलब्धेति ॥५॥ दयिते परदेशसंस्थिते राशिदपंकेरुहचंदनादिभिः ॥
परितप्यत एव यद्वपुः कथिता सा कविभिर्वियोगिनी ॥६॥ दयितइति ॥ यद्वपुः दयिते परदेशसंस्थिते सति ॥
रश्मीचंद्रः पंकेरुहं कमलं चंदनं चेति द्वंद्वस्तदादिभिरतिरम्यकारिभिरपीत्यर्थः ॥ आदिपदेनोशीरादिकं ग्रा
ह्यं ॥ परितप्यत एव ॥ ननु निरुक्तं नीयते कविभिः सा वियोगिनी विरहिणी कथितेति ॥ विदेशस्थितप्रियवियो

१३३

265

ग प्रयुक्तवैदग्ध्यनिधाय्योतितापवं तल्लक्षणं बोध्यमिति ॥ ९ ॥ वैराग्यवान्सकलकेलिकलाकलापे कांतो ज
हाति न सकाशमनंगलौल्यात् ॥ यस्याः स्त्रियाः सुरतसौख्यविवर्जिता सा स्वाधीनपूर्वपतिकेति बुधैः प्र
दिष्टा ॥ ७ ॥ वैराग्येति ॥ सकलकेलिकलाकलापे समस्तक्रीडाचातुर्यसमुदाये वैराग्यवान् ॥ नहि जयकानुरा
गशून्य इत्यर्थः ॥ एवंभूतः कांतोऽनंगलौल्यात् ॥ केवलरतिविषयकातिरागवशादित्यर्थः ॥ यस्याः स्त्रियाः
सकाशं समीपं न जहाति ॥ सर्वदा पत्नसंनिधावेव तिष्ठतीत्यर्थः ॥ बुधैर्निरिक्तसौख्येन विवर्जिता स्या
त्सा स्वाधीनपूर्वपतिका स्वाधीनपतिकेत्यर्थः ॥ इत्येवं परिदिष्टा कथिता यद्यप्यत्र स्वाधीनपूर्वत्वं पतिकाशब्द
स्येन तु तदर्थस्य संज्ञायाः संभवित्वाभावात् ॥ अतो वाच्यवचनदोषमाहुरालंकारिकाः ॥ यद्वाच्यस्य वचनमवा

१३४

च्यवचनं हि तत्॥ इति॥ तथापि स्वाधीनपर्तृकाशब्दे विशेषितपतिकाशब्देन स्वाधीनपर्तृकालक्ष्यता इति न दो
षः॥ स्वरसां निधस्या गासहिष्णुपतिकात्वं लक्षणं बोध्यं॥७॥ विविधकुसुममालाभूषितांगी मनोज्ञा सुरतर
सविलोला सानुरागा स्वकांते॥ निवसति चटुलाक्षी वासगेहे चिरं या परकविभिरिहोक्ता सा किलोत्कंठितेति
॥८॥ विविधेति॥ या वासगेहे विविधकुसुममालाभिर्भूषितान्यंगानि यस्याः सा भूषिता मनोज्ञा रमणीया
सुरतरसे विलोलासक्ता स्वकांते स्वप्रियविषये सानुरागा प्रेमविशिष्टा चटुले चंचले अक्षिणी यस्याः
सा तथाभूता वसती चिरं चिरकालं निवसति तिष्ठति परकविभिरिह अस्मिन् शास्त्रे सोत्कंठिते सा उक्ता किलेति
निश्चयार्थकं॥ संकेतस्थलाधिकरणकप्रियागमनाभावविषयकचिंतावत्त्वं लक्षणं बोध्यं॥ अत्र प्राकृतलक्ष

१३५

267

णेषु परप्रयोजनानि विस्तरभयान्न लिखितानीति ॥ ॥ सुविदितपरमार्थः कामशास्त्रस्य विद्वान् विविधरति
विनोदैः कामिनीनां मनांसि ॥ अनुदिनमनुरागाद्रञ्जयते यः सलीलं फलमविकलमेव प्राप्नुयात् जन्मनः सः ॥१॥
अथैतच्छास्त्रफलं कण्ठतः प्रदर्शयन्नुपसंहरति ॥ सुविदितेति ॥ कामशास्त्रस्य सुविदितः परमार्थो येनेत्ययं भ
तः ॥ विद्वान् यः कामिनीनां मनांसि विविधरतिविनोदैः स्थानबंधाद्यनेकप्रकारकसुरतविलासैरनुरागात् स
लीलमिति क्रियाविशेषणं रञ्जयते ॥ रंजयति ॥ अंतर्भावितो णिच्स्यासक्तानि विदृधातोः पर्यः ॥ स जन्मनो
विकलं संपूर्णमेव फलमाप्नुयादिति ॥२॥ सव्रीडार्धं निरीक्षणं यदुभयोर्ये हृ[illegible]तिका प्रेषणमद्यश्वो
भविता समागम इति प्रीत्या प्रमोदश्चयः ॥ प्राप्ते चैव समागमे सरभसं यच्चुंबनालिंगनमेतत्कामफलं

१३५

तदेव सुरतंत्रेऽवः पश्यतामिव॥ १०॥ अथ प्रसंगात्तागरिकवृत्तांतमाह॥ सव्रीडेति श्लोकार्थः स्पष्टः॥ १०॥
यावच्चंद्रकरमौलिगा सुरनदी गौरी तदर्धांगगा यावत्प्रेमवती पयोधितनया वैकुंठसंगे रता॥ वेदाभ्यासरतो
विरंचिरपि भर्त्ता वह्निनेशान्तरी भूयात्तावदनंगरंगक इति श्रीसेसक्ता कामिनां॥ ११॥ इति श्रीमल्लाडखान
विनोदाय कल्याणमल्लविरचिते अनंगरंगे संभोगनिरूपणं नाम दशमस्थलं॥ ॥ अथ कविर्ग्रंथा
त आशीर्वादात्मकं मंगलमाचरति यावदिति॥ सुरनदी गंगा यावच्चंद्रकरमौलिगास्ति शिवमस्तकप्रा
मास्ति॥ गौरी पार्वती तदर्धांगगा शिवार्धांगास्ति॥ पयोधितनया लक्ष्मी यावत्॥ प्रेमवती सती वैकुंठ
संगे विष्णुसमागमे रता प्रीतास्ति॥ [illegible]॥ प्रेमवती सती वैकुंठसंगे विष्णुसमागमे

१३५

रताप्रीतास्ति॥ चिरं चिरंजीव्या पियावत् वेदाभ्यासरतोस्ति॥ यावद्भूमिरस्ति यावद्दिनेशः सूर्योस्ति यावच्च
श्री चंद्रोस्ति तावद्दाकल्पमिमर्थः॥ अनंगरंगको नंगरंगाख्यो ग्रंथ इत्येवं प्रकारेण कामिनां प्रीत्यै भूयादि
ति॥ इत्थं नंगरंगव्याख्यायां द्वात्रिंशस्थलव्याख्या संपूर्णा॥ ॥ शाके मिरोपगोत्रेला मिते सौम्यायने भृगौ॥ स
मास्मिन्मगमत् व्याख्या राधश्शुक्लस्य हेस्तिथौ॥७॥ वाठोडकरवंशस्थ उमागर्भसमुद्भवः॥ नीलकंठात्मकौ जो
व्याख्यां गणेशः सन्मुदे तनोतु॥२॥७॥ ॥इति नीलकंठात्मजगणेशविरचिता नंगरंगप्रकाशिका व्याख्या समा
प्ता॥ ॥८॥ स्वस्ति॥ त्रिसरासंभ्रमे इत्थं स्माद्वातोर्निब्यं नस्य विजंतस्य तत्वस्य स्वत्व रेतिततीयांतस्य वंतरये
तितद्दर्थः॥ ॥स्वस्ति श्री नृप शालिवाहन शाके १७५४ नंदननामसंवत्सरे आषाढ शुद्ध ११ रवी वारे समाप्तः शुभमस्तु॥

२७०

१३६

१३६

२७१

[OrderDescription]
,CREATED=07.10.20 16:46
,TRANSFERRED=2020/10/07 at 17:19:50
,PAGES=271
,TYPE=STD
,NAME=S0003933
,Book Name=M-1136-ANANDRAD PRAKASHIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF

FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF

FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF

FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF

FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF

FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF

FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF

FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF

FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,